THE FREE INDOLOGICAL COLLECTION

WWW.SANSKRITDOCUMENTS.ORG/TFIC

FAIR USE DECLARATION

This book is sourced from another online repository and provided to you at this site under the TFIC collection. It is provided under commonly held Fair Use guidelines for individual educational or research use. We believe that the book is in the public domain and public dissemination was the intent of the original repository. We applaud and support their work wholeheartedly and only provide this version of this book at this site to make it available to even more readers. We believe that cataloging plays a big part in finding valuable books and try to facilitate that, through our TFIC group efforts. In some cases, the original sources are no longer online or are very hard to access, or marked up in or provided in Indian languages, rather than the more widely used English language. TFIC tries to address these needs too. Our intent is to aid all these repositories and digitization projects and is in no way to undercut them. For more information about our mission and our fair use guidelines, please visit our website.

Note that we provide this book and others because, to the best of our knowledge, they are in the public domain, in our jurisdiction. However, before downloading and using it, you must verify that it is legal for you, in your jurisdiction, to access and use this copy of the book. Please do not download this book in error. We may not be held responsible for any copyright or other legal violations. Placing this notice in the front of every book, serves to both alert you, and to relieve us of any responsibility.

If you are the intellectual property owner of this or any other book in our collection, please email us, if you have any objections to how we present or provide this book here, or to our providing this book at all. We shall work with you immediately.

-The TFIC Team.

THE KUPPUSWAMI SASTRI
RESEARCH INSTITUTE,
MADRAS.

PREFATORY NOTE

513

I

The following pages embody the text of Âtmatattvaviveka by Udayanāchārya, its commentaries by S'ankara Miśra and Raghunātha S'iromaṇi and the annotations on Raghunātha's commentary by S'rīrāma Tarkālankāra.

The place of Atmatāttvaviveka, otherwise known as Bauddhādhikāra or Bauddhadhikkāra, is unique in the history of Indian Philosophy. Udayana was one of the greatest philosophers India has ever produced, and all his writings bear upon them the stamp of his extraordinary genius and controversial acumen. His tmatattvaviveka and Nyāyakusumāñjali are two rilliant attempts in defence of the orthodox Naiyāika's position in regard to the doctrines of Self and od against the attacks of the heretics.

The greatest assailants of the theory of Self being the Buddhists, the former work concerns itself with a ormal enunciation and refutation of their views in this connection. The theories of Perpetual Flux and those of Ideas and Universal Void have been dealt with n a truly polemic spirit.The latter tract however is directed against the non-theistic systems of Chārvāka, Sānkhya, Mīmānsā, Bauddha and Jaina. We have already observed in our Introduction to Varadarāja's Commentary, called Bodhanī, on the Kusumāñjali, that the age in which Udayana flourished was one of ntense conflict among the various schools of philosophical and religious thought. Of all the concepts which were attacked by the opponents those of the

Self (आत्मा) and God (परमात्मा) received the greatest share of attention. But it may be of interest to observe that Udayana had one great predecessor in this field, viz. Mahāmāheśvarāchārya Utpala Deva of Kashmir who, as the pupil of Somānanda and father of Lakṣmaṇa, the Guru of Abhinava Gupta, belonged to the first half of the tenth century of the Christian Era. Utpala was the author of Siddhitrayī, viz. (i) Ajaḍapramātṛsiddhi, (ii) Īśvara siddhi and (iii) Sambandha siddhi, of which the first two works correspond to Udayana's Ātmatattvaviveka and Kusumāñjali respectively, though the treatment of the subject in the former is substantially different from that in the latter.

The Ātmatattvaviveka, for instance, starts with the formulation of the destructive arguments of the Buddhists denying the existence of the Self as an independent reality, meets them from the standpoint of NyāyaVaiśeṣika and establishes its own theory of it. But Utpala Deva deals with the same topic as a strong champion of the non-dualistic system of Trika philosophy of Kashmir. For facilitating a better appreciation of Udayana's position I am here summing up what Utpala says on the subject in his AJAḌAPRAMĀTṚSIDDHI, which is a little metrical tract consisting of 27 couplets. He observes that Self is Pure Experience, that it is of the nature of Light or Consciousness and that Matter, as associated with the Self which is Intelligence, that is, as appearing in consciousness, is real but in itself it is unreal. Hence the Principle of Intelligence, by virtue of the overflow of its own nature … Knower & Known—as Spirit & Matter

in the universe which is an appearance through its own Māyic Power. Remaining what it is, it appears as if it were alienated from itself. This is technically known as स्वातन्त्र्य, which consists in aggregation (संयोजन) and separation (वियोजन).

The peculiar character of प्रत्यवमर्श is that it tends to project out as external (इदन्तया), as objective, the Universe which lies so long merged in the Self as one with it and then turns it back, when thus externalised, into the quiescent unity of the Infinite Self-awareness (पूर्णाहन्ता). The Self is considered in a double aspect, viz. (1) when it is limited, as Jīva or Aṇu, and is dependent and tainted with Matter, and (2) when it is pure, free, infinite and unconditioned. The so-called Jīva or Individual is in reality the Pure Self, attaining to contraction in consequence of its being the subject (प्रमाता) of prāṇa & the other objects (प्रमेय) already externalised by itself from its own bosom—which externalisation is due to the enactment at will (स्वेच्छया) of its cosmic play. In either aspect the Self being essentially the Principle of Awareness is the background of all kinds of knowledge, positive or negative. It runs as a continuous thread in succession, and hence self-illumination forms its very essence. Thus it will be clear that both the aspects are fundamentally identical. Self-consciousness is the consciousness of oneness with the universe and lies behind all possible states of consciousness. Apart from and independently of this the existence of Matter is not conceiveable, because it is not possible to think of Matter either as identical with or as different from the Light of the Self. The truth therefore appears to be that one non-material Subject, through its own inherent

Free Will, spontaneously raises and sinks within its own bosom varied objects which are identical with itself—and during the whole process its self-character remains totally unaffected.

It is not necessary to enter into a detailed enunciation of what Utpala and the other Kashmirian philosophers have said in connection with the nature of the Self. The little we have said will suffice to convince one that the view of the Self as presented by Utpala is substantially distinct from what is propounded in the present work by his successor Udayanāchārya.

It is usually assumed, and on this assumption is based the present work, that all the Buddhists were deniers of the doctrine of Self. This is of course not historically correct, for we are aware that the doctrine of PUDGALA was not altogether unknown in Buddhist Literature. In earlier times the Sammitiyas & Vajjiputtakas appear to have advocated this doctrine. The Vajjiputtakas were one of the earliest seceders & hence the doctrine was very old. In the Saṁyutta Nikāya (III. 25) there occurs a Sūtra known as the भारहार-सुत्त, where there is an account of the burden, its bearer, its being taken up & laid down. The burden being the five-fold Skandha, its bearer represents the Individnal or Pudgala, & the taking up & laying aside of this burden stand for desire & its cessation. It is evident that this Sutra speaks of a Personal Self, althugh Buddhaghoṣa, Vasubandhu Chandrakīrti, & Yaśomitra have tried to explain it away; & Uddyotakara is justified in considering this sutra as representing the doctrine of Personal Self.

Though Udayana was certainly not familiar with the doctrines of canonical Buddhism, not perhaps

even with their immediate succesors, he was most intimately conversant with the more developed views of the school.

A few words may now be said about the authors of the text & the commentaries herewith published. The history of Udayana is already a familiar one & need not be dwelt upon at this place. He was one of the greatest savants in the Nyāya Vaiśeṣika School & marked the beginning of a new epoch in its study. He was probably an inhabitant of Mithilā* and lived in the tenth century A.D. (906 S'aka ie 984 A.D.). Besides the 2 works mentioned above, he also wrote (i) a commentary on Vāchaspati's Nyāyavārtika Tātparya ṭīkā, called Pariśuddhi, (ii) Lakṣaṇāvalī (iii) & Kiraṇāvalī.

S'aṅkara Miśra was also a Maithila Brāhmaṇa, being the son of Bhavanātha and Bhavānī, and wrote a number of works in Nyāya-Vaiśeṣika, Vedānta, Sāhitya, &c. His works may be classified as below:

A.—In Nyāya-Vaiśeṣika:—

(a) Commentary on Kaṇāda's Sutras, called Upaskāra.

(b) Commentary on Praśastapāda's Padārtha Dharma Saṁgraha, called Kaṇādarahasya.

(c) Commentary on Udayana's Ātmatattvaviveka, called Kalpalatā (herewith published).

---

* He is sometimes believed to have been a native of Bengal and is identified with Udayana Bhāduri. Anachronism stands in the way of this theory being accepted as sound. Apart from this, we have attempted to show from internal evidence available in the pages of the Nyāyakusumāñjali and the Bodhanī by Varadarāja that Udayana was not a Bengali (see Introduction to Nyāya-Kusumāñjali-Bodhanī, pp vii–ix, Sarasvatī Bhavana Texts, No. 4).

(d) Com. on Udayana's Kusumāñjali, called Āmoda.
(e) Com. on Udayana's Trisūtrī-nibandha.
(f) Com. on Vallabha's Nyāyalīlāvatī, called Kaṇṭhābharaṇa.
(g) Com. on Gaṅgeśa's Chintāmaṇi, called Mayūkha.
(h) Vādivinoda.
(i) Bhedaratnaprakāśa.

B.—In Vedānta:—

(a) Com. on S'rī Harṣa's Khaṇḍanakhaṇḍakhādya.

C.—In Sāhitya:—

(a) Gaurī Digambara.
(b) Rasārṇava.

He is assigned to the end of the 15th Century.

Raghunātha S'iromaṇi, the author of Dīdhiti, 'the most learned commentary on Gaṅgeśa's Tattvachintāmaṇi, was a native of Bengal & lived in the 16th Century. He is said to have been the pupil of the great Vāsudeva Sārvabhauma, who spent his last days in the court of Pratāpa Rudra of Orissa. In Nyāya-Vaiśeṣika he was the author of commentaries, called Dīdhiti, on

(1) Kiraṇāvalī,
(2) Ātmatattvaviveka,
(3) Nyāyalīlāvatī, &
(4) Tattvachintāmaṇi,

and of an independent tract, viz. Padārthatattvavivechana. In Vedānta his commentary on Khaṇḍanakhaṇḍakhādya deserves special mention.

S'ri Rāma Tarkālaṅkāra, whose notes on the Dīdhiti are appended here, is probably to be identified with the father of Mathurānātha Tarkavāgīśa. It is not known whether he wrote any other work besides the

one which is presented to the public just now. He lived in the 17th Century A. D.*

II

The present edition of Âtmatattvaviveka with its commentaries is based upon the following Mss. and printed works:

(A)
MANUSCRIPTS

a) Text—

(i) Ms. marked as पुणा॰ पु॰. It belongs to the family collection of the great Naiyāyika of Benares, viz. Mahādeva Puntamkar. It is carefully corrected and bears marks of correction from the pen of Mahādeva himself. The Ms. is not dated, but is apparently of an earlier age than Puntamkar.

(ii) Ms. belonging to P. Babu Dikṣita Jaḍe. Generally correct. It is dated Saṃvat 1774 or 1717 A. D. सम्वत् १७७४ ज्येष्ठ शु॰ १॰ गुरुवार.

b) Dīdhiti by Raghunātha—

(i) Ms marked as पुणा॰ पु॰, belonging to Puntamkar Library. It is generally free from error. Leaves 1-11 missing. The date of transcription is Saṃvat 1672 or S'aka 1538 (= 1616 A. D.) शकाब्दः १५३८ आषाढ शु॰ १४ भौमे संवत् १६७२.

(ii) Ms .belonging to P. Lakṣmīdhara Pant Dharmādhikārī. It is correct, but contains only 88 leaves.

c) Kalpalatā by S'aṅkara Mis'ra—

(i) Ms. belonging to Puntamkar Collection. It is partly correct.

(ii) Ms. lent out by P. Gopāla Bhaṭṭa. Script Bengali. The Ms. is not dated but is apparently very old.

d) Ṭippaṇī by S'rīrāma Tarkālaṅkāra—

* For fuller particulars regarding these authors see the present writer's "History and Bibliography of Nyāya Vais'eṣika Literature" in the 'Sarasvatī Bhavana Studies' Vols. III and IV.

(i) Ms. belonging to the Govt Sanskrit Library, Sarasvatī Bhavana. It is a very rare work, but the Ms. is full of errors.

(ii) Ms. in possession of P. Dharmādhikārī. Correct. It extends to fol. 79 only.

(B)

PRINTED EDITIONS

The printed editions utilised, though rare, for collation have been those of P. Jadunātha Sārvabhauma and the Asiatic Society of Bengal. But as these are not very carefully done they have not been of great service in determining the right reading.

The present edition of the text and commentaries is entrusted to a young scholar, Pandit Rājeśvara S'āstrī Drāviḍa Nyāya Vaiśeṣikāchārya, whose sound knowledge of Logic, intellectual zeal and pain-staking habits are calculated to make the edition free from all those inaccuracies which till now have disfigured the text. That he has been doing his work creditably will be apparent from a comparison of the text now published with what was available. His annotations, too, it is believed, will prove useful. Though the work, together with a number of commentaries, had been taken up for publication by the Asiatic Society of Bengal long ago under the editorship of the late Mm. P. Vindhyeśvarīprasāda Dube & P. Lakṣmaṇa S'āstrī Drāviḍa and passed through 6 formes it was felt that its completion would require, at the rate of its present progress, no less than a score of years! The issuing of the present edition in these circumstances, it may be hoped, calls for no apology.

Sanskrit College, Benares. GOPINATH KAVIRAJ.

उपोद्घातः ।

अथ प्रक्रम्यतेऽयं बौद्धाधिकारापरपर्याय आत्मतत्त्वविवेको न्यायाचार्य्योदयनेन विगुम्फितः कल्पलतादीधितिभ्यां तथाच दीधितिटिप्पण्या समलङ्कृतो मुद्रापयित्वा प्रकाशयितुम् । अद्यत्वे बौद्धदर्शनस्य बहुलमधीतत्वात् तदीयप्रचाराधिक्यं विद्वत्स्वनुमीयते । तेन तन्मतनिरसनपरग्रन्थस्यापि समालोचनमावश्यकमित्यात्मतत्त्वविवेकस्य प्रकाशनेऽयमेवावसर इति निर्विवादम् । गुणगरिम्णा लेखप्रौढ्या च महनीयोऽप्ययं ग्रन्थो पठनपाठनादिसम्प्रदायबहिष्कृतो न तथा प्रसिद्धिमाप यथा युज्यते । तत्र सुसंस्कृतपुस्तकाभावः, विषयस्य दुरवगाहत्वं, बौद्धानामभावात् तन्मतालोचने तादृशाग्रहाभावः, अवैदिकमतमिति वेदाचारवतां तत्रोपेक्षणमिति चत्वार एव हेतवः । तेषु क्रमेण पुस्तकान्तरसंवादपूर्वकं ग्रन्थशोधनेन तत्प्रकाशनेन च प्रथमहेतोः, व्याख्यानसंयोजनेन मूलपङ्क्तिव्याख्यानवैशद्यं सम्पाद्य ग्रन्थकर्त्तुरभिप्रायस्योद्घाटनेन च द्वितीयहेतोरपसारणमुद्दिश्य समुद्यमोऽयं प्रारब्धः । तृतीयो हेतुर्मतिमान्द्यनिमित्तकः, असत्स्वपि बौद्धेषु तन्मतस्य बुद्धिविजृम्भणद्योतकत्वात् तत्फलकत्वाच्च परिशीलनमवश्यमेव कर्त्तव्यं कल्पितपूर्वपक्षसमालोचनस्यापि सिद्धान्तस्थापनार्थं विधेयत्वात् । चतुर्थो हेतुस्तु कुसंस्कारमूलक एव ।

तत्र खलु बौद्धानामात्मवादस्य नितरां विश्लिष्टत्वादात्मतत्त्वविवेके तेषामात्मविषयकविप्रतिपत्तीनां समुद्धरणं विमर्द्दनं च कृतम् । यद्यपि लौकायतिकादयो बहव एव पक्षा उदयनसम्मतात्मवादविरोधिनस्तथापि बौद्धानामेव तत्र प्रबलत्वाद् दुर्निग्रहत्वात् तत्सम्प्रदायस्य च व्यापकत्वात्तन्मतमेव प्राधान्येनाक्षिप्तमस्ति । क्षणभङ्गवादो विज्ञानवादः शून्यवादश्च महताऽऽटोपेन समुट्टङ्किताः । कुसुमाञ्जलिप्रकरणे तावच्चार्वाकादिनिरीश्वरमतानां विमर्शनं कृतम् । उदयनस्य प्रादुर्भावकाले सर्वत्रैव दार्शनिका धर्मविदश्च परस्परं विवदमाना आसन्निति वरदराजकृतायाः कुसुमाञ्जलिबोधिन्या उपोद्घाते सनाथतोऽस्माभिरा-

लोचितम् । प्रतिस्पर्द्धिभिराक्रान्तेषु तत्त्वेषु परमात्मतत्त्वमात्मतत्त्वं चेति तत्त्वद्वयमेव विशेषतः समाक्रान्तमासीत् ।

उदयनेनेव तत्पूर्वमपि काश्मीरकमहामाहेश्वराचार्येणोत्पलदेवेन (६००-६५०) सोमानन्दपादान्तेवासिनाऽभिनवगुप्तपादगुरुजनकेनेश्वरसिद्धिरजडप्रमातृसिद्धिरिति ग्रन्थद्वयं विनिर्मितम् । तदनन्तरं श्रीभाष्यकृद्रामानुजाचार्यस्य परमगुरुणा यामुनाचार्य्येणापि स्वनिबद्धे सिद्धित्रये चिदात्मन ईश्वरस्य च साधनं कृतम् । अर्वाचीननैयायिकेषु मैथिलो गङ्गेशोपाध्याय ईश्वरसाधकानुमानप्रणालीं स्फुटं निबबन्ध-सा च सर्वथैवोदयनपदाङ्कानुसारिणी, क्वचित् तु भाषायामपि ।

आत्मतत्त्वविवेके तावन्न्यायसरणिमनुसृत्यैवात्मस्थापनं कृतम् । न्यायनये तथा वैशेषिकनये चात्मनो नित्यत्वं विभुत्वं ज्ञानेच्छादिविशेषगुणगणसमवायित्वं च सिद्धम् । तत्र विशेषगुणानां त्वदृष्टवशादेव समवायः, स्वरूपज्ञानकृतात् तन्नाशात् तेषां सम्यगुच्छेदे चात्मनः स्वभावस्थितिरेव मोक्षः । सुखदुःखयोरपि विशेषगुणान्तःपातित्वान्मोक्षे तयोरभाव एव । ज्ञानाद्युदयासम्भवेन नित्यज्ञानाद्यनभ्युपगमेन नैयायिकानामात्मा, ज्ञानादिसमवाययोग्यत्वात् स्वभावतोऽजडोऽपि, जडकल्प एव । स तु नित्योऽपि विभुरपि नित्यज्ञानादिमतः परमेश्वराद् विलक्षणः । अजडप्रमातृसिद्धौ पुनरुत्पलदेवेन त्रिकदर्शनमतमनुगतम् । तत्रात्मनो विशुद्धसंविदात्मकत्वात् स्वभावतः परिच्छेदराहित्यात् परमेश्वरत्वेऽपि परिच्छेददशायां प्राणादीनां प्रमेयाणामवभासनपूर्वकं प्रमातृत्वेनाऽवस्थानाल्लब्धसङ्कोचजीवभावापत्तिः । प्राणादीनामवभासनं च विश्वक्रीडोल्लासननिमित्तमेव, तत्राऽपि तस्य स्वेच्छैव मूलम् । स्वातन्त्र्यापरपर्याया स्वेच्छाऽप्यात्मनः स्वरूपभूता नित्योदिता शक्तिः । तामाश्रित्य स्वतःशुद्धोऽपि चिदात्मा विश्वलीलामुद्घाटयन् देशकालाद्यात्मकं परिच्छेदं परिगृह्य मितशक्तिरणुभूतो जीवत्वमापन्नः । स्वरूपतश्च चिदात्मा प्राणादिभिः प्रमेयजातैरनिरुद्धत्वाद्विश्वनिर्भरितात्मकः अत एव पूर्णः स्वतन्त्रश्च । द्विविधोऽप्ययमात्मा प्रकाशात्मकत्वाद्भावाभावानां सर्वेषामेवाऽर्थज्ञानानां पर्यन्तभूमिः । परस्मादात्मनो जीवस्य कोऽपि भेदो नास्ति, उभयोरपि पौर्वापर्यानुसन्धातृत्वेन संविन्मात्रस्फुरणस्यैव स्वरूपत्वात् । अहम्प्रकाशस्य विश्वाभेदप्रत्यवमर्शरूपत्वात् स एव सर्व-

ज्ञानानां विश्रामभूमिरिति तस्माद् व्यतिरिक्तस्य जडस्य सत्त्वं न सम्भवति । एक एव परः प्रमाता स्वस्वातन्त्र्येण स्वस्मादभिन्नान् भावान् स्वस्मिन्नेवोद्भासयति विलापयति चेति तस्य स्वात्मस्थितिः कदापि च्युतिं नावहति । विमर्शाभावेन जडत्वप्रसङ्गाद् व्यवच्छिन्न-भ्रमाश्रयवशात् प्राणपुर्यष्टकप्रमातुर्जीवाख्यस्य मितात्मनो वेद्यत्व-मेव, न तु पारमार्थिकं प्रमातृत्वम् । तथापि स एव प्राणादिकृतानां सङ्कोचानामपसारणतः परप्रमात्रात्मक ईश्वरव्यपदेशभाक्, प्राणा-दीनामपि चित्प्रकाशात्मकत्वात् । ईश्वर एव स्वेच्छया पशुभूमिकां गृहीत्वाऽऽणवभावमुपगत इति जीवस्येश्वरस्वभावाभेदः । अनवच्छि-न्नप्रकाशानन्दमयपूर्णाहन्तास्फुरत्तामय एवेश्वरावभासः । तस्य नि-रोधः सङ्कुचितशक्तिकेन जीवेन कदापि न साध्यः । तथा सति जी-वस्य स्वसत्ताऽपि विलीयेत, अपरिच्छिन्नस्वशक्तिविकासाऽप्रथन-स्यैव जीवत्वात् । त्रिकदर्शनविदः स्वातन्त्र्यवादिनः । तत्रायं क्रमः—जडभावानां संविन्निरपेक्षं स्वतन्त्रं सत्त्वं नास्ति । ते च स्वभावतो-ऽसत्कल्पाः प्रकाशात्मकज्ञातुः सम्बन्धादेव सत्तावन्तः । अत एव केवला संविदेव स्वभावस्योच्छलत्वात् स्वकीयमायाशक्त्युल्लासि-तविश्ववैचित्र्ये जडत्वेन च वेद्यत्वेन वेदकत्वेन च स्वरूपाऽनति-रिक्तापि स्वरूपातिरिक्तेव स्फुरति । इदमेव तस्याः स्वातन्त्र्यम् । तच्च संयोजनवियोजनात्मकम् । एतद्विहाय जडस्य प्रकाशः कदा-ऽप्यनुभवपदवीं नारोहति । प्रत्यवमर्शस्येदमेव माहात्म्यं यदनेन स्वा-त्मन्यभिन्नतयावतिष्ठमानं विश्वमिदन्तयोद्भास्यते, तथोद्भास्यमानं तत् पुनः पराहन्तायां विलाप्य तत्राभिन्नं सम्पाद्यते । माया चात्म-नः शक्तिः, तस्मादभिन्नाऽपि तस्य स्वरूपगोपनात्मिका क्रीडामयी । तत एवेदं विश्वमख्यातिमयमाभाति, तत्र चिदात्मनो व्यतिरिक्तं कि-मपि कारणं न सम्भवति, प्रकाशस्वभावात्तस्मात्तस्य व्यतिरेकेऽप्र-काशमानतयाऽसत्त्वापत्तिप्रसङ्गात् । अत एव विश्वाभासनिर्मातृत्व-मेव चिदात्मन ईश्वरत्वमिति स्पष्टम् । इयं परा पारमेश्वरी शक्तिरे-

प्रमातुरादिभूतं स्वसंवेदनात्मकं तत्त्वम् । विविधविच्छिन्नज्ञाना-नां नीलादिप्रतीतीनां संयोजने वियोजने च पूर्वाऽपरादिकोटि-ष्वैक्यानुसन्धानस्येयमेवाऽऽधारभूता । संविदात्मके पूर्णाहन्तापरा-मर्शसारे प्रमातरि सर्वे पदार्था व्यवस्थिताः । सदा स्वतन्त्रस्य तस्य

सर्वत्रैवाऽनुसन्धानात्मकं व्यापकत्वमुपलभ्यते, जडस्य पुनर्विमर्शसाराानात्मकत्वेन नास्ति स्वातन्त्र्यं नापि व्यापित्वम् । संविदोऽभिन्नानामेव भास्यानां भासमानत्वाद्विश्वं जगत् संविदद्वयमयं चित्प्रकृतिकमिति न कोऽपि संशयाऽवकाशः ।

यामुनाचार्येण तु स्वनिर्मितात्मसिद्धिनिबन्धे विशिष्टाद्वैतसिद्धान्तं शठकोपनाथमुन्यादिभिः परिगृहीतं बोधायनटङ्कद्रमिडाचार्यादिभिश्च समुपबृंहितमाश्रित्यात्मनिरूपणं कृतम् । तत्र चात्मा स्वतस्सिद्धः—विशुद्धेन योगाभ्यासजनितप्रत्यक्षेणैव तस्य प्रकाशनं भवति । आत्मभावः पुनर्बोधोपाधिः । ज्ञानं तु ज्ञातुः स्वरूपप्रयुक्तमेव, अत एवात्मनो नित्यत्वात्तस्यापि नित्यत्वम् । स्वात्मावभासकं तत् संसारे चापवर्गे च सममेव तिष्ठति । सर्वकरणोपरमदशायामपि चैतन्यस्य सत्त्वं न छिद्यते, तेन हि चैतन्यमात्मनस्स्वभावत्वेन व्यपदिश्यमानं शास्त्रेषु दृश्यते । निश्चयसंशयादयस्तस्यैव प्रकारभेदाः । आत्मनश्चैतन्यधर्मत्वेऽपि तस्य विवेकात्मकस्फुटप्रकाशरूपस्फुरत्ताभावादुपपादनार्थमनुमानानामाप्तवचनानाञ्च संग्रहः क्रियते । परन्तु तस्यापरोक्षज्ञानोदयस्तु योगाङ्गानुष्ठानपूर्वकनिरोधाभ्यासजन्यसत्त्वोद्रेकसापेक्षः । वैशेषिकसम्मतो मोक्षस्त्वप्रामाणिकत्वेन विशिष्टाद्वैताचार्यैर्नाद्रियते । अत्यन्तलुप्तकार्यं वस्तु तत्कार्यजनने शक्तमिति न कुत्रापि दृष्टम् । नहि कश्चित्पदार्थस्स्वप्रकाशायासाधारणसजातीयान्तरापेक्षो दृष्टः । तथा चात्मनस्सिद्धिरनन्यापेक्षेति निर्विवादम् । आत्मनः प्रकारभूतश्चैतन्यमर्थविशेषसंसर्गाद्घटज्ञानादिरूपतां प्रतिपद्यते । घटज्ञानादयश्चैतन्यस्य दशाभेदाश्चेतयितुरात्मनो धर्मविशेषत्वात्तस्यापरोक्षाः । वैशेषिकनये यच्चैतन्यमात्मन आगन्तुकधर्मत्वेन निरूपितं तत्तु न समीचीनम् ।

सर्वत्रायमेव विश्वासः समुज्जृम्भते यत्सौगतास्सर्व एव देहाद्यतिरिक्तमात्मानं न मन्यन्ते स्मेति । एतन्मूलक एवोदयनस्य बौद्धमतनिरसनप्रयासः । प्रायः समुपलभ्यमानेषु बौद्धग्रन्थेषु नित्यात्मनस्सिद्धिर्न दृश्यत इत्युदयनस्य न कोऽपि दोषः । परन्तु केचिद् बौद्धास्सम्मितीया वज्जिपुत्तकाश्च पुद्गलवादिनो नित्यात्मनस्साधका आसन्नितीतिहासदृष्ट्या स्फुटमेव प्रतीयते । वज्जिपुत्तकाः पुरैव मूलसंघाद् भेदमापन्ना बभूवुरिति तेषां प्राचीनत्वे न सन्देहलेशः । संयुत्तनिकायनाम्नि(२५)

सुत्तपिटकान्तर्गतग्रन्थविशेषे भारहारसूत्राख्यं किमपि सूत्रमुपलभ्यते-तत्र भारतद्धारकतद्ग्रहणतत्त्यागरूपवस्तुचतुष्टयं सुष्ठु प्रतिपादितम्। भारस्य पञ्चस्कन्धात्मकतया व्याख्यातत्वात्तद्धारस्य पुद्गलत्वं स्कन्धाद्यतिरिक्तत्वञ्च स्पष्टमेव प्रतिभाति। तृष्णैव भारग्रहणम्, उपरमात्मकतृष्णाच्छेद एव तत्त्यागः। बुद्धघोषवसुबन्धुचन्द्रकीर्त्तियशोमित्रादिभिः सूत्रस्यास्य प्रकारान्तरेण व्याख्यातत्वेऽपि तात्पर्यं स्कन्धाद्यतिरिक्तात्मसिद्धिपरमेव भाति। न्यायवार्त्तिककृतोद्योतकरेणापि सूत्रमिदं नित्यात्मसिद्धिपरतयैव गृहीतम्।

अतिप्रत्नबौद्धसिद्धान्तानामपरिज्ञानेऽपि सुपरिचितानां तेषां ज्ञानमुदयनस्य सम्यगेवासीदिति तद्ग्रन्थावलोकनतः प्रतीयते।

* * * * *

आत्मतत्त्वविवेककारमधिकृत्य न किमपि विशेषतो वक्तव्यमस्ति। न्याये वैशेषिके च तन्त्रे स आचार्य्यत्वेन पूजार्ह इति नवीनैः सर्व्वैरेव विद्वद्भिः स्मर्य्यते, तस्य प्रामाण्यं सर्व्वैरङ्गीक्रियते च। तस्य मिथिलावास्तव्यत्वं सर्वथा सम्भाव्यते, तदनुकूला च लोकविश्रुता जनश्रुतिरपि। तद्रचितग्रन्थेषु साम्प्रतं न्याये वाचस्पतिकृताया न्यायवार्त्तिकतात्पर्यटीकायाः परिशुद्धिरात्मतत्त्वविवेको न्यायकुसुमाञ्जलिः, वैशेषिके च प्रशस्तपादभाष्यटीका किरणावली लक्षणावली च समुपलभ्यन्ते। स च तर्काम्बराङ्क (९०६) प्रमिते शकनृपाब्दे लक्षणावलीं निर्ममे इति खीष्टीयदशमशताब्द्या मध्यभागे प्रादुरासीत्।

कल्पलताकृत् शङ्करमिश्रस्तावद् भवानीभवनाथतनयो मैथिलो ब्राह्मणो न्याये वेदान्ते मीमांसायां काव्ये च कृतभूरिपरिश्रमः प्रसिद्धपाण्डित्य आसीत्। तेन वेदान्ते खण्डनखण्डखाद्यस्य व्याख्यातत्वेऽपि तस्य द्वैतवाद एव स्वरस आसीन्नाद्वैतवाद इति तद्ग्रन्थानां सूक्ष्मेक्षिकया पर्यवेक्षणेन स्पष्टं प्रतिभाति। तस्य भेदरत्नप्रकाशः *खण्डनादिमतदूषणपूर्वको द्वैतवादस्य स्थापनापरोऽपि मधुसूदनसरस्वतीनिर्मिताद्वैतरत्नरक्षाया उपजीव्यभूतः। तेन तर्कशास्त्रे कणादसूत्रोपस्कारन्यायलीलावतीकण्ठाभरणकणादरहस्यकुसुमाञ्जल्यामोदोदयनकृतत्रिसूत्रीनिबन्धव्याख्याचिन्तामणिमयूखवादिविनो-

न्यायाचार्यश्रीमदुदयनाचार्यविरचितः

आत्मतत्त्वविवेकः ।

ॐ नमो गणेशाय ।

तार्किकशिरोमणिरघुनाथकृता

आत्मतत्त्वविवेकदीधितिः ।

श्रीगणेशाय नमः ।

ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥ १ ॥
निर्णीय(१) सारं शास्त्राणां तार्किकाणां शिरोमणिः ।
आत्मतत्त्वविवेकस्य भावमुद्भावयत्ययम् ॥ २ ॥

श्रीरामतर्कालङ्कारभट्टाचार्यकृता

आत्मतत्त्वविवेकदीधितिटिप्पणी ।

श्रीकृष्णाय नमः ।

श्रीगोविन्दपदद्वन्द्वं प्रणम्य परमादरात् ।
हृदि कृत्वा च निखिलं सार्वभौमस्य सद्वचः ॥ १ ॥
आत्मतत्त्वविवेकस्य व्याख्यां दीधितिकृत्कृताम् ।
प्रकाशयति यत्नेन श्रीरामः सुधियां मुदे ॥ २ ॥

निर्णीयेति । तथा चाऽनेकशास्त्रसारनिर्णयाधीनमेवाऽऽत्मतत्त्व

(१) शिष्याणामुपग्रहाय स्वग्रन्थं प्ररोचयन् कीर्तये स्वस्याऽनुष्ठेयस्य च नामनी बोधय व्याख्येयग्रन्थप्रयोजनाभिधेयसम्बन्धेनैव स्वग्रन्थस्याऽपि तद्वत्तां सूचयति । निर्णीयेत्यादि । स रम् तात्पर्यम् । शास्त्राणाम्, आस्तिकनास्तिकप्रणीतानाम् । आत्मतत्त्वविवेकस्य, प्रकृते व्या ख्येयग्रन्थस्य । भावम्, अवक्तीभूतं तात्पर्यमाचार्यनिष्ठम् ।

613

स्वाम्यं यस्य निजं जगत्सु जनितेष्वादौ ततः पालनं
व्युत्पत्तेः करणं हिताहितविधिव्यासेधसम्भावनम् ।

दीधितिः ।

शिष्टा(१)चारपरम्परापरिप्राप्ताभिमतकर्मारम्भसमयकर्तव्यताकं कृतमिष्टदेवतानमस्कारं शिष्यान्(२) शिक्षयितुमादौ निबध्नाति, स्वाम्यमित्यादिना । ईशाय सार्वज्ञ्यादिशालिने, नमः । श्रूयते हि,

'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः(३) ।
तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥'

दीधितिटिप्पणी ।

विवेकस्य भावोद्घाटनसामर्थ्यमिति सूचितम् । परिप्राप्तेति कर्तव्यताविशेषणम् । निर्विघ्नसमाप्तिं विघ्नाभावं बोद्धिश्येत्यादिः । शिष्यान् शिक्षयितुमिति । एतदुपलक्षणम् । व्याख्यातृश्रोतृणामपि प्रासङ्गिकं मङ्गलमुद्दिश्येत्यपि द्रष्टव्यम् । ईशत्वं न स्वामित्वम्, स्वाम्यमित्यनेन तदर्थप्राप्तेरत आह । ईशायेति । तस्मादिति । तस्मा-

(१) ननु स्वाम्यमित्यादिपद्येनोपनिबद्धस्येश्वरनमस्कारस्य ग्रन्थारम्भसमये ग्रन्थकृतामाचरणमफलम्, तत्कर्तव्यतासाधकवेदस्याऽप्रचारात्, लौकिकप्रमाणस्याऽनवकाशात् । एवं तदुपनिबन्धनमप्यफलम्, तत्कथं विशेषदर्शिनामाचार्याणां तदाचरणं तदुपनिबन्धनं वा सङ्गच्छत इत्याशङ्कां परिहरति । शिष्टेति । शिष्टाचारपरम्परा, भ्रमाजन्यसमीहितकर्मारम्भकालीनपूर्वपूर्वसमाप्तिकामपुरुषीयनमस्कारादिरूपमङ्गलगोचरप्रवृत्तिपरम्परा, ततः परिप्राप्ता सिद्धा अभिमतकर्मारम्भसमयकर्तव्यता इष्टसमाप्तिसाधनीभूतकृतिविषयता यस्य तादृशमित्यर्थः । तत्सिद्धिश्च मङ्गलाचारः प्रारिप्सितसमाप्तिसाधनम्, समाप्तिकामनाधीनभ्रमाजन्याचारत्वात्, या भ्रमाजन्या यत्कामनाधीना कृतिः सा तत्फलसाधनं, तृप्त्यादिकामाभ्रान्तपुरुषीयतृप्त्यादिसाधनभोजनादिकृतिवदित्यनुमानात् । एकद्व्यादिराचारो भ्रममूलकोऽपि सम्भवतीति कथं मङ्गलाचारे भ्रमामूलकत्वावधारणमित्याशङ्कानिराकरणाय परम्परेति भणितम् ।–गदाधरः ।

(२) निबन्धनस्य निष्प्रयोजनत्वमाशङ्क्याऽऽह । शिष्यानिति । निबध्नाति, श्लोकेन बोधयति । पदस्यैव वाचिकनमस्कारत्वे प्रकृतश्लोके तदन्तर्भाव एवोपनिबन्धः ।

(३) ज्ञानमयं तप इत्यत्र ज्ञानमेव तपःशब्दवाच्यमित्यर्थः । तपसः सृष्टिहेतुत्वबोधके 'ऋतं च सत्यं चाऽभीद्धात्तपसोऽध्यजायत' इत्यादिवेदेऽपि तदेव तपःपदार्थः । यद्विषयकं श्रवणादिरूपज्ञानमेवाऽन्येषां तप इति केचित् ।–गदाधरः ।

RESEARCH INSTITUTE, MYLAPORE, MADRAS-4

भूतोक्तिः सहजा कृपा निरुपधि(१)र्यत्नस्तदर्थात्मक-
स्तस्मै पूर्वगुरूत्तमाय जगतामीशाय पित्रे नमः ॥१॥

दीधितिः ।

सर्वज्ञ इति सामान्यतः, सर्वविदिति च विशेषतः, ब्रह्म हिरण्यगर्भाख्यम् । स्मर्यते च,

'सर्वज्ञता तृप्ति(२)रनादिबोधः
स्वतन्त्रता(३) नित्यमलुप्तशक्तिः ।
अनन्तशक्तिश्च विभोर्विधिज्ञाः(४)
षडाहुरङ्गानि(५) महेश्वरस्य(६) ॥'

दीधितिटिप्पणी ।

ह्येतद्ब्रह्म जायते नाम च जायते (रूपं च जायते)* अन्नं च जायत इत्यर्थः । नामरूपमित्यत्राऽपि ब्रह्मेति सम्बध्यते, तथा च नामरूपं ब्रह्म शब्दात्मकं ब्रह्म जायत इति वाऽर्थः । पौनरुक्त्यादाह । सर्वज्ञेति । तथा च सर्वज्ञपदात् सामान्यधर्मप्रकारकं ज्ञानं लब्धं सर्ववित्पदाच्च तद्घटत्वादिविशेषधर्मप्रकारकज्ञानं लब्धमिति समुदायार्थः । सर्वज्ञत्वादिगुणशालिन ईश्वरपदाभिधेयत्वं श्रुतितः साक्षान्न लब्धमत आह । स्मर्यते चेति । सर्वज्ञत्वादिषड्गुणशालिनि स्मृत्येश्वरपदं सङ्केतितमिति भावः(७) । तृप्तिः भोजनाद्यभावजन्यदुःखाभाववत्ता । स्वतन्त्रता अप्रतिहतेच्छा । अलुप्तशक्तिः नित्यकृतिः । अनन्तेति । शक्तेः सर्वोपादानविषयत्वं सर्वविषयत्वं वाऽऽनन्त्यम् । अत्रैकैकविशेषणबलादेवेतरव्यावृत्तिसम्भवे षड्उपा-

(१) निरवधिः-पाठः ।

(२) स्वीयसुखेच्छावदन्यत्वम् । स्वमन्यत्वप्रतियोगी जीवः प्रसिद्धोऽत ईश्वरस्य प्रीतिरूपतृप्तिविरहेऽपि न क्षतिः ।-गदाधरः । (३) धर्माधर्मानधीनतेत्यर्थः । (४) विधिज्ञाः वेदतत्त्वविदः ।

(५) धर्मानित्यर्थः । (६) महेश्वरस्येति । ईशपदं त्वेतत्पर्याय एवेति भावः ।

* ( ) इति चिन्हितोंऽशः संशोधककाल्पतः । एवमग्रेऽपि बोध्यम् ।

(७) अथैवं सति 'जगतामीशाय जगज्जननानुकूलकृतिशक्तिमते'इति कथं शङ्करामिश्रः, एतन्मत एव 'जगज्जननानुकूलचिच्छक्तिमते'इति गुणातीतोऽपीत्यादिमणिकारपद्ये 'ईशः अमिति-

दीधितिः ।

इति । जगतां निखिल(१)शरीरिणाम् । पित्रे जनकाय । तथा च स्मर्यते 'पिताहमस्य जगतः' इति । पूर्वगुरुभ्यः कपिलकमलासनादिभ्य उत्तमाय, तेषामपि स एव जनक इति भावः । तस्मै(२) कस्मै इत्यपेक्षायामाह । स्वाम्यं यस्येत्यादि । आदौ सर्गादौ जनितेषु उत्पादितेषु जगत्सु यस्य निजं क्रियाद्यनपेक्षं(३) स्वाम्यम् ।

दीधितिटिप्पणी ।

दानमुत्कर्षाधिक्यबोधनाय । निखिलेति । सर्वद्रव्योत्पत्तिकरणाद्यभावात् शरीरिणामित्युक्तम् । तस्मै इति । यद्यपि जगतां पित्र इत्यस्मादेव कस्मायित्यपेक्षा नास्ति, तथाऽप्येतादृशसादृश्याभावे रूपकमनुपपन्नमिति पितृसाम्यमाह स्वाम्यमित्यादीति व्याख्येयम् । तत इत्यनेनैवाऽऽदित्वप्राप्तेराह । आदाविति । न च सर्गमध्येऽपि तादृशस्वाम्यमस्ति, अतः कथं सङ्कोच इति वाच्यम् । क्रियाद्यनपेक्षमित्य-

इत्युक्तः' इति च मथुरानाथश्च । अत्रोच्यते । ईशपदार्थस्यैकव्यक्तिकतया सर्वज्ञत्वादिकं जगज्जननानुकूलकृतिमत्त्वादिकं वा नेशपदशक्यतावच्छेदकम्, आकाशादिपदवदीशादिपदेऽपि निरवच्छिन्नैव शक्तिः, तत्पदाद्दष्टद्रव्यातिरिक्तद्रव्यत्वशब्दाश्रयत्वादिनेव सार्वज्ञादिजगत्कर्तृत्वादिनैवेशपदादपि बोध इत्याचार्यस्वारस्यात् । तदुक्तं द्रव्यकिरणावल्यामाचार्यैः, 'यः शब्दाश्रयस्तदाकाशमित्येवं शब्दाश्रयत्वमेवोपाधिः स्यात् । न । शब्दाश्रयत्वस्योपलक्षणतया तटस्थत्वात्, अयमसौ देवदत्त इत्येतदेतावत । अन्यथा शब्दगुणकमाकाशमिति सहप्रयोगो न स्यात्' इति । तथाऽपीशपदस्य निरवच्छिन्नशक्तिमत्त्वमुक्तग्रन्थान्न लब्धमिति चेन्न । शक्तिवादटीकायां हरिनाथतर्कसिद्धान्तेन 'एवंरीत्यैव गगनकालादिकशब्देऽपि हेतुहेतुमद्भावो बोध्यः' इत्युक्तत्वात् । एवं च तादृशतत्तद्धर्मप्रकारकशाब्दबोधं प्रति तत्तद्धर्मावच्छिन्नविशेष्यकनिरवच्छिन्नतत्तत्पदवाच्यतावगाहिज्ञानस्य हेतुत्वात् 'यः सर्वज्ञः' इत्यादिश्रुतावीश्वरस्य तादृशधर्मवत्तया लाभेऽपि तादृशधर्मावच्छिन्न ईशादिपदवाच्यत्वालाभात्तल्लाभायैव स्मृत्यनुसरणमिति मन्तव्यम् ।

(१) जगतामित्यत्र जगत्पदं न जन्यमात्रार्थकं, तथा सति घटादौ व्युत्पत्त्यादेर्बाधितत्वेनाऽभिमतग्रन्थासङ्गतेः, नाऽपि सुखसमवायिकारणतावच्छेदकतया सिद्धजातिविशेषावच्छिन्नो जीवस्तथा, तन्नोत्पत्तेरनन्वयादित्यतो व्याचष्टे । निखिलेति । आत्मनिरूपितस्य जनकत्वस्य बाधेऽपि विशेषणजनकत्वमादाय विशिष्टे तद्व्यपदेशसङ्गतिरिति । शरीरित्वं च स्वजनकादृष्टवत्त्वसम्बन्धेन विवक्षितम्, नाऽत ईश्वरसाधारण्यम् ।

(२) तस्मै प्रसिद्धायेति प्राचां व्याख्या यच्छब्दाकाङ्क्षानुपपत्तेरुपेक्ष्याह । तस्मै इत्यादि ।

(३) आदिना

'सप्त वित्तागमा धर्म्या दायो लाभः क्रयो जयः ।

दीधितिः ।

आत्मनामुत्पत्त्यभावेऽपि विशेषणस्य शरीरस्य तथात्वाद्विशिष्टस्य तथा व्यपदेशः । अपूर्वशरीरादिसम्बन्धरूपं तु जन्म न मुख्यो जन्यर्थः, न वा तावतापि स्वाम्यनिर्वाहः । पालनं रक्ष-

दीधितिटिप्पणी ।

स्य कृत्याद्यसमानकालीनार्थकत्वेन सर्गादावेवेशस्य सम्भव इत्यतः सङ्कोचस्योक्तत्वात्(१) । विशेषणस्येति । निखिलशरीरिणामित्यत्र शरीरस्य विशेषणत्वादित्यर्थः । तथा व्यपदेशः जनितत्वव्यपदेशः । जनितत्वं विशेषणद्वारा न वाच्यं, किन्तु साक्षादेवेत्यादिकं केषाञ्चिन्मतं दूषयति । अपूर्वेति । न मुख्य इति । जनेरुत्पत्तावेव मुख्यत्वात्, तथा च लक्षणा स्यादिति भावः । मन्मते तु जनेर्मुख्यार्थरक्षणम्, परम्परासम्बन्धेनोत्पत्तिमत्त्वं क्तप्रत्ययेन बोध्यत इति भावः । न च भवन्मते वा क्तप्रत्यये लक्षणा, मन्मते वा जनधातौ लक्षणेति समानमेवेति वाच्यम् । जनित इत्यत्र क्तप्रत्यये लक्षणाया भवन्मतेऽप्यावश्यकत्वात्, आश्रयत्वरूपेणाऽऽश्रयबोधने कर्मकृत्प्रत्ययस्य लक्षणास्वीकारात्, तथा चाऽऽवश्यकलाक्षणिक एव लक्षणा स्वीक्रियते, न तु जनेर्धातोरिति भावः। केचित्तु विशेषणस्य तथात्वाद्विशिष्टस्य तथा व्यपदेशो निरूढलक्षणया, निरूढलक्षणा च शक्तितुल्येत्येव नियामकमाहुः । अपूर्वशरीरसम्बन्धे निरूढलक्षणाया मुख्यतुल्यत्वे पदमुख्यत्वेऽपि न क्षतिरत आह । न वेति । विशेषणशरीरोत्पादकत्वेनैव पितुर्विशिष्टे यथेष्टविनियोगलक्षणस्वत्वस्य सत्त्वादिति भा-

प्रयोगः कर्मयोगश्च सत्प्रतिग्रह एव च ॥'

इत्यादिमन्वादिवचनोपात्तदायादिपरिग्रहः ।

(१) ननु शिवस्वं नाऽऽददीतेत्यादिप्रमाणबलाद्यदि दानादिजन्यं स्वत्वमीश्वरस्याऽङ्गीक्रियते तदा यथाश्रुतेऽपि अवच्छेदकावच्छेदेनाऽन्वयानुरोधात् सङ्कोचः सम्भवदुक्तिकः, अन्यथेदानीन्तनपतनद्रव्यविशेषे ईशस्य कृत्याद्यनपेक्षस्वत्वासत्त्वाद्बाध एव स्यादिति चेन्न । स्वत्वधारापत्तिवारणाय सजातीयस्वत्वं प्रति सजातीयस्वत्वस्य प्रतिबन्धकताकल्पनस्याऽऽवश्यकतया पूर्वस्वत्वसत्त्वे स्वत्वान्तरोत्पत्त्यसम्भवेन स्वत्वद्वयस्य स्वीकर्तुमशक्यत्वात्, शिवादेर्नित्यतृप्तस्येदं मम भवत्वितिस्वीकारासम्भवेन तत्र तदीयस्वत्वोत्पत्तेरसम्भवाच्च, शिवस्वमित्यादिव्यवहारस्य त्यागीयशिवनिष्ठविषयतानिरूपितविषयताश्रयत्वमादायैवोपपादनीयत्वात् । त्यज्यमानोपचारादौ स्वत्वाभावेऽपि तदीयत्वेन द्रव्ये स्वत्वावगाहिनी च्छा विसंवादरूपैव द्रव्यनिष्ठेऽन्यदीयस्वत्वे बाधितं शिवादिनिरूपितत्वमवगाहत इति कल्प्यते।

दीधितिः ।

णादि । व्युत्पत्तिः शब्दसङ्केतग्रहः । हितस्य विधिः कर्तव्यता, अहितस्य निषेधोऽकर्तव्यत्वम्, तयोः सम्भावनं ज्ञापनम् । उक्तिः श्रुत्यादिरूपा भूता यथार्था सहजा स्वाभाविकी । रागद्वेषभ्रमादिविरहेण सर्वस्या एव तदुक्तेर्यथार्थत्वात्, तादृूप्येणैव तस्य सिद्धेः । कृपा परहितेच्छा उपधिः स्वहितानुसन्धानं तच्छून्या, नित्यत्वात् । निरवधिरिति पाठे अवधिः सीमा तच्छून्या, नित्यत्वेन सर्वपुरुषीयसकलहितविषयकत्वात् । तदर्थात्मकः, तत् जन्माद्युक्तिपर्यन्तं अर्थः प्रयोजनं यस्य स एव आत्मा स्वरूपं यस्य स तथा ॥

दीधितिटिप्पणी ।

वः । शब्दसङ्केतेत्युपलक्षणम्, निर्म्माणकायमधिष्ठाय पटादिनिर्म्माणव्युत्पत्तिकरणमपि बोध्यम् । निषेध इति । इदं च व्यासेधपदार्थसंवर्णनम् । तच्छून्येति । जन्यतासम्बन्धेन तच्छून्यत्वं बोध्यम्, अन्यथा सर्वस्या एव कृपाया अधिकरणतासम्बन्धेनोपधिशून्यत्वादसङ्गत्यापत्तेः । अत एवोक्तम्, नित्यत्वादिति । तच्छून्यत्वं व्युत्पादयति । नित्यत्वेनेति । इदं च सर्वविषयत्वे हेतुः, प्रतिनियतविषयत्वनियामककारणाभावात्तस्याः सर्वविषयत्वमिति भावः ॥

श्रीशङ्करमिश्रविरचिता

आत्मतत्त्वविवेककल्पलता ।

श्रीगणेशाय नमः ।

संसारपटकुविन्दं जगदण्डकलशकुलालमीशानम् ।
सर्गप्रलयसितासितकुसुमस्रङ्मालिनं वन्दे ॥ १ ॥

प्रारिप्सितस्य निर्विघ्नं समाप्तिमुद्दिश्य (कृतं)* मङ्गलं शिष्यशिक्षायै निबध्नाति । स्वात्म्यमिति । तस्मै सर्वज-

* ( ) कल्पलतायामेतचिह्नान्तर्गतो ग्रन्थः पुस्तकान्तरसम्मतो न भवतीति सर्वत्र ज्ञेयम् ।

कल्पलता।

नप्रसिद्धाय। जगतामीशाय जगज्जननानुकूलकृति(१)शक्तिमते, नमः। वेदप्रामाण्यग्रहौपयिकमाप्तत्वं दर्शयितुं पितृत्वेन तं रूपयति। पित्र इति। अविप्रलम्भकायेत्यर्थः। पूर्वगुरूत्तमाय, पूर्वगुरवो मनुकापिलादयस्तेभ्य उत्तमायेत्यर्थः। तथा चेश्वर एव वेदवक्ता तदनुस्मर्तारः परं मन्वादय इति भावः। रूपकस्योपमाभेदत्वेन तन्निर्वाहाय पितृसाम्यमाह। स्वाम्यमिति। पितुरपि जनितेषु स्वाम्यम्, ईशस्यापि तथैव तेषु यथेष्टविनियोगाधिकार इत्यर्थः। निजमिति। स्वाभाविकमित्यर्थः। आदौ जनितेष्विति सम्बन्धः। तथा च जनकस्यापि जनकत्वमीश्वरस्य ध्वनितम्। अन्यदपि पितृसाम्यमाह। ततः पालनमिति। हितोपदेशतदाचरणादिना रक्षणमित्यर्थः। अन्यदपि पितृसाम्यमाह। व्युत्पत्तेरिति। यथा पिता अध्यापनादिना पुत्रान् व्युत्पादयति तथेश्वरोऽपि प्रयोज्यप्रयोजकदेहभेदमाश्रित्य प्राणिनो गवादिपदजाते पटादिनिर्माणे च व्युत्पादयतीत्यर्थः। साम्यान्तरमाह। हिताहितेति। (२)हितविध्यहितव्यासेधयोः सम्भावनं (प्रापणं) ज्ञापनमिति यावत्। हितविधिः स्वर्गकामो यजेतेत्यादिः, अहितव्यासेधो न कलञ्जं भक्षयेदित्यादिः, तदुभयमुपदिश्य ज्ञापयति। ननु कथमत्र विश्वास इत्यत आह। भूतोक्तिरिति। यथा पितुः पुत्रान् प्रति विधिनिषेधयोः सत्योक्तिस्तथेश्वरस्याऽपीत्यर्थः। स-

(१) नुकूल चेति–पुण० पु० पा०। (२)हिताहितयोः–इत्यधिकं कलिकातामुद्रितपुस्तके।

कल्पलता ।

स्यत्वे मानमाह । सहजेति । धर्मिग्राहकमानादाप्तत्वेनैव सिद्धेः । तथा च भ्रमप्रमादविप्रलिप्साविरहात् तदुक्तिः सत्येति भावः । ननु स्वप्रयोजनाभावात् कथं हिताहिते उपदिशेदित्यत आह । कृपेति । निरुपधिरेव परदुःखप्रहाणेच्छाऽस्ये(२)त्यर्थः । ननु साऽपि परं दुःखिनं दृष्ट्वा स्वस्मिन् दुःखोत्पत्तेर्भवति, न हीश्वरस्य दुःखमत आह । निरुपधिरिति । (अन्यथासिद्धिशङ्कारहितेत्यर्थः । यद्वा अनौपाधिकीत्यर्थः ।) उपधिः कारणं, तच्च नित्यत्वादेव नास्तीति स्वाभाव्यादेव तथेति भावः । न च तर्हि सुखिनमेव सर्वं सृजेदिति देश्यम् । अदृष्टसापेक्षत्वात् । यत्नस्तदर्थात्मकः, (तस्याः) कृपायाः अर्थः परदुःखप्रहाणं तदात्मको यत्नः । यद्वा तदर्थो जगत्प्रयोजनं, तदेवात्मा यस्य यत्नस्येत्यर्थः । यद्वा तत्पदेन हिताहितप्रवृत्तिनिवृत्ती उच्येते, ते अर्थः प्रयोजनं यस्य तदात्मकस्तद्रूप इत्यर्थः । अत्र सर्वत्र यस्येत्यावर्तनीयम् ॥

दीधितिः ।

प्रेक्षावतां(१) प्रवृत्तये प्रयोजनाभिधेयसम्बन्धानाह, इह-

(१) च्छा यस्ये-पुण० पु० पा० ।

(२) प्रथमत इह खल्वित्याद्यभिधानं प्रकृतग्रन्थगोचरप्रवृत्त्युपयोगितया सार्थकयति । प्रेक्षावतामित्यादि । प्रेक्षावताम्, प्रकृष्टफलोद्देशमन्तरेण शास्त्राध्ययनेऽप्रवर्तमानानामित्यर्थः । तथा च सामान्यतः सकलस्वज्ञानेऽपि न प्रवृत्तिरिति लभ्यते । आह, विशिष्य प्रतिपादयति । आकर्णयन्तीत्यन्तेन प्रथमवाक्येनैतद्ग्रन्थप्रयोजनत्वेन निःश्रेयसादेरलाभादाह । विविच्यत इत्यन्तेनेति । उक्तग्रन्थे त[illegible]मेव विविनक्ति । तत्रेत्यादि । तत्र, एतादृशग्रन्थे । अस्य प्रयोजनादिना सममन्वयः । सप्तम्यर्थः प्रतिपाद्यत्वम् । दुःखं जिहासव इत्यत इच्छाविषयतया दुःखहानरूपमोक्षलाभः । आत्मतत्त्वम्, शरीरादिभिन्नत्वम् । आत्मतत्त्वमत्र विविच्यत इत्यतस्तस्या-

इह खलु निसर्गप्रतिकूलस्वभावं सर्वजनसम्वेदनसिद्धं दुःखं जिहासवः सर्वे एव तद्धानोपायमविद्वांसोऽनुसरन्तश्च सर्वाध्यात्मविदेकवाक्यतया तत्त्वज्ञानमेव त-

दीधितिः ।

त्यादिना विविच्यत इत्यन्तेन । तत्र प्रयोजनमपवर्गः, अभिधेयमात्मतत्त्वम्, सम्बन्धो ग्रन्थात्मतत्त्वज्ञानापवर्गाणां हेतुहेतुमद्भावो ग्रन्थात्मतत्त्वयोर्ज्ञाप्यज्ञापकभावश्च । सुखमिवा(१)त्मगुणो दुःखमपि न हेयं, हेयं वा सुखविरोधितामात्रेण कामिनी सम्बुभुक्षोरिव

दीधितिटिप्पणी ।

विविच्यत इति । तत्राऽपि 'इह संसारे...एवमाकर्णयन्ति' इत्यन्तमवान्तरसम्बन्धः । अभिधेयस्य सम्बन्ध एवापेक्षित इति तमाह । ग्रन्थात्मतत्त्वयोरिति । सुखवदित्यादि । दुःखं जिहासव इत्येतावन्मात्रोक्तौ निखिलदुःखहानेच्छा प्राप्ता स्यात्, निसर्गेत्यादि किमर्थमत इत्थं प्रणालीति । अयमर्थः, आत्मगुणो दुःखं न हेयं सुखवत्, अन्यथा सुखमपि तथा स्यादत उक्तम्, प्रतिकूलस्व-

ऽभिधेयतया लाभः । विशिष्याऽभिधेयकथनं चैतद्ग्रन्थप्रतिपाद्यार्थेऽन्यतो ज्ञातत्वशङ्कानिवृत्तये, तच्छङ्काया एतद्ग्रन्थाधीनार्थज्ञाने सिद्धत्वशङ्कारूपतया प्रवृत्तिविरोधित्वात् । आत्मतत्त्वप्रतिपादकग्रन्थाध्ययनस्य सफलत्वज्ञानेऽप्यनिष्पन्नस्य प्रकृतग्रन्थे तादृशतत्त्वप्रतिपादकत्वग्रहस्य सम्पादनाय वा तदभिधानम् । ग्रन्थेति । हेतुहेतुमद्भाव इति । ग्रन्थात्मतत्त्वज्ञानयोर्हेतुभावः, अपवर्गस्य हेतुमद्भाव इत्यर्थः । ग्रन्थात्मतत्त्वज्ञानयोर्मिथो हेतुहेतुमद्भावस्तु न विवक्षितः, ग्रन्थात्मतत्त्वयोर्ज्ञाप्यज्ञापकभाव इत्यत एव तल्लाभात् । एवञ्च तत्त्वज्ञानमेव तदुपायमाकर्णयन्तीत्यतस्तत्त्वज्ञानस्य मोक्षहेतुत्वलाभः, आत्मतत्त्वमत्र विविच्यत इत्यतश्चात्मज्ञानस्य ग्रन्थहेतुकत्वलाभे ग्रन्थस्य तत्त्वज्ञानद्वारा हेतुत्वस्याऽर्थादेव लाभः । उपायप्रयोजनयोर्हेतुहेतुमद्भावग्रहस्त्विष्टसाधनताधीमुद्रया प्रवृत्त्युपयोगीति बोध्यम् । ग्रन्थापवर्गयोर्हेतुहेतुमद्भावलाभस्याऽऽर्थिकतया साक्षात्तदलाभात्साक्षाल्लभ्यस्तदुपपादको ग्रन्थात्मतत्त्वयोर्ज्ञाप्यज्ञापकभावसम्बन्ध उक्तः । तस्य चात्मतत्त्वमत्र विविच्यत इत्यत एव लाभो बोध्यः ।

(१) अपवर्गस्य स्वतःपुरुषार्थत्वमन्तरेणोक्तरीत्या ग्रन्थे सप्रयोजनत्वावधारणासम्भवात्तदुपपादनपरतया निसर्गेत्यादिविशेषणद्वयं व्याख्यातुकामः शङ्कामवतारयति । सुखमिवेत्यादिना । आत्मगुण इति । आत्मेति सम्पातायातम् । अत्र सुखवदात्मगुण इति टिप्पणीकृन्मतः पाठः ।

दुपायमाकर्णयन्ति, न ततोऽन्यम् । प्रतियोग्यनुयोगित-

दीधितिः ।

कामुकस्य गुरुजनसन्निधानम्, असदेव वा व्योमकमलिनीप्रसूनपूतिगन्धवदितिशङ्कात्रयनिरासाय निसर्गादि सिद्धमित्यन्तम् । अनुसरन्तः कोऽस्योपाय इति जिज्ञासवः । अध्यात्मवित् आत्मतत्त्वज्ञः । एकवाक्यता ऐकमत्यम्, कारणे कार्योपचारात् । एकं एकार्थप्रतिपादकं वाक्यं येषामिति वा । आकर्णयन्ति शब्दादवधारयन्ति ।

दीधितिटिप्पणी ।

भावमिति । इदमेव त्यागे कारणमिति भावः । ननु सुखविरोधितया दुःखे प्रातिकूल्यस्वभावः, तथा च यद्दुःखेऽसति सुखं जायते तद्वर्जनीयं स्यात्, सुखाविरोधि तु दुःखं कथं वर्जनीयमत उक्तम्, निसर्गेति । तथा च स्वभावत एव तत् प्रतिकूलमिति सर्वमेव वर्जनीयमिति भावः । यद्यपि निसर्गपदस्याद्यत्वात् तत्प्रयोजनमेवाऽग्रे दर्शयितुमुचितं, तथाऽपि विशेष्यस्य प्रयोजनकथनेनैव तत्कथनं निर्वहतीति व्युत्क्रमेण प्रयोजनमभिहितम् । अन्यथा कुत्र तद्दाने प्रयोजनं स्यात् । सर्वजनेत्यादेः प्रयोजनमाह । असदेवेति । असदेव अलीकमेव, दुःखं वर्जनीयं स्यादित्यर्थः(१) । इयं च बौद्धीयशङ्का । तथा च व्योमकमलवदित्येतावतैव सामञ्जस्ये आश्रयस्याऽऽत्मनोऽप्यसत्त्वबोधनाय प्रसूनेत्युपादानम्(२) । कारण इति ।(३) वाक्यस्य कारणे मतौ कार्यवाचकपदस्य एकवाक्यपदस्य लक्षणेत्यर्थः । ननु भिन्नानामेका मतिर्बाधिता, तथा चैकपदस्यैकार्थविषयत्वे लक्षणा वाच्या, एवं चैकपदे लक्षणाया आवश्यकत्वेऽलं वाक्यपदे लक्षणयेत्यतस्तथैवाऽऽह । एकमेकार्थेत्यादि । आकर्णनस्य श्रौत्रज्ञानस्य तत्त्वज्ञानविषयत्वासम्भवादाह । शब्दादित्यादि । अनुमानादिना तदनवधारणादुक्तम्, शब्दादिति । तथा च तत्त्वज्ञानमेवाऽसाधारणं वेदरूपशब्दादवधारयन्तीत्यर्थः ।

(१) तथा च दुःखस्य नित्यनिवृत्ततया तज्ज्ञानार्थं प्रवृत्तिरनुपपन्नेति भावः ।

(२) तथा च कस्यापवर्गार्थं प्रवृत्तिरिति भावः ।

(३) इदं प्रतीकमादर्शपुस्तके नास्ति, योग्यतामनुचिन्त्य कल्पितमेव ।

दीधितिः ।

तत्त्वज्ञानमेवेति । असाधारणमिति शेषः । तत्त्वज्ञानम् तत्त्वज्ञानविशिष्टकारणकलापमिति केचित् । काशीमरणादेः स्वातन्त्र्येण मोक्षहेतुत्वं निराकर्तु(१)मेवकारार्थं स्पष्टयति । न ततोऽन्यमिति । तत्त्वज्ञानस्य मोक्षहेतुत्वे आत्मन इति कुत इत्यत आह । प्रतीत्यादि ।(२) प्रतियोगितयानुयोगितया चेत्यर्थः । मतभेदेन चेदम् । तदुक्तम्,

'नैरात्म्यदृष्टिं मोक्षस्य हेतुं केचन मन्वते ।
आत्मतत्त्वधियं त्वन्ये न्यायवेदा(३)नुसारिणः ॥'

दीधितिटिप्पणी ।

ईश्वरस्याऽपि वेदे जनकत्वश्रुतेस्तत्त्वज्ञानमेवेत्यवधारणासम्भवादाह । असाधारणमिति । अन्वयप्रदर्शनार्थं(४) व्युत्क्रमनिर्देशः । असाधारणपदमपूरयित्वैव एवकारार्थरक्षकस्य मतमाह । तत्त्वज्ञानमिति । शब्दात्तथावधारणाभाव एव केचिदित्यस्वरसः । न ततोऽन्यमित्यादेर्वैयर्थ्यमाशङ्क्याह । काशीमरणादेरिति । स्वातन्त्र्येण तत्त्वज्ञानानपेक्षया । अन्यमितीति । अत्राप्यसाधारणमिति बोध्यम् । कुत इति । अहेतोरुपादानं कुत इत्यर्थः । मतभेदेन चेति । केषाञ्चिन्मते प्रतियोगितया केषाञ्चिन्मते चाऽनुयोगितया आत्मा तत्त्वतो ज्ञातव्य इत्यर्थः । तदेवाह । तदुक्तमिति । आद्यार्धे प्रतियोगितयेति अन्त्यार्धमनुयोगितयेति मते । नैरात्म्यदृष्टिमित्यादि । आत्मनः पारमार्थिकत्वेऽपि नैरात्म्यभावनं मोक्षहेतुरित्येतन्मतम्, यद्वक्ष्यति

(१) काशीमरणस्य साक्षान्मोक्षहेतुत्वे तदुत्तरमात्यान्तिकदुःखनिवृत्तिरूपमोक्षस्यैवोत्पादेन स्वरूपतस्तद्विरोधिनो दुःखमात्रस्यैव तत्कालमुत्पादासम्भवेन उद्बन्धनादिप्रतिषिद्धक्रिययाऽपि काशीमरण एव मुमुक्षुः प्रवर्तेत, न तु नियमतो नान्तरीयकदुःखजनके श्रवणादाविति शुश्रूषोरेवाभावात् ग्रन्थारम्भप्रयासवैफल्यवारणाय काशीमरणस्य साक्षान्मोक्षहेतुत्वं निराकृतम् । एवं च सति ज्ञानद्वारैव तस्य मोक्षहेतुत्वात् काशीमृतस्यापि कर्मफलोपभोगसम्भवेनोद्बन्धनादिना मरणे भैरवयातनादिफलभयादेव न प्रवृत्तिरित्युपपद्यते । न च तथाप्यनर्थाननुबन्धिनि कालाधीनकाशीमरणे श्रवणादिपरिहारेण कथं न प्रवृत्तिरिति वाच्यम् । शक्रविहितकामादिबहूपसर्गवत्यां काश्यां तस्यानैकान्तिकतया सद्योमोक्षप्रदविज्ञानोपाये हस्तगते श्रवणादावेव बुद्धिमतां प्रवृत्तेरावश्यकतया ग्रन्थारम्भवैफल्यासम्भवादिति भावः ।

(२) प्रतियोगीत्यादि—पाठः । (३) न्यायतत्त्वा-कलि० मु० पु० पा० ।

(४) एकवाक्यतयेत्यस्याकर्णयन्तीत्यनेनेत्यादिः । वेदजन्यज्ञानेऽप्रामाण्यशङ्कापरिहारस्तत्प्रयोजनम्

दीधितिः।

इति। सर्व एव हि भोगभाजं(१) स्थिरतरमात्मानं मन्वानाः सुखादिकं कामयन्ते, यदाहुः,

'सुखी भवेयं दुःखी वा माभूवमिति तृष्यतः।
यैवाहमिति धीः सैव सहजं सत्त्वदर्शनम् ॥'

इति। सत्त्वम्(२) आत्मा। कामयमानाश्च सुखादिकं विहितं निषिद्धं वा साधनम(३)स्यानुतिष्ठन्तः कर्माशयानाचिन्वाना(४) जन्मादिकमनुभवन्ति, यदि पुनरमी किमपि नाहम्, नाहमास्पदमास्ति किञ्चिदपि वस्तु स्थिरम, विश्वमेव क्षणभङ्गुरमलीकं वेत्यवधारयेरन्, न किञ्चिदपि कामयेरन्, न चाकामयमानाः केचि-

दीधितिटिप्पणी।

जाञ्जलिकैर्निर्विषीकरणमिवेत्यादिना(५)। न चात्मनोऽसत्त्वमेव तथा, तथा सत्यात्मैव तत्त्वतो ज्ञेय इत्यस्याऽसङ्गत्यापत्तेः। नैरात्म्यदृष्ट्यामेव मानमाह। सर्व एव हीति। हि यस्मात् सर्व एव जना भोगभोजिनमात्मानं स्थिरतरं मन्यमानाः ममात्मा पश्चादपि वर्तिष्यते एवं मन्यमाना एव भाविसुखादिकामनया संसारे प्रवर्तन्ते, न त्वस्थिरं मन्यमानाः प्रवर्तन्त इत्यर्थः। अस्थिरत्वनिर्णये केषामप्यप्रवृत्तेः(६) सुस्थिरं मत्वैव कामयन्त इत्यर्थः। अत्र साधकमाह। यदाहुरिति। भवेयमिति। अहमुत्तरकाले सुखवान् भविष्यामीति ज्ञानं स्वस्य स्थिरत्वज्ञानपूर्वकमेवेत्यर्थः। इति तृष्यतः इतीच्छावतः पुरुषस्य याऽहमिति धीः सैव सहजं प्राकृतिकं अभ्रमात्मज्ञानमिति। ननु सुखादिकं कामयन्त इत्यादिना किमायातमत आह। कामयमानाश्चेति। सर्वत्र (सर्व) एव हीति विशेष्यम्। अस्य सुखादेः। कर्माशयान् धर्माधर्मान्। आचिन्वानाः चयं कुर्वाणाः। अस्थिरत्वभावनोपयोगमाह। यदीति। यदि पुनरमी जना इत्यवधारयेरन् तदा कामनां न कुर्वीरन्नित्यर्थः। तदा किं स्यादित्याह। न चेति। तदाऽपि

(१) भोगभाजः- पाठः। (२) सत्त्वः-पाठः। (३) विहितनिषिद्धं साधनम्—पाठः।
(४) अनुतिष्ठन्तो धर्माधर्मानाचिन्वानाः-पाठः। (५) मूलकृदाचार्य इति शेषः।
(६) फलानुपधाननिश्चयद्वारा नैरात्म्यदृष्टिः प्रवृत्तेः परिपन्थिनीति भावः।

दीधितिः।

दपि(१) प्रवर्तन्ते, न चाप्रवर्तमाना अपि कर्माशयेन सीव्यन्ते,(२) न चान्तरेण कर्माशयं सम्भवो भोगस्येति भवति नैरात्म्यदर्शनं साधनमपवर्गस्येति केचित्। अपरे पुनरनादिनिधनमात्मानं न्यायादिना निर्णयन्तस्तदीयं तत्त्वज्ञानमेव न्यायागमाभ्यां मोक्षहेतुमाचक्षत इति। अभावज्ञाने प्रतियोगिज्ञानस्य हेतुत्वात्

दीधितिटिप्पणी।

किमत आह। न चाप्रवर्तमाना अपीति। सीव्यन्ते युज्यन्ते। न चाप्रवर्तमानस्याऽपि पुरुषस्यान्यकृत्यधीनगङ्गाजलसंयोगादिना कर्माशयोत्पत्तिरिति व्यभिचार इति वाच्यम्। एतन्मते तादृशपुरुषस्यान्यकृत्यादिना कर्माशयानुत्पादात्, अस्मन्मते तत्त्वज्ञानिनामिव। केचन मन्वत इत्यस्यार्थकथनं केचिदिति। इदानीमुपदर्शितश्लोकस्य शेषार्धव्याख्यामाह। अपरे पुनरिति। तत्राऽन्यशब्दोपादानादत्रापि तत्पर्यायापरशब्देनोपात्तम्(३)। अनादीत्यादिना स्थिरत्वकथनम्। न्यायवेदानुसारिण इत्यस्य व्याख्या न्यायागमाभ्यामित्यादिः। तदीयं तत्त्वज्ञानम् तदनुयोगिकमितरभेदज्ञानमित्यर्थः। तच्च आत्मा इतरेभ्यो भिद्यत इत्यादिरूपमित्यनुयोगितयात्मज्ञानं भवति कारणमिति भावः। आद्यमतीयप्रतियोगितयेत्यत्र व्याख्यामाह। अभावेति। न च तन्मतकथन एवेदमुचितमिति वाच्यम्। प्रतियोगीति मूलस्य यदा व्याख्यातं तस्यैव प्रयोजनस्योक्तत्वात्?। न चात्माभावरूपतत्त्वज्ञाने प्रतियोगिनो विषयतया तेनैव तत्त्वतो ज्ञेय इत्यत्र हेतोः सङ्गतत्वं, तत कथमिदं विहाय कारणीभूतज्ञानविषयतयास्य ज्ञेयत्वमानीतमिति वाच्यम्। तन्मतेऽभावज्ञानस्यालीकविषयत्वात्तत्त्वतो ज्ञेय इत्यनुपपत्तेस्तथाभिधानम्। यद्यपि तन्मतेऽभावज्ञानहेतुप्रतियोगिज्ञानस्यापि सविकल्पकतयालीकविषयत्वमेव, तेषां निर्विकल्पकस्यैव सद्विषयत्वात्, तथाप्यत्र प्रतियोगिज्ञानपदेन मूलीभूतनिर्विकल्पकमेवोक्तमि-

---

(१) किञ्चिदपि—पाठः। (२) बध्यन्ते,—पाठः।

(३) परे पुनरिति। तत्राऽन्यशब्दोपादानादत्रापि तत्पर्यायपरशब्देनोपात्तम्—इत्यादर्शपुस्तके पाठः।

या चात्मैव तत्त्वतो ज्ञेयः । तथाहि, यदि नैरात्म्यं(१) यदि वात्मास्ति वस्तुभूतः, उभयथापि नैसर्गिकमात्म-

दीधितिः ।

प्रतियोगितयेत्यभिहितम् । परे तु आत्मनः शरीरादिभिन्नत्वस्येव शरीरादेरात्मभिन्नत्वस्यापि ज्ञानं मोक्षहेतुरिति तथोक्तमित्याहुः । नन्वासंसारमनुवर्तमानोऽस्त्येव सर्वेषामहंप्रत्ययसन्तानो न पुनरपवर्गवार्तेत्यत आह । तथाहीत्यादि । वस्तुभूतः देहादिभिन्नोऽनादिनिधनो ज्ञानादिमान् । नैसर्गिकम् गौरोऽहमित्याद्याकारकमनादिदेहाभेदवासनासम्भूतम्, आत्मज्ञानमतत्त्वज्ञानमेव, असत एवात्मनो भानात्, देहाभेदावगाहनाच्च । देहसम्भेदानवगाहि च कादाचित्कमहं सुखीत्यादिकं तत्त्वज्ञानं बलवता मिथ्याज्ञानसन्तानेन तिरस्कृतत्वान्न कार्यक्षममिति भावः ॥

दीधितिटिप्पणी ।

ति । एवं च हेतुत्वादित्यस्य प्रयोजकत्वादित्यर्थः । तथोक्तम् प्रतियोगितया चोक्तम् । परे त्वित्यनेन तादृशज्ञानस्य मननरूपतया न तत्त्वज्ञानपदार्थतेत्यस्वरसो दर्शितः । नन्वित्यादि । तथा चान्वयव्यभिचार इत्यर्थः । तथा हीत्यादिमूलस्यायमर्थः, नैरात्म्यवादिमते नैयायिकमते च नैसर्गिकं गौरोऽहमित्यादिकमात्मज्ञानमतत्त्वज्ञानमेव, तथा च नान्वयव्यभिचार इति भावः । वस्तुभूत इत्यस्यैवार्थकथनं ज्ञानादिमानितिपर्यन्तम् । सम्भूतपर्यन्तं नैसर्गिकमित्यस्य व्याख्या । अतत्त्वज्ञानमेवेत्यत्र हेतुः, असत एवेति । नैरात्म्यवादिमते गौरोऽहमित्यादावलीकात्मन एव विषयत्वात् । द्वितीयमते(२) त्वाह । देहेति । ननु देहासम्भिन्नात्मज्ञानसत्त्वे कुतो न मोक्ष इत्यत आह । सम्भेदानवगाहि चेति । मिथ्याज्ञानम् अभेदभानम् । तिरस्कारः प्रतिबन्धः । कार्यम् अपवर्गः । वस्तुतोऽहं सुखीत्यादिकमपि ज्ञानं देहाभेदावगाह्येव, अत एव पश्वादिभिन्नाविशेषादिति शारीरकभा-

(१) नैरात्मं-पुण० पु० पा० । (२) द्वितीयमाते—इत्यादर्शपुस्तके पाठः ।

ज्ञानमतत्त्वज्ञानमेवेत्यत्राप्येकवाक्यतैव वादिनामत आत्मतत्त्वं विविच्यते ।

दीधितिटिप्पणी ।

त्यम् । श्रवणमननादिजन्यात्मज्ञानमेव तत्त्वज्ञानमिति हि परमार्थः ॥

कल्पलता ।

प्रेक्षावत्प्रवृत्त्यर्थमभिधेयं(१) प्रयोजनं च दर्शयति । इहेति । इह ग्रन्थे,आत्मतत्त्वं विविच्यते इति सम्बन्धः । यद्वा इह संसारे, तत्त्वज्ञानमेव तदुपायमाकर्णयन्तीति सम्बन्धः । नन्वात्मतत्त्वविवेकस्यासुखत्वाददुःखाभावत्वाच्च न पुरुषार्थत्वमतः कथं तदर्थिनोऽत्र प्रवर्तन्तामत आह । तदुपायमिति । दुःखहानोपायमित्यर्थः । पुरुषार्थसाधनत्वादात्मतत्त्वविवेकोपि पुरुषार्थ एवेति भावः । भवेदेवं यदि दुःखहानमपि (मुख्यः) पुरुषार्थो भवेत्, न त्वेवम्, सुखेच्छया तत्र वृत्तेरत आह(२) । निसर्गप्रतिकूलस्वभावमिति । अतः स्वरसत एव तद्धानेच्छेत्यर्थः । ननु दुःखमपि सुखाभावान्नान्यदित्यत आह । सर्वजनेति । सर्वजन(प्रतीति)साक्षिकं तदित्यर्थः । आत्मानमधिकृत्य प्रवर्तत इत्यध्यात्मं शास्त्रम् । एकवाक्यता ऐकमत्यम् । तथा च सर्वतान्त्रिकसिद्धं तत्त्वज्ञानस्य मोक्षोपायत्वमित्युक्तम् । तथाप्यनपेक्षिताभिधानं माभूदत उक्तम्, अनुसरन्तश्चेति । मोक्षोपायमनुसन्दधाना इत्यर्थः । अनुसरणं प्रति हेतुः,—अविद्वांसः ।(३) अहिकण्टकादिदुःखहानोपायविद्वत्ता-

(१) प्रेक्षावत्प्रवृत्त्यङ्गमभिधेयं—पाठः । (२) तत्प्रवृत्तेरत आह—पाठः । तत्र प्रवृत्तेरत आह-पुण० पु० पा० । (३) अविद्वांस इति । —पुण० पु० पा० ।

कल्पलता ।

यामप्यात्यन्तिकदुःखहानोपाये न वैदुष्यमिति भावः । आकर्णयन्तीति श्रौतं ज्ञानमभिप्रैति(१)। तच्च 'आत्मा वा अरे श्रोतव्यः' इत्याद्युपनिषदां श्रवणात् । एवकारेण लभ्यमप्यन्ययोगव्यवच्छेदं काशीमरणादेः स्वातन्त्र्येण मोक्षोपायत्वशङ्कां निराकर्तुं पुनराह । नान्यदिति ।(२) यद्वा उपायमेव तत्त्वज्ञानमिति विशेषणसङ्गत एव(वायमे)वकारस्तत्त्वज्ञानार्थिप्रवृत्ति(३)वैफल्यशङ्कानिरासाय । ननु भवतु तत्त्वज्ञानं मोक्षहेतुस्तथाप्यात्मतत्त्वं किमिति विविच्यत इत्यत आह । आत्मैव तत्त्वतो ज्ञेय इति । ननु बौद्धा नैरात्म्यज्ञानं तत्त्वज्ञानमाहुः, तथा च कथमेकवाक्यतेत्यत आह । प्रतियोग्यनुयोगितयेति । तेषामपि प्रतियोगितया आत्मतत्त्वं ज्ञाने(४) स्फुरतीति मतं यत इति भावः । यद्वा यथा देहेन्द्रियादिभ्य आत्मा भिन्न इति तत्त्वज्ञानं तथात्मनः शरीरादिकं भिन्नमित्यपि तत्त्वज्ञानं देहेन्द्रियादिहानौपयिकमेवेति दर्शयति । प्रतियोगीति । नन्वहं गौर इत्यादिप्रकारकमात्मज्ञानमयत्नसिद्धमेवेत्यत आह । नैसर्गिकमिति । स्वाभाविकम् अयत्नसिद्धमिति यावत्, अहं सुखीत्यादिप्रकारकात्मज्ञानस्य तत्त्वज्ञानत्वेपि(५) न मिथ्याज्ञाननिवर्तकत्वमतस्तदन्यतत्त्वज्ञानमेवेति भावः। ननु नैरात्म्यवादिनां शरीरेऽहंप्रत्यय-

(१) अभिप्रेतं—पु० पु० पा० ।

(२) नान्यदिति ।—इति पाठमनुसृत्य व्याख्यातम् । नान्यमिति ।—पुण० पु० पा० ।

(३) तत्त्वज्ञानार्थे प्रवृत्ति—पाठः ।

(४) आत्मतत्त्वज्ञानं—पाठः । आत्मतत्त्वज्ञाने—पुण० पु० पा० ।

(५) प्रकारकात्मतत्त्वज्ञानस्यत्वेपि—पुण० पु० पा० ।

कल्पलता ।

स्तत्त्वज्ञानमेवैतद्यत उक्तम्, यदि नैरात्म्यमिति । अयत्नसिद्धत्वात् तेषामप्येतादृशं ज्ञानमनादेयमित्यर्थः । आत्मतत्त्वं विविच्यत इति । शरीरादिभ्यो नित्यः सुख(१)ज्ञानादिगुणवानात्मा विवेकेन भेदेनोपदर्श्यत इत्यर्थः ॥

तत्र बाधकं भवत्(२) क्षणभङ्गो वा(३) बाह्यार्थभङ्गो वा(४) गुणगुणिभेदभङ्गो वा अनुपलम्भो वेति ।

दीधितिः ।

सति च बलवत्तरबाधकप्रमाणे साधकसहस्रस्याप्यकिञ्चित्करत्वात् तदेवादौ निरस्यति । तत्रेत्यादिना । क्षणभङ्गेत्यादौ भङ्गपदं(५) भङ्गसाधकमानपरमिति वदन्ति ॥

दीधितिटिप्पणी ।

तदेव बाधकमेव । स्वरूपतो भेदस्याबाधकत्वादाह । भङ्गपदमिति । भङ्गसाधकेति । तथा च तादृशमानाद्भङ्गार्थसिद्धिरेव स्थिरत्वे बाधः, बाह्यार्थभेदभङ्गसिद्धिर्गुणगुणिभेदभङ्गसिद्धिश्च ज्ञानसुखाद्याश्रयात्मबाधः । वस्तुतस्तु(६) ज्ञायमानकरणतामते तादृशभङ्ग एव बाधकमिति यथाश्रुतमेव सम्यक् ॥

---

(१) नित्यसुख—पाठः ।

(२) अयमेव पुणतामकरसम्मतः प्रकृतानुगुणश्च पाठः । तत्र बाधकं भवदात्मनि—कालि० मु० पु० पा० । तत्रात्मनि बाधकं भवत्—इति पाठो मथुरानाथसम्मतः ।

(३) क्षणभङ्गो वा स्यात्—पुण० पु० पा० । (४) बाह्यात्मभङ्गो वा—पाठान्तरं पुण० पु० ।

(५) अयमेव टिप्पणीकृन्मतः पाठः । भङ्गत्रयं—इति त्वन्यसम्मतः ।

(६) वदन्तीत्यनेन सूचितमस्वरसं प्रकटयितुमाह । वस्तुतस्त्विति । न च ज्ञायमानकरणतामतेपि स्थैर्याद्यभावस्यैव क्षणभङ्गादिरूपतया साध्याविशेषेण क्षणभङ्गादेः स्थैर्याद्यभावसाधकत्वरूपस्थैर्यादिबाधकत्वानुपपत्तिरिति वाच्यम् । ध्वंसाप्रतियोगित्वरूपस्थैर्यस्याभावानुमाने क्षणिकत्वस्य हेतुत्वेनैव तस्य साध्याविशेषाविरहात् । एतादृशस्थैर्यस्य च तन्मते ध्वंसेऽलीके वा प्रसिद्धेः, तन्मते ध्वंसस्याप्यनन्तत्वाभ्युपगमात् ।

कल्पलता।

बाधनिरासमन्तरेणोच्यमानमप्यात्मनि प्रमाणमतन्त्रमेवातो विशिष्ट(१) आत्मनि बाधकमाशङ्क्य निराचष्टे । तत्रेति । नैरात्म्यवादिनामस्मदभिमतात्मनि बाध(२)कान्येतान्येवेति क्रमशो(३) निरसनीयानि, वेदान्तिनोऽप्यापाततो नैरात्म्यवादिन एवेति तन्मतमपि दूष्यत एव(४), तथा च श्रुतिभ्यः समधिगते(५)ऽप्यात्मनि सङ्कसुकतानिवृत्तये(६) न्यायः प्रवर्तनीयः, स च बाधनिरासमन्तरेण नाङ्गं(७) धारयतीति प्रथमं बाध(क)निरासारम्भ इति भावः। क्षणभङ्गादिपदं च तत्साधकप्रमाणपरम्। तत्र क्षणभङ्गे नित्यत्वभङ्गः। बाह्यार्थभङ्गे ज्ञानभिन्नात्मनोऽसिद्धिः। बाह्यत्वं च ज्ञानभिन्नत्वमेव(८)। गुणगुणिभेदभङ्गेऽपि तथा(९)। अनुपलम्भे तु स्वरूपस्यैवासिद्धिः । शरीरादिभिन्नात्माननुभवश्चात्रानुपलम्भः।

दीधितिः।

क्षणभङ्गे विमतिपत्तिः। शब्दादिः क्षणिको न वा। क्षणिकत्वं च स्वाधिकरणसमयप्रागभावाधिकरणक्षणानुत्पत्तिकत्वे सति

दीधितिटिप्पणी।

तैः शब्दादेरेव पक्षीकरणात् शब्दादिरित्युक्तम्। स्वाधिकरणेत्या-

---

(१) विशिष्य—पुण० पु० पा०। (२) दभिमतात्मबाध—पाठः।
(३) तान्येव भागशो—पाठः। (४) तन्मतमपि दूष्यमेव—पुण० पु० पा०।
(५) समवगते—पाठः। (६) अस्थिरतानिवृत्तय इत्यर्थः।
(७) स च न बाधकनिरासमन्तरेणाङ्गं— कालि० मु० पु० पा०।
(८) बाह्यं च ज्ञानभिन्नमेव—पुण० पु० पा०।(९) ज्ञानभिन्नात्मनोऽसिद्धिरित्यर्थः।

दीधितिः।

कादाचित्कत्वम्, उत्पत्तिमत्त्वं वा। उत्पत्तिश्च स्वाधिकरणक्षणावृत्तिप्रागभावप्रतियोगिक्षणसम्बन्धः। क्षणश्च स्वाधेयपदार्थप्रागभा-

दीधितिटिप्पणी।

दि। तत्क्षणस्थस्य द्विक्षणावस्थायित्वे स्वाधिकरणद्वितीयक्षणप्रागभावाधिकरणाद्यक्षणोत्पत्तिकत्वान्न यथोक्तरूपतेति क्षणमात्रस्थायित्वसिद्धिः। समयपदं कालिकसम्बन्धेनाधिकरणतालाभाय, अन्यथा विषयतया ज्ञानाधिकरणानागतघटादिप्रागभावाधिकरणक्षणोत्पत्तिकतया क्षणिकत्वेपि ज्ञानस्य यथोक्तरूपता न स्यात्। तादृशप्रतियोगिकप्रागभावाधिकरणमहाकालाद्युत्पत्तिकत्वस्योत्पत्तिमन्मात्रवृत्तित्वादप्रसिद्धिरिति क्षणपदम्। नित्यव्यावर्तनाय कादाचित्कत्वम्। न च प्रागभाववदेव भावाः स्युरित्यर्थान्तरं तवैव स्यादिति वाच्यम्। जन्यभावस्य प्रागभावसादृश्यवत्त्वे बाधात्, न हि जन्यो भाव उत्पत्त्यभाववान् विनश्येत्, तथा सति जन्यभावत्वस्यैवासत्त्वात्। यदि च तथाप्यर्थान्तरत्व(१)शङ्का तदाऽऽह। उत्पत्तिमत्त्वं वेति। नन्वत्र विशेष्यदलस्था उत्पत्तिः स्वाधिकरणसमयध्वंसानधिकरणसमयसम्बन्धरूपा वक्तुं न शक्यते, वक्ष्यमाणमहाप्रलयप्रसिद्ध्यसङ्गतत्वापत्तेः, तादृशध्वंसाप्रसिद्धेरत आह। उत्पत्तिश्चेति। सत्यन्तदलप्रविष्टोत्पत्तिस्तु स्वाधिकरणसमयध्वंसानधिकरणेत्यादिरूपैव, क्षणाप्रवेशेन लाघवात्, न तु निरुक्तोत्पत्तिरपि तत्र निवेशिता, तथा सति क्षणिकत्वलक्षणे क्षणपदस्यासत्प्रयोजनत्वापत्तेः। तथाहि, उत्पत्तिलक्षणे क्षणनिवेशने स्वाधिकरणसमयप्रागभावाधिकरणं यत् स्वाधिकरणक्षणावृत्तिप्रागभावप्रतियोगिक्षणरूपं तत्सम्बन्धाभाव इत्यस्यैव सम्यक्त्वात्। स्वाधिकरणसमयध्वंसानाधिकरणेत्याद्युत्पत्तिप्रवेशे तु न क्षणपदवैयर्थ्यम्। तथाहि, क्षणिकलक्षणे क्षणपदादाने स्वाधिकरणसमयप्रागभावाधिकरणसमयः स्वाधिकरणसमयध्वंसानधिकरणसमयो यस्य तद्भिन्नत्वे सतीत्यर्थकरणेप्यसम्भवः,

(१) तथाप्यर्थस्यैवतत्त्व—इत्यादर्शपुस्तके पाठः।

दीधितिटिप्पणी ।

तथाविधस्थूलकालसम्बन्धस्य तत्रापि सत्त्वात् । न च क्षणिकत्वलक्षणस्थस्वपदस्यानुयोगिकोटौ दाने सत्यन्ते स्वाधिकरणसमयध्वंसानधिकरणेत्याद्युत्पत्तिप्रवेशे महाप्रलये स्वप्रसिद्धिरिति वाच्यम् । स्वपदस्यानुयोगिनि दाने विशेष्यस्य वैयर्थ्यापत्तेः प्रतियोगिन्येव तद्दानात्, तावतैव प्रागभाववारणसम्भवात् । न च तथापि प्रागभावनित्ययोर्वारणार्थं विशेष्यदले उत्पत्तिमत्त्वं प्रवेश्यते, तच्च व्यर्थम्, अवश्यनिविष्टप्रागभावप्रतियोगित्वेनैव तद्वारणादिति वाच्यम् । प्रागभावप्रतियोगित्वमात्रोक्तौ प्रागभावसाधारण्यापत्तेः, तस्यापि ध्वंसीयप्रागभावस्वरूपघटात्मकध्वंसप्रतियोगित्वात्, प्रागभावत्वनिरूपकप्रतियोगित्वस्याविवक्षणात् । न च वास्तवप्रागभावप्रतियोगित्वविवक्षयैव तन्निरासः, चरमध्वंसस्यापि स्वप्रतियोगिचरमभावप्रागभावप्रतियोगित्वात् तथात्वमविकलमिति वाच्यम् । स्वभेदात्मकप्रागभावान्तरप्रतियोगित्वेन तथापि प्रागभावसाधारण्यात् । केचित्तु विशेष्यदलस्थोत्पत्तिमत्त्वस्य प्रागभावप्रतियोगित्वमेवार्थः, स्वाधिकरणेत्यादिनिर्वचनं च सत्यन्तस्थस्यैव । न चैवं क्षणपदवैयर्थ्यम्, सप्तम्यर्थघटितविशेषणविशेष्यभावेऽप्रविष्टाभेदान्वयेन वैयर्थ्यदानासम्भवादित्याहुः । स्वाधिकरणमहाकालावृत्त्यप्रसिद्ध्या उत्पत्तिलक्षणे प्रथमक्षणपदम् । द्वितीयक्षणपदं तु घटपूर्वापरकालवर्त्तिस्थूलकालमादाय द्वितीयादिक्षणे उत्पत्तिलक्षणस्यातिव्याप्तिवारणाय, न त्वेतल्लक्षणे प्रयोजनशालि, तद्विनापि नित्यप्रागभावयोर्वारणात् । न च तथाप्युत्पत्तिलक्षणे कालिकसम्बन्धेन स्वावृत्तिप्रागभावप्रतियोगिक्षणसम्बन्धस्यैव सम्यक्त्वादधिकरणक्षणपदयोर्वैयर्थ्यमिति वाच्यम् । यथोक्तविशेषणविशेष्यभावेऽवैयर्थ्यात् । यद्वा प्राचीनमते जन्यमात्रस्य कालोपाधित्वं नास्तीति न वैयर्थ्यम् । ननु क्षणत्वं स्ववृत्तिप्रागभावप्रतियोग्यनधिकरणत्वं महाप्रलयात्मककालोपाधावप्रसिद्धम्, अतस्तद्घटितोत्पत्तिर्न चरमध्वंसे, अत आह । क्षणश्चेति । अत्राप्याधेयत्वमाधारत्वं च कालिकसम्बन्धेन बोध्यम्, तेनानागतविषयकज्ञानस्य ज्ञानोत्पत्तिक्षणोत्पन्नपदार्थप्रागभावविषयकज्ञानस्य वा न क्ष-

दीधितिः।

वानाधारसमयः। प्रसिद्धिस्तु विधेः नैयायिकानां प्रागभावे चरमध्वंसे च, निषेधस्य च बौद्धानामलीके। स्वाधिकरणसमयप्रागभावाधिकरणक्षणावृत्तित्वं क्षणिकत्वमिति तु ज्यायः। प्रसिद्धिरेतस्य महाप्रलये। प्रागभावश्चात्र भावाभावसाधारणो बोध्यः, तेनान्त्यभावव्युदासः, अन्त्ये कादाचित्काभावो वा (१) स्वाधि-

दीधितिटिप्पणी।

णत्वव्यावृत्तिः, समयपदादेव तयोर्लाभः। (प्रसिद्धिरिति।) प्रागभावे प्रसिद्धिः कादाचित्कत्वगर्भस्य, उभयलक्षणयोः प्रसिद्धिश्चरमध्वंसे, निषेधस्य च जन्येषु विशेषणाभावान्नित्येषु विशेष्याभावात् प्रसिद्धिः सुलभैव। अलीक इति। प्रतियोगिप्रसिद्धिः शब्दादावेवेति, अलीकस्य समयसम्बन्धाभावात्। अनुत्पत्तिकत्वप्रवेशेनैव कादाचित्कत्वं प्रवेश्यते, अत एव तदप्रवेशनयां लाघवात् प्रकारान्तरमाह(२)। स्वाधिकरणेति। अत्र च क्षणावृत्तित्वं क्षणासम्बन्धित्वम्, अन्यथाऽवृत्तितयापि पर्यवसानं स्यादित्यपव्याख्यानम्, अवृत्तेः स्वाधिकरणसमयाभावादेवातिप्रसङ्गवारणात्, स्वपदस्यानुयोगिन्येव तात्पर्यात्(३)। ननु भावमात्रस्य प्रातिस्विकरूपेण प्रामाणिकत्वेन वा पक्षत्वम्, एवञ्चान्त्यभावस्य द्वित्रिक्षणावस्थायित्वेपि यथोक्तरूपवत्त्वात् सिद्धसाधनम्, अत आह। प्रागभावश्चात्रेति। अत्र अनयोर्निरुक्तयोः। अन्त्यभावेति। यस्य भावस्यानन्तरं भावोत्पत्तिर्नास्ति सोऽन्त्यभावः। स च क्षणत्रयस्थायी वा चतुरादिक्षणस्थायी वा भवत्वित्यन्यदेतत्। तथा च यदि भावाभावसाधारणं न स्यात् तदा प्रत्येकस्य पक्षतयान्त्यभाव एवास्मन्मते सिद्धसाधनं स्यात्। तथाहि, तस्याधिकरणसमयस्तत्पूर्वोत्पन्नस्तत्समोत्पन्नभावो ध्वंसरूपश्चाभावोस्ति, तत्र स्वाधिकरणभावरूपसमयप्रागभावक्षणे तस्योत्पत्तिरेव नास्ति, तदुत्तरं भावानुत्पत्तेः,

---

(१) टिप्पणीकृन्मतोयं पाठः। प्रागभावश्चात्र भावाभावसाधारणो बोध्यः, अन्त्ये कादाचित्काभावो वा, तेनान्त्यभावव्युदासः--इति तु सर्वत्र पाठः।

(२) तदप्रवेशा ... प्रकारकमाह—इत्यादर्शपुस्तके पाठः।

(३) स्वपदस्यानुयोगिन्येवसत्त्वति...योलाघवात्—इत्यादर्शपुस्तके पाठः।

THE KUPPUSWAMY SA...
RESEARCH INSTITUTE,
...ADORE MADRAS-4

दीधितिः ।

करणक्षणवृत्तिध्वंसप्रतियोगिवृत्तित्वं वा क्षणिकत्वम् । क्षणत्वं च स्वावृत्तियावत्स्ववृत्तिध्वंसप्रतियोगिकत्वम्, स्ववृत्तिध्वंसप्रतियो-

दीधितिटिप्पणी ।

स्वाधिकरणस्य स्वद्वितीयादिक्षणोत्पत्तिकध्वंसरूपसमयस्य च न वास्तवः प्रागभावस्तदानीम्, येन तदधिकरणक्षणोत्पत्तिकत्वेन सत्यन्तसत्त्वं तत्र न स्यात्, किन्तु भावरूप(१)प्रतियोग्येव तदानीं तत्प्रागभावः, अतो भावाभावसाधारण्यं युक्तम् । अन्त्यनिरुक्तौ विवक्षान्तरमपि कर्तुं शक्यत इत्यतः, अन्त्य इति । अन्त्ये ज्याय इत्यनेनोक्ते, अभावपदेन कादाचित्काभाव एव विवक्षित इत्यर्थः । अन्त्यभावस्य स्वाधिकरणोपान्त्यभावध्वंसाधिकरणक्षणवृत्तित्वात् तद्व्युदासः । प्रथमे तु तादृशध्वंसाधिकरणक्षणानुत्पत्तिकत्वस्य तत्रापि सत्त्वान्न तद्व्युदास इत्यन्त्य इत्युक्तम् । ननु कथमन्त्य इत्युक्तम्, आद्येपि कादाचित्काभावप्रवेशे निर्दोषत्वात्, अन्त्यभावे स्वाधिकरणसमयकादाचित्काभावरूपध्वंसाधिकरणाद्वितीयक्षणोत्पत्तिकत्वस्यैव सत्त्वात्, उत्पत्तिलक्षणानिविष्ट(२)प्रागभावस्यापि कादाचित्कतया निवेशेऽन्त्यभावद्वितीयक्षणस्यापि(३) स्वाधिकरणसमयावृत्तिकादाचित्काभावप्रतियोगितया उत्पत्त्यात्मकत्वेन सत्यन्तासत्त्वादिति । न । सत्यन्तनिविष्टोत्पत्तेः स्वाधिकरणसमयध्वंसानाधारसमयसम्बन्धरूपाया एव निवेशस्योक्तत्वात्, ईदृशमुत्पत्तिलक्षणं च न द्वितीयादिक्षण इत्यदोषश्च । स्वयं प्रागभावानभ्युपगमात्तदघटितं साध्यमाह । स्वाधिकरणेत्यादि । एवं प्रागभावाघटितं क्षणलक्षणमप्याह । क्षणत्वं चेति । स्वावृत्तीति । स्वस्मिन्नवृत्तयो यावन्तः स्ववृत्तिध्वंसानां प्रतियोगिनो यस्य तत्त्वमित्यर्थः । विनाशसामग्रीविशिष्टानां भावानां तथात्वम्, तदवच्छेदेन स्ववृत्तिध्वंसप्रतियोगिनः कस्यापि स्वस्मिन्नवृत्तेः । लघु लक्षणमाह । स्ववृत्तीति ।

---

(१) भाववानं—इत्यादर्शपुस्तके पाठः ।

(२) लक्षणाविशिष्ट—इत्यादर्शपुस्तके पाठः ।

(१) महाप्रलयपूर्वक्षणस्यापीत्यर्थः । तेनान्त्यभावस्य क्षणद्वयावस्थायित्वे तृतीयादिक्षणपरिग्रहः ।

दीधितिः।

ग्यनाधारत्वं वा। क्षणोपि वा नोपादेयः। भिन्नकालयोरनाधाराधेयभावो वा, वृत्तिर्वा कालिकी वक्तव्या, तेनातीतगोचरक्षणिकज्ञाने नांशतो बाधादिः। शब्दादिः स्वोत्पत्त्यव्यवहितोत्तरकालीनध्वंसप्रतियोगी न वा, स्वोत्पत्तिव्याप्यो न वा, व्याप्तिश्च कालिकी,

दीधितिटिप्पणी।

इहापि पूर्ववदेव विनश्यदवस्थानां भावानां महाप्रलयावच्छेदेन च ध्वंसानां तथात्वं बोध्यम्। क्षणोपि वेति। न च तदनुपादाने क्षणिकत्वेपि भावानां स्वाधिकरणमहाकालवृत्तिध्वंसप्रतियोगिवृत्तित्वान्न यथोक्तरूपतेति बाध इति वाच्यम्। तैर्महाकालस्यापि क्षणिकता(१)स्वीकारेण तन्मते बाधाभावात्, स्वाधिकरणक्षणिकमहाकाले स्वाधिकरणक्षणध्वंसासत्त्वात् क्षणध्वंसाधिकरणमहाकाले च स्वाधिकरणत्वाभावात्, उभयवादिसिद्धा साध्यप्रसिद्धिश्चरमध्वंस एवास्तीति न साध्याप्रसिद्धिः, चरमध्वंसाधिकरणसमयस्य ध्वंसरूपतया ध्वंसप्रतियोगित्वाभावात्। वस्तुतः क्षण एव(२) नोपादेयः, तथा च स्वाधिकरणध्वंसप्रतियोग्यवृत्तित्वं स्ववृत्तिध्वंसप्रतियोग्यवृत्तित्वं वा क्षणिकत्वमित्येव सम्यक्, अत्र च बाधादिदोषानवकाशात्। ननु भवतामतीतघटादिगोचरवर्तमानज्ञानस्य क्षणिकत्वानुमाने बाधः, स्वस्य ज्ञानस्याधिकरणवर्तमानक्षणवृत्तिध्वंसप्रतियोगिन्यतीतघटे विषयतासम्बन्धेन वृत्तेरत आह। भिन्नकालयोरिति। तथा चातीते विषयतया ज्ञानं न वर्तत एवेति भावः। सिद्धान्तविरोधादाह। वृत्तिर्वेति। इदमुपलक्षणम्। स्वाधिकरणत्वमपि कालिकं ग्राह्यम्। अंशत इति। अवच्छेदकावच्छेदेन साध्यसिद्धावंशतो बाधस्यापि दूषकत्वात्। केषाञ्चिन्मतमाह। शब्दादिरिति। स्वोत्पत्त्येति। अव्यवहितोत्तरत्वमिह स्वाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वमात्रं, पूर्वक्षणसाधारण्येपि प्रकृते क्षत्यभावात्। (एक)देशिनामिति।

---

(१) क्षणिकत्वा—इत्यादर्शपुस्तके पाठः।

(२) वस्तुतो क्षण एव—इत्यादर्शपुस्तके पाठः।

दीधितिः ।

विधिप्रसिद्धिरेकदेशिनामन्त्यशब्द इति केचित् । सत्त्वमुत्पत्तिव्याप्यं न वा इत्यादिकं तु न युक्तम्, तथा सति सत्त्वादेरेवोत्पत्तिव्याप्यत्वादिकस्य साधयितुमुचितत्वात् ॥

दीधितिटिप्पणी।

अन्त्यस्य स्वमतेपि चरमध्वंसे प्रसिद्धिर्द्रष्टव्या । केचिदित्यनेन प्रथमे अन्त्यशब्दस्य क्षणिकत्वा(न)भ्युपगमः, द्वितीये तु स्वाधिकरणेत्याद्यपेक्षया गौरवमेवास्वरसः सूचितः । गुरुचरणास्तु उत्पत्तिक्षणवर्तिघटं पक्षीकृत्यायमेतदव्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगी न वा । प्रसिद्धिरेतस्य तादृशोत्तरक्षणविनष्टापरपदार्थे इत्याहुः । सत्त्वमित्यादि । यत्र यदा सत्त्वमित्यादिकालिकदैशिकोभयसम्बन्धेन व्याप्तिर्बोध्या, तदैवाभिमतसिद्धेरिति, अन्यथा केवलदैशिकव्याप्तावपि न क्षणिकत्वसिद्धिः, एवं कालिकव्याप्तावपि न क्षणिकत्वसिद्धिरिति द्रष्टव्यम् । उचितत्वादिति । तथा च यत् सदित्यादिसाधनमर्थान्तरदुष्टमिति भावः । अत्र केचित्, स्वाधिकरणेत्यादिसिद्धावपि न क्षणभङ्गसिद्धिः, ध्वंसान्तरप्रतियोग्य(न्तर)वृत्तित्वेन स्थिरस्यापि तथात्वाविरोधात्, एवं चरमध्वंसवत् तत्कालोत्पन्नभावस्याविनाशित्वेपि तथा स्यादित्यर्थान्तरमतस्तत्, शब्दादिः स्वोत्पत्त्यव्यवहितेत्यादि । साध्यप्रसिद्धिश्च ध्वंसेषु, तेषां स्वभेदात्मकतादृशध्वंसान्तरप्रतियोगित्वात्, ध्वंसत्वनिरूपकप्रतियोगित्वस्याविवक्षणात् । घटादिनिष्ठप्रतियोगिताको(१)ऽतिरिक्त एव भेदः, अभावप्रतियोगिकाभावाधिकरणकाभावस्यानतिरेके सिद्धान्तसत्त्वादिति न सिद्धसाधनम् । यद्वा तादृशध्वंसनिष्ठप्रतियोग्यनुयोगितासम्बन्धाश्रयत्वं साध्यम्, तथा च स्वोत्पत्त्युत्तरकालवृत्तिध्वंसनिष्ठतादृशसम्बन्धाश्रयत्वे घटादौ (साध्यमाने) पक्षधर्मताबलात् तत्प्रतियोगित्वप्रसिद्ध्याभिमतलाभ इति वदन्ति ।

कल्पलता ।

विचारप्रवर्तकसंशयमूलं च क्षणभङ्गे विप्रतिपत्तयः । सत्त्वं क्षणमात्रवृत्त्यनेकवृत्तिधर्मव्यापकताव्या-

(१) घटादिनिष्ठो- इत्यादर्शपुस्तके पाठः ।

कल्पलता।

प्यं(१) न वा, सत्त्वमुत्पत्तिव्याप्यं न वा, कार्यं स्वोपादानसमानकालीनं न वा, भावः स्वोत्पत्त्यव्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगी न वा। एकदेशिमतेनान्त्यशब्दे विधिकोटिप्रसिद्धिः, निषेधकोटि(प्रसिद्धि)-स्त्वलीके सौगतानां मते॥

तत्र न प्रथमः, प्रमाणाभावात्। यत् सत् तत् क्षणिकं, यथा घटः, संश्च विवादाध्यासितः

दीधितिः।

अनुमितिकारणव्याप्तिपक्षधर्मताज्ञानजनकोदाहरणोपनयात्मकद्व्यवयवन्यायवादी(२) बौद्धः क्षणिकत्वे मानमाह। यत् सदिति। स्थूलद्रव्याभ्युपगमेन घटो दृष्टान्तः प्रसाध्याङ्कः(३), तथोत्पादविशिष्टो वा परमाणुसमूहो घटः। असन्नेव वा व्यतिरेके दृष्टान्त(४) इति कश्चित्(५)। विवादाध्यासित इत्येकदेशिमतेनान्त्यशब्दे अंशतः सिद्धसाधनवारणाय, स्वरूपक-

दीधितिटिप्पणी।

द्व्यवयवन्यायवादित्वे हेतुः, अनुमितिकारणेति। तथा चैतावतैवानुमितिनिर्वाहे नावयवान्तरस्वीकार इति भावः। तन्मतेऽवयविनो घटस्य शशशृङ्गतुल्यत्वात् परमाणुपुञ्जस्यैव घटत्वादाह। स्थूलेति। तस्य क्षणिकत्वं नोभयसम्मतमत आह। प्रसाध्याङ्क इति। तथेति। परमाणुसमूहः, क्षणिक इत्यादिः, कुर्वद्रूपत्वविशिष्टपरमाणुसमूहो वा घटपदेनोक्त इत्यर्थः। मतान्तरमाह। असन्नेव वेति। अलीकघट एव वा व्यतिरेके दृष्टान्त इत्यर्थः। व्यतिरेकपक्षस्य पश्चाद्वक्ष्य-

---

(१) क्रमिकक्षणद्वयमात्रवृत्तिधर्मस्तदुभयत्वं तदुभयान्यतरत्वं वा, तद्व्यापकत्वं तद्वन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वम्, तच्च कालिकसम्बन्धेन बोध्यम्। नैयायिकमते केनापि सम्बन्धेनावृत्तौ गगनादावेतस्य प्रसिद्धिः, परेषां चालीके। सत्त्वस्य च तद्व्याप्यत्वं साध्यते, तत्सामानाधिकरण्यमात्रस्य साध्यत्वे गगनादौ तत्सत्त्वेन सिद्धसाधनापत्तेः।

(२) द्व्यवयववादी—कलि० मु० पु० पा०। (३) सन्दिग्धसाध्यक इत्यर्थः।

(४) व्यतिरेकदृष्टान्त-कलि० मु० पु० पा०। (५) टिप्पणीकृन्मतोऽयं पाठः। केचित्-इति सर्वत्र।

शब्दादिरिति चेन्न । प्रतिबन्धासिद्धेः ।

दीधितिः ।

थनमात्रं(१) वा, पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्याया अनुत्पन्नत्वेन तस्यादोषत्वात् । शब्दादिरिति विभिन्नरूपेण पक्षत्वेपि न क्षतिः, समूहालम्बनरूपाया अनुमितेः सम्भवात्, केषाञ्चिद्विशिष्यानुपादानेपि न तत्र सन्दिग्धानैकान्तिकत्वं, गृहीतव्याप्तिकस्य हेतोस्तत्र परामर्शानुमितेरेवोदयात्, पक्षत्वेनोपन्यासस्याकिञ्चित्करत्वात् । प्रामाणिकत्वार्थक्रियाकारित्वरूपयोर्वा(२) सत्त्वयोरेकतरस्य पक्षतावच्छेदकत्वं हेतुत्वं चान्यतरस्य । पक्षतावच्छेदकस्य हेतुत्वेपि न दोषः, व्याप्तिग्रहेण हेतौ साध्य-

दीधितिटिप्पणी ।

माणत्वेनेदानीं तदुपन्यासानौचित्यमेव कश्चिदित्यस्यास्वरसः । स्वरूपकथने हेतुः, पक्षतावच्छेदकेति । एवं विभिन्नपक्षतावच्छेदकं कृत्वाप्येकदानुमितिः शक्यत इत्याह । शब्दादिरिति । समूहालम्बनेति । तत्तच्छब्दत्वेन तद्घटत्वेन चैकदा पक्षत्वेप्येकदैव तावद्विषयानुमितिरित्यर्थः । एवञ्चान्त्यशब्दस्य पक्षबहिर्भाव इति हृदयम्, अन्यथा पक्षतावच्छेदकभेदेनांशतः सिद्धसाधनस्य दोषत्वापत्तेः । नन्वन्त्यशब्दस्य विशिष्यानुपादाने हेतुस्तत्र सन्दिग्धानैकान्त इत्यत आह । केषाञ्चिदिति । गृहीतव्याप्तिकस्येति । अयं भावः, एकस्य पक्षतयोपन्यासेऽपरस्यानुपन्यासेन भवता तदानीं सन्दिग्धानैकान्तो दीयते, तत्र यदि पक्षत्वोपन्यासपूर्वं हेतौ व्याप्तिग्रहस्तदा पक्षत्वोपन्यासेपि समानम्, व्याप्त्यग्रहेनुमितेरभावाच्छब्दप्रयोगरूपोपन्यासेन वा किं क्रियत इति भावः । एतेनाप्रामाण्यासञ्जनं क्रियते इत्यपास्तम्, उपन्यासानुपन्यासयोः समानत्वात् । एकदैव सर्वस्य पक्षत्वमप्याह । प्रामाणिकत्वेति । एकसञ्ज्ञायः हेतुपक्षतावच्छेदकोभयार्थकत्वेपि न दोष इत्याह । पक्षतेति । अन्यतरस्य चरमस्य, तत्रैव क्रमयौगपद्येत्यादितर्कस्य दर्शयिष्यमाणत्वात् । न दोषः न सिद्धसाधनम् ।

(१) स्वरूपकथनं—कालि० मु० पु० पा० । (२) रूपयोः—कालि० मु० पु० पा० ।

दीधितिः।

समानाधिकरण्याग्रहनेपि हेतुमान् साध्यवानिति हेतुमत्त्वाव-च्छेदेन हेतुमद्विशेष्यकसाध्यवत्त्वबुद्धेरुद्देश्याया असिद्धेः(१)। प्रतिबन्धः व्याप्तिः॥

दीधितिटिप्पणी।

हेतुमान् हेतुव्यापकसाध्यवानिति हेतुमद्विशेष्यकव्याप्तिग्रहस्य कदाचित्सम्भवात् हेतुमत्त्वावच्छेदेनेत्युक्तम्। व्याप्तिरिति। तदसिद्धिध्वंसमात्रे यथोक्तसाध्यसत्त्वात् सत्त्वे हेतौ तत्सामानाधिकरण्याभावात् अन्यथाशब्दस्याप्यतथात्वेन घटादौ व्यभिचारादिति॥

कल्पलता।

पराभिमतं क्षणिकतायां प्रमाणमाह। यत् सदिति। व्याप्तिपक्षधर्मताज्ञानमात्रमनुमितिजनकं, तदुपदर्शकौ चोदाहरणोपनयावेवेति द्व्यवयव एव प्रयोगो बौद्धाभिमतः। विवादास्पदत्वमिह पक्षतावच्छेदकम्। शब्दादिरिति त्वधिकस्फुटार्थम्। यद्वा शब्दादित्वेनैव पक्षता, विवादास्पदत्वमन्त्यशब्दे सिद्धसाधनवारणाय, शब्दादिरिति चालीकस्य पक्षतानिरासाय, अन्यथा तत्र सत्त्वस्य हेतोरसिद्धौ भागासिद्धिः स्यात्। आदित्वं प्रामाणिकत्वं(२) पक्षतावच्छेदकम्, सत्त्वं चार्थक्रिया(३)कारित्वं हेतुरिति तयोर्भेदः, अन्यथा तयोरैक्ये व्याप्तिग्राहकमानादेव साध्यसिद्धावनुमानवैयर्थ्यं स्यात्। यद्वा सत्त्वेनैव पक्षता हेतुता च, अनुमितिस्तु प्रकारभेदं लिङ्गोपधानादि(४)क-

(१) अप्रसिद्धेः—कालि० मु० पु० पा०।

(२) सद्विषयकधीविषयत्वमेव शब्दादित्वम्। तच्च सदसतोरेकज्ञानाविषयतया प्रामाणिकत्वमेवेति भावः। (३) च्छेदकम्, स्वार्थक्रिया—पुण० पु० पा०।

(४) प्रकारभेदम्, अनुमितिकारणज्ञानस्यानुमितितो भिन्नप्रकारकत्वं, अनुमितेश्च लिङ्गोपधानम्, तदवच्छिन्नविशेष्यताकत्वमादायानुमितिरुपपादनीयेत्यर्थः।

कल्पलता ।

भावाधेति न दोषः । घटः प्रसाध्याङ्कको दृष्टान्तः । न च सत्त्वेन तस्यापि पक्षत्वे दृष्टान्तत्वानुपपत्तिः, साध्यवत्तया निश्चितत्वमात्रेणैव दृष्टान्तता, न तु पक्षभिन्नत्वमपि तन्त्रम् । न चांशतः सिद्धसाधनम्, विशेषतः सिद्धावपि सामान्यासिद्धेरुद्देश्यत्वात् । घटभिन्नसत्त्वेन वा पक्षता । प्रतिबन्धेति । प्रतिबन्धो व्याप्तिः, तस्याः क्षणिकत्वनिरूपितायाः असिद्धेरित्यर्थः । क्षणिकत्वनिरूपिता व्याप्तिरन्यशब्दत्वादौ प्रसिद्धा सत्त्वे प्रतिषिध्यत इति नाप्रसिद्धिः ॥

सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मसंसर्गेण भेदासिद्धौ

दीधितिः ।

भेदासिद्धाविति । अङ्कुरमकुर्वाणादङ्कुरकारिण इव तदकुर्वाणात् तत्कारिणः, एवं तत्तदकुर्वाणात् तत्तत्कारिणो भेदसिद्ध्या तेषु क्षणिकत्वसिद्धौ(१) क्षणिकत्वसत्त्वयोर्व्याप्तिसिद्धिरित्यर्थः । सि-

दीधितिटिप्पणी ।

नन्वङ्कुरकारितदकारिणोर्भेदसिद्धावपि न क्षणिकत्वसिद्धिः, भिन्नयोस्तयोरनेककालस्थायित्वेऽप्युपपत्तेः(२), अतः क्रमेण तदुपपादयति । अङ्कुरमकुर्वाणादिति । तथा च यथा विरुद्धधर्माध्यासेनाङ्कुरमकुर्वाणात् कुशूलस्थादङ्कुरकारिणः क्षेत्रस्थस्य भेदसिद्धिरेवं क्रियाविरोधादिरूपतत्कार्यमकुर्वाणात्तस्मादेव कुशूलस्थात्तत्कार्यकारिणः कुशूलस्थतादशायामपि भेदसिद्धिरित्यर्थः । एतावतापि न क्षणिकत्वमायाति, तत्पदेन एकमात्रकार्यावधारणात्, अतो बीजसमयोत्तरतत्तत्कार्यमादायाह । तत्तदिति । प्रतिक्षणमेव किञ्चित्क्रियादिकार्यजननात् तत्तद्भेदात् क्षणिकत्वसिद्धिरित्यर्थः । तेष्विति । तथा च तेषु

(१) क्षणिकत्वसिद्धौ तेषु—कालि० मु० पु० पा० । नायं टिप्पणीकृन्मतः ।

(२) अङ्कुरपूर्वतृतीयक्षणस्थबीजस्य पूर्वपूर्वकालवृत्तित्वे तदव्यवहितपूर्वक्षणस्थबीजस्य चोत्तरोत्तरकालवृत्तित्वेऽप्युपपत्तेरित्यर्थः ।

तत्सिद्धिरिति चेन्न। विरुद्धधर्मसंसर्गासिद्धेः।

दीधितिः।

द्व्याप्तिकाच्च सत्त्वात् सन्मात्रे क्षणिकत्वानुमानमिति। किञ्चि-त्सामर्थ्यादिकमविरुद्धं किञ्चिच्चासिद्धमित्याशयेनाह। विरुद्धेति॥

दीधितिटिप्पणी।

क्षणिकत्वसिद्ध्या तत्रैव व्याप्तिसिद्धौ शब्दादिकं पक्षीकृत्य व्याप्यसत्त्वेन व्यापकानुमानं क्रियत इत्यर्थः। सन्मात्र इति। तथा च विरुद्धधर्माध्यासादेकत्र प्राप्तावपि सन्मात्रे क्षणिकत्वप्राप्तिरनुमानफलमिति भावः। ननु कथं विरुद्धधर्मसंसर्गासिद्धिः, सामर्थ्यासामर्थ्ययोरेवोक्तत्वादित्यत्रोत्तरानुक्तौ न्यूनत्वमाशङ्क्याह। किञ्चिदिति। सामर्थ्यासामर्थ्यं यदि फलोपधानानुपधानरूपमुच्यते, तदा तदविरुद्धमेव, यदि च स्वरूपयोग्यत्वतदभावरूपमुच्यते, तदा तस्य प्रकृतेऽसत्त्वमेवेत्युभयथैव विरुद्धयोः संसर्गासिद्धिः, आद्ये विशेषणाभावात्, अन्त्ये च विशेष्याभावादिति भावः। प्रकृते आह। किञ्चिच्चेति॥

कल्पलता।

सामर्थ्येति। प्रतिक्षणं क्वचित् सामर्थ्यं क्वचिदसामर्थ्यमिति विरुद्धधर्माध्यासात् क्षणिकत्वसिद्धौ व्याप्तेः सिद्धिरित्यर्थः। यद्यपि विरुद्धधर्माध्यस्तत्वा(१)-देव भेदसिद्धिरिति सत्त्वहेतोर्वैयर्थ्यं, तथापि ततो भेदमात्रमनेन तु क्षणिकत्वमिति प्रकारभेद इति भावः। विरुद्धेति। (स्वरूपयोग्यत्वस्वरूपायोग्यत्वयोः)ययोर्विरोधस्तयोः संसर्ग एव नास्ति, संसृष्टत्वेनानुभूयमान(कारित्वाकारित्वयोः साहित्यासाहित्य)योस्तु न विरोध इत्यर्थः।

प्रसङ्गविपर्ययाभ्यां(२) तत्सिद्धिरिति चेन्न।

दीधितिः।

प्रसङ्गेति। यद्यदा यत्कार्यमङ्कुरं वा प्रति समर्थं तत्तदा तत् करो-

(१) धर्माध्यासा-पुण० पु० पा०। (२) प्रसङ्गतद्विपर्ययाभ्या—पुण० पु० पा०।

दीधितिः ।

ति, यथा सहकारिमध्यमध्यासीनं बीजम्(१), अङ्कुरसमर्थं च तदानीं कुशूलस्थं बीज(२)मुपेयते परैरिति प्रसङ्गः। यद्यदा यत्कार्यमङ्कुरं वा न करोति तत्तदा न तत्समर्थम्, यथा यावत्सत्त्वमङ्कुराकारि शिला-शकलमङ्कुरासमर्थम्, न करोति च कुशूलस्थं बीजं(३) तदानीमङ्कुर-मिति विपर्ययः । तेन कुशूलस्थतादशायां संयोगादेरुत्तरबीजस्य वा कालान्तरे चाङ्कुरस्य जननाभ्युपगमेपि न क्षतिः। यन्नाङ्कुरसम-र्थं तन्नाङ्कुरं करोति, यथा शिलाशकलम्, अङ्कुरासमर्थं च सहका-रि(४)समवहितं बीजमिष्यते परैरिति प्रसङ्गः, यदङ्कुरं करोति तद-ङ्कुरसमर्थं, यथा धरण्यादिभेदः, करोति च सहकारिसमवहितं बी-जमङ्कुरमिति विपर्ययश्च सामर्थ्यसाधनाय नोपादेयः, अनभ्युपग-

दीधितिटिप्पणी ।

कुशूलस्थबीजस्य पक्षतया तत्र नैयायिकानां हेतुसत्त्वं दर्शय-ति । अङ्कुरेति । अन्यथा विपर्यये सिद्धसाधनात् कुत्र व्यापकाभावे न व्याप्याभावानुमानं स्यात् । इति प्रसङ्गः एतत्स्वरूपप्रसङ्गः । यथे-ति । यावत्सत्त्वमङ्कुराकारि शिलाशकलं यथाङ्कुरासमर्थमिति सम्बन्धः । पक्षधर्मतां प्रदर्शयति । न करोति चेति। कार्ये यदित्यस्य यदेत्यस्य च क्रमेण प्रयोजनमाह । तेनेति । बीजेन कुशूलस्थतादशा-यां संयोगादेरुत्तरबीजस्य च कालान्तरे जननात् विपर्ययहेत्वसि-द्धिः स्यादित्यर्थः । उत्तरबीजस्येति तन्मते यदेत्यस्य प्रयोजनम् । का-लान्तर इति । तथा च कुशूलस्थबीजे कालान्तरेऽङ्कुरजनकत्वस्य नैयायिकैरभ्युपगमात् तन्मते हेत्वसिद्धिः स्यादिति भावः । कस्य-चिन्मतं दूषयितुमुपन्यस्यति । यन्नेति । एतन्मते सहकारिसमवहि-ते सामर्थ्यसाधनमेव फलमभ्युपेयते परैरिति यदुक्तम्, तदेव दूष-

(१) मध्यासीनबीजम्—कलि० मु० पु० पा० ।

(२) कुशूलस्थबीजम्—कलि० मु० पु० पा० ।

(३) कुशूलस्थबीजम्—कलि० मु० पु० पा० ।

(४) सहकार्य—कलि० मु० पु० पा० ।

सामर्थ्यं हि करणत्वं(१) वा योग्यता वा(२) ।

दीधितिः ।

मेव प्रसङ्गहेतोरसिद्धेः, सहकारियोग्यतायाः स्वरूपयोग्यताया वा(३) सामर्थ्यस्य अभ्युपगतत्वेन विपर्यये सिद्धसाधनादिति । सामर्थ्यं हि कारणत्वम् । तद्द्विविधम्, फलोपधानं योग्यता च । फलोपधानं च फलाव्यवहितप्राक्कालसम्बन्धः । तदेव करणं कारित्वं च । योग्यतापि द्वयी, सहकारियोग्यता स्वरूपयोग्यता च । चरमापि द्विविधा, जनकतावच्छेदकरूपं बीजत्वादि कुर्वद्रूपत्वं वा सहकारिविरहप्रयुक्तकार्याभाववत्त्वं च । तत् क्रमेण(४) विकल्प्य दूषयति । सामर्थ्यं हीति ॥

दीधितिटिप्पणी ।

यति । हेतोरसिद्धेरिति । सहकारीति । सहकारिसमवहिते पक्षे नैयायिकैः सामर्थ्याङ्गीकारात् । तदा को दोष इत्यत आह । सामर्थ्यस्येति । एतद्रूपस्य सामर्थ्यस्य नैयायिकैः सहकारिसमवहितेऽभ्युपगमेन विपर्यये सिद्धसाधनमेव दोषः स्यादित्यर्थः । सामर्थ्यं हि द्विविधं फलोपधानमित्यादिलिखनं न युज्यते, सामर्थ्यस्य एतद्द्वयात्मकस्य ग्रन्थेऽप्रसिद्धेरतोऽन्तरा कारणत्वरूपं तदर्थमाह । कारणत्वमिति । तदेव फलोपधानमत्र, एतद्द्वयपदवाच्यम् । तदर्थप्रदर्शनं च ग्रन्थे क्वचित् कारिपदेन लिख्यते क्वचिच्च करणपदेन लिख्यते तदर्थम् । सहकारियोग्यता सहकारिसत्त्वेऽवश्यं कार्योत्पादादिरूपा । चरमा स्वरूपयोग्यता, योग्यतापीत्यपेक्षयाऽपिः । तत्स्वरूपमाह । बीजत्वादीति । मतभेदादुभयलिखनम् । अपरामाह । सहकारीति । क्रमेण तद्द्विविधमिति क्रमेण । उत्तरत्रापि नापि द्वितीय इत्यत्रापि ॥

(१) करणं वा- पुण० पु० पा । (२) तद्योग्यता वा-पुण० पु० पा० ।

(३) टिप्पणीकृन्मतोयं पाठः । सामर्थ्यस्य सहकारियोग्यतायाः स्वरूपयोग्यताया वा— इति तु सर्वत्र पाठः । (४) तत्र क्रमेण-कालि० मु० पु० पा० ।

कल्पलता ।

प्रसङ्गेति । प्रसङ्गाभ्यां विपर्ययाभ्यां चेत्यर्थः । तथाहि, कुशूलस्थं बीजं यद्यङ्कुरसमर्थं स्यादङ्कुरं कुर्यात्, न च करोति, तस्मान्न समर्थम्, एवं क्षेत्रपातितं यद्यसमर्थं स्यान्न कुर्यात्, करोति च, तस्मान्नासमर्थमिति प्रसङ्गाभ्यां विपर्ययाभ्यां च कुशूलस्थक्षेत्रपतितबीजयोर्भेदः । तथा च क्षणिकत्वमेव पर्यवस्येदिति भावः । समर्थस्य क्षेपायोगादिति तत्कालीनं सामर्थ्यं तत्कालीनफलोपधानलक्षणं कारित्वमापादयतीति यदा कदाचित् करणेन न सिद्धसाधनम् । करणमिति । फलोपधानमित्यर्थः ।

नाद्यः(१), साध्याविशिष्टत्वप्रसङ्गात् । व्यावृत्तिभेदादयमदोष इति चेन्न । तदनुपपत्तेः । व्यावर्त्यभेदेन

दीधितिः ।

नाद्यः पक्षः । एवमुत्तरत्रापि(२)। साध्येति । साध्यं व्यापकम् । तथा चापाद्यानुमेयाभ्यामापादकानुमापकयोरविशेषप्रसङ्गादित्यर्थः । असमर्थाकारित्वावृत्त्योर्भिन्नयोरेव समर्थकारिपदाभ्यामभिधानान्न साध्याविशेष इत्याह । व्यावृत्तीति । तदनुपपत्तेः व्यावृत्तिभेदानुपपत्तेः । व्यावर्त्यभेदः एकेन व्यावर्त्यस्य विशेष्यस्य भेदोऽपरव्यावर्त्यात्, एकोप-

दीधितिटिप्पणी ।

साध्याविशिष्टेति मूले प्रसङ्गविपर्यययोर्द्वयोरेव दोषो दत्तः, अत्र च साध्यपदेन न प्रसङ्गसङ्ग्रहः स्यादत आह । साध्यमिति । वृक्षशिंशपारूपव्यावर्त्ययोर्भेदस्य परस्परविरोधाभावादर्थमाह । एकेनेति ।

---

(१) न तावदाद्यः—पुण० पु० पा० । (२) टिप्पणीकृन्मतोयं पाठः । एवमग्रेपि—इति सर्वत्र ।

विरोधो हि तन्मूलम् ।

दीधितिः ।

गृहीतस्यापरेण परित्याग इति यावत् । स च द्विविधः, एकोपगृहीतस्य अन्येन नियमतः परित्यागः, कस्यचिदुपग्रहे सति कस्यचित्परित्यागश्च । असावप्येकतरमात्रेण परस्परेण च । तत्राद्यो विरुद्धयोरेव, मध्यमो व्याप्यव्यापकयोरेव, चरमो व्यभिचारिणोरेव । तादृशेन भेदेन विरोधः ऐक्यानुपपत्तिः । तन्मूलम् व्यावृत्तिभेदमूलम्, तच्चेह नास्तीति ॥

दीधितिटिप्पणी ।

तथा च एकेनावृक्षव्यावृत्तिस्वरूपेण व्यावर्त्यस्य वृक्षस्याम्रादेरशिंशपाया अव्यावृत्तेर्व्यावर्त्यायाः शिंशपाया भेदोऽस्तीति भावः। एवञ्च मूले व्यावर्त्यभेदनिबन्धनो विरोधस्तन्मूलमित्यर्थः। मूले भिन्नभिन्नस्योक्तत्वाद्द्वैधमाह। स चेति। कस्यचिदिति। अत्रापि एकोपगृहीतस्येति सम्बन्धः। मूले न्यूनत्व(१)माशङ्क्य परमपि दर्शयति। असावपीति। असौ अन्त्यः। एकतरमात्रेणेति। परित्याग इत्यनुषज्यते। आद्यः नियमेनेत्यादिरूपः। असामानाधिकरण्यरूपो विरोधो वृक्षशिंशपादौ नास्तीत्यत आह। ऐक्येति। तथा च तादृशभेदनिबन्धना या व्यावर्त्ययोरैक्यानुपपत्तिस्तया विभिन्ना व्यावृत्तिरङ्गीक्रियत इति भावः ॥

कल्पलता ।

साध्याविशिष्टत्वादिति(२) । आपाद्याविशिष्टत्वात्(३)। साध्यसाधनयोरिवापाद्यापादकयोरपि भेदे सत्यापादनप्रवृत्तेः । (४)असमर्थव्यावृत्तिरापादिका,

(१) द्वितीयपक्षनिराकरणायाग्रे 'परापरभावानभ्युपगमात्-'इति मूलं 'परापरभावेति मिथोव्यभिचारस्याप्युपलक्षकम्-'इति व्याख्यास्यते, तच्चेदानीं मिथोव्यभिचारस्याप्रस्तुतत्वेऽसङ्गतं स्यादिति तादृशव्याख्यानानुपपत्तावेव प्रसक्तं मूलस्य न्यूनत्वमित्यर्थः। तच्च परापरभावप्रतिषेधमात्रेण न द्वितीयपक्षनिराकरणसम्भवः, तादृशहेतोर्मिथोव्यभिचारिसाधारण्यादित्याकारकं बोध्यम् ।

(२) साध्याविशिष्टत्वादित्येव मूलपाठमनुसृत्य व्याख्यातम् ।

(३) त्वादित्यर्थः—पुण० पु० पा० । (४) अपोहवादार्थवादिपक्षे-इत्यधिकं पुण० पु० ।

कल्पलता ।

अकारि(त्व)व्यावृत्तिश्चापायेति नापायाविशेष इत्याह । व्यावृत्तीति । व्यावृत्त्योरपि भेदः प्रकृते नास्तीत्याह । नेति । कथं नास्तीत्यत आह । व्यावर्त्यभेदेनेति । तन्मूलम् व्यावृत्तिभेदमूलमित्यर्थः ॥

स च न तावन्मिथो व्यावर्त्यप्रतिक्षेपाद्गोत्वाश्वत्ववत्,तथासति(१) विरोधादन्यतरापाये(२) बाधासि-

दीधितिः ।

तदेव व्युत्पादयति । स चेति । सः विरोधः । मिथ इत्यादि । व्यावर्त्यस्य नियमेन प्रतिक्षेपात्, प्रतिक्षेपमात्रस्य व्यभिचारिसाधारण्यात् । एतावतैव सामञ्जस्ये मिथ इति व्यावृत्त्योरसामानाधिकरण्यस्य स्फुटतरप्रतिपत्तये । बाधासिद्धी धर्मिणि साध्यसाधनयोरभावौ । तथा चासमर्थाकारिव्यावृत्त्योरेकतरसत्त्वेऽन्यतराभावनियमेन सामानाधिकरण्यविरहे प्रसङ्गे विरोधो

दीधितिटिप्पणी ।

स चेति मूले मिथो व्यावर्त्यप्रतिक्षेपनिबन्धनः स विरोधो नास्तीत्यर्थः, नियमपदपूरणं किमर्थं कृतमत आह । प्रतिक्षेपमात्रस्येति । न च परस्परव्यभिचारिसाधारण्ये को दोष इति वाच्यम् । तथासति बाधासिद्ध्योरित्यादिदोषस्य व्यभिचारिण्यसङ्गतेः, न्यूनत्वं वा स्यात् । ननु नियमपददाने मिथ इत्यनर्थकम्, व्याप्यव्यापकभावापन्नस्य नियमेन प्रतिक्षेपाभावादेव वारणादित्यत आह । एतावतैवेति । स्फुटतरेति । मिथःपदेन छिन्नमेवोभयत्र प्रतिक्षेपः प्रतीयत इति भावः । पक्षे साध्याभावसाधनाभावयोरेव बाधासिद्धिपदाभिधेयत्वात् प्रकृते तदसम्भवा(३)दाह । बाधासिद्धी इति । विरोध इति । एतावता व्यभिचारोपि

(१) तथा च सति—पुण० पु० पा० । (२) अन्यतरापायेन—पाठः ।

(३) कौर्मैर्मुख्यतया कुशूलस्थबीजेऽसामर्थ्यं साधनीयम्, तत्सिद्धावेव क्षेत्रस्थबीजमसा-

ध्योरन्यतरप्रसङ्गात् ।

दीधितिः ।

विपर्यये च व्यभिचार इति भावः ॥

दीधितिटिप्पणी ।

बोध्यः । ननु विपर्यये कथं बाधासिद्ध्योरन्यतरवत्त्वम्, विरोधाभावात्, न हि गोत्वाभावाश्वत्वाभावयोर्विरोधः, अत आह । विपर्यये चेति ॥

कल्पलता ।

विरोधमेव प्रतिक्षिपति । स चेति । अन्योन्यव्यावर्त्यं प्रतिक्षिपवत्त्यो(१)र्गोत्वाश्वत्वलक्षणव्यावृत्त्योर्भेदः सम्भवतु(२), गोत्वस्य व्यावर्त्यां विशिष्टां(३) गोव्यक्तिमश्वत्वं प्रतिक्षिपति, अश्वत्व(४)व्यावर्त्यां चाश्वव्यक्तिं गोत्वमिति (हि) तयोर्भेदः, प्रकृते तु नैवमित्यर्थः । ननु प्रकृतेपि तथैव(५) किं न स्यादत आह । तथासतीति । यदि कारित्वं सामर्थ्येन प्रतिक्षिप्येत तदा आपाद्यबाधः स्यात्, यदि कारित्वेन सामर्थ्यं प्रतिक्षिप्येत तदा आपादकासिद्धिरित्यर्थः । आपाद्यबाधो गुण एवेति चेन्न, आपाद्यापादकयोः क्वापि सामानाधिकरण्यं न स्यादिति मूलशैथिल्यं विपर्ययापर्यवसा-

---

मर्थ्यवद्भिन्नं, सामर्थ्यादित्यादिनानुमानेन कुशूलस्थक्षेत्रस्थबीजयोर्भेदसिद्ध्या तयोः क्षणिकत्वस्य सिद्धौ तद्दृष्टान्तेन यत् सत् तत्क्षणिकमितिव्याप्तिसिद्धिसम्भवस्य 'सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मसंसर्गेण भेदासिद्धौ तात्सिद्धिः (पृ० २८ पं० ११)—'इत्यादिना पूर्वमुक्तत्वात्, तच्च कुशूलस्थबीजं यदि समर्थं स्यात् तर्हि कारि स्यादिति प्रसङ्गेन कुशूलस्थबीजमसमर्थमकारित्वादिति विपर्ययानुमानेन च साधनीयम्, तत्र कारित्वसामर्थ्ये तत्तदन्यापोहलक्षणे गोत्वाश्वत्वे इव विरुद्धे नैव बौद्धैः स्वीक्रियेते, तर्हैव पूर्वोक्तप्रसङ्गविपर्यययोर्बाधासिद्धी उद्भाव्येते, तच्चासङ्गतम्, आपत्तौ बाध्यस्यानुगुणतयाऽदोषत्वात् हेतोः पक्षेऽसत्त्वेपि तत्प्रसक्त्या आपत्तिसम्भवेन तदासिद्धेरप्याकिञ्चित्करत्वात् प्रतियोगिनोर्विरोधेपि विपर्ययस्यातथात्वादेकाभावेनापराभावसाधने बाधासिद्ध्योरन्यतरप्रसङ्गाच्चेति भावः । (१) प्रतिक्षिपतो—पुण० पु० पा० । (२) दः सिध्यतु—पुण० पु० पा० । (३) विशेष्या-पुण० पु० पा० । (४) अश्वत्वस्य--पुण० पु० पा० । (५) तथा-पुण० पु० पा० ।

नं चेति भावः(१) ॥

नापि तदाक्षेपप्रतिक्षेपाभ्यां वृक्षत्वशिंशपात्ववत्, परापरभावानभ्युपगमात् । अभ्युपगमे वा समर्थस्याप्यकरणमसमर्थस्यापि वा करणं(२) प्रसज्येत ।

दीधितिः ।

नापीत्यादि । तयोः एकेन व्यावर्त्त्ययोः, अपरेणाक्षेपप्रतिक्षेपाभ्यां परिग्रहपरित्यागाभ्यां द्विविधाभ्यामुपदर्शिताभ्याम् । वृक्षत्वशिंशपात्ववत्, यवत्वाङ्कुरकुर्वद्रूपत्ववच्च(३)। परापरभावेति । मिथोऽव्यभिचारस्याप्युपलक्षकम् । परापरभावस्य मिथोऽव्यभिचारस्य चाभ्युपगमे दोषमाह, अभ्युपगमे वेत्यादिना । सामर्थ्यस्य परत्वे समर्थस्याप्यकरणं कारित्वस्य परत्वे त्वसमर्थस्यापि करणं मिथोऽव्यभिचारे तूभयं प्रसज्येत । तथा च समर्थस्याकर-

दीधितिटिप्पणी ।

पूर्वं चरमो व्यभिचारिणोरेवे(४)ति लिखितम्, तस्य च मूलेऽनुट्टङ्कने न्यूनता स्यादतो मूलत एव तदर्थमाह । द्विविधाभ्यामिति । किंविधाभ्यामित्यत आह । उपदर्शिताभ्यामिति । एकतरमात्रेण परस्परेण चेत्यादिनेत्यर्थः । व्यभिचारिणोः पूरयित्वा दर्शयति । यवत्वेति । अनयोः परस्परव्यभिचारात् । व्यभिचारिणोर्दोषानुक्तौ न्यूनता स्यादत आह । मिथ इति । अत्र पूरणं विषमव्यभिचारिसाधारणत्वं केवलाभ्युपगमशब्दादेव दर्शयति । परापरेति । मिथोऽव्यभिचारिणि च दोषं मूलोक्त्यैव दर्शयति । मिथ इति । उभयमिति । तथा च प्रत्येकमुभयत्रैव च तात्पर्यमिति भावः । तदा को दोषोऽत आह । तथा चेति । असमर्थत्वकरणयोरसामानाधिकरण्यरूपविरोध एवासमर्थस्य करणत्वे प्रतिबन्धक इत्यर्थः । केचित्तु नञा प्रश्लेषेण अविरोधः अविरोधप्रसङ्ग इत्याहुः । ननु विरोधोऽस्माभि-

(१) भावः—पुण० पु० पा० । (२) समर्थस्यापि करणं—पुण० पु० पा० । (३) यवत्वाङ्कुरत्वकुर्वद्रूपत्ववच्च—कलि० मु० पु० पा० । (४) ११ पृष्ठे ६ पङ्क्तौ दीधितिकृतेति शेषः ।

दीधितिः।

णे व्यभिचारः, असमर्थस्य तत्करणे(१) विरोधः, विरोधाय दत्ते जलाञ्जलौ क विरुद्धधर्माध्यास इति भावः॥

दीधितिटिप्पणी।

नै मन्यत इत्यत आह। विरोधायेति। मूलबाधकमेवागतमिति भावः(२)॥

कल्पलता।

ननु गोत्वाश्वत्ववत् परस्परात्यन्ताभावसामानाधिकरण्यं मास्तु(३), वृक्षत्वशिंशपात्ववद्व्याप्यव्यापकभाव एव व्यावृत्त्योः स्यात्, एतावतापि भेदः सिद्ध्यत्येवेत्यत आह। नापीति। आक्षेपः सङ्ग्रहः, प्रतिक्षेपो व्यवच्छेदः, तथा च वृक्षत्वस्य पनससङ्ग्राहकत्वं शिंशपात्वस्य च तद्व्यवच्छेदकत्वम्। न चैकस्यैतदुपपद्यत इति तयोर्भेदोऽस्तु, स च व्याप्यव्यापकभावाधीनः, प्रकृते च तथाभ्युपगमे सामर्थ्यस्य व्यापकत्वे कथमापादकत्वं, व्यभिचारात्, व्याप्यत्वे तु सामर्थ्यं विनापि कारित्वं स्यादित्यनिष्टमित्यर्थः(४)॥

दीधितिटिप्पणी।

नाप्युपाधिभेदादिति मूलेऽवश्यं स चेत्यनुषङ्गः, तथा च सः व्यावर्त्यभेदेन विरोधः उपाधिभेदादित्यनन्वितम्, व्यावर्त्यभेदेनेत्यादि दूरीकृत्य उपाधिभेदाद्विरोधस्तन्मूलमित्यर्थकतया स्वातन्त्र्येणोत्थापनं च न सन्दर्भशुद्धम्, स चेत्यस्यैव प्रकृतत्वात् प्रतिज्ञातस्य व्यावर्त्यभेदेन विरोधो हीत्यादेस्त्यागानौचित्यात्, तस्मादेत

---

(१) असमर्थस्य करणे तु—कलि० मु० पु० पा०।

(२) तथा च कारित्वाभावेन कुशूलस्थबीजेऽसामर्थ्यसिद्धावपि क्षेत्रस्थबीजमसामर्थ्यवतो भिन्नं, सामर्थ्यादिति प्रधानानुमितिर्नैव स्यात्, कारित्वरूपसामर्थ्यवत्यपि तादृशासामर्थ्यस्य त्वयाभ्युपगतत्वेन तादृशहेतोरनैकान्तिकत्वादिति प्रधानानुमितिनिर्वाहायासामर्थ्यकरणयोरसामानाधिकरण्यरूपो विरोधस्त्वयाप्यभ्युपेय इति भावः। (३) नास्ति—पुण० पु० पा०।

(४) न्यूनाधिकदेशवृत्तित्व एव व्याप्यव्यापकभाव इत्याभिप्रायः।—इत्यधिकं पुण० पु०।

नाप्युपाधिभेदात् कार्यत्वानित्यत्ववत्, तदभावात्। न च शब्दमात्रमुपाधिः, पर्यायशब्दोच्छेदप्रसङ्गात्।

दीधितिः।

ननु माभूदिह स्व(१)व्यावर्त्यभेदेन विरोधः, स्वावच्छेदकोपाधिव्यावर्त्यभेदेन तु स्यात्, प्रागभावत्वध्वंसत्वलक्षणावच्छेदकोपाधिव्यावर्त्यभेदादिव कार्यत्वानित्यत्वयोरित्याशङ्क्य निराकरोति। नापीति। कार्यत्वेति। परेषामभावस्यालीकत्वेन वास्तवस्य व्यावर्त्यस्य विरहेपि व्यावहारिकं तद्बोध्यम्(२)। प्रागभावावच्छिन्नं सत्त्वं कार्यत्वं ध्वंसावच्छिन्नं चानित्यत्वम्(३)। स्वमतेनोक्तमित्यपि केचित्। शब्दमात्रम्(४) बोधकशब्दवृ-

दीधितिटिप्पणी।

दभिप्रायेणैवैतदुत्थानम्। तथाहि, व्यावर्त्यभेदेन विरोधस्तन्मूलमिति सत्यम्, तत्र च स्वव्यावर्त्येति न वाच्यम्, किन्तु स्वावच्छेदकेत्यादिरूपेणैवेत्याह, नन्वित्यादिना। विरोध इत्यनन्तरं तन्मूलमिति शेषः। एवमग्रेपि। स्वेति। स्वम् व्यावृत्तिः, तथा च स्वावच्छेदकस्य य उपाधिस्तद्व्यावर्त्यभेदेनेत्यर्थः। कार्यत्वानित्यत्वस्थले च व्यावृत्त्योरवच्छेदको(पाधी) ध्वंसत्वप्रागभावत्वरूपौ, तयोर्व्यावर्त्यौ ध्वंसप्रागभावरूपौ, तयोर्भेदेन ध्वंसप्रतियोगिप्रागभावप्रतियोगिनिष्ठव्यावृत्त्योरैक्यानुपपत्तिरित्यर्थः। ननु ध्वंसप्रागभावयोरलीकत्वेन न तद्रूपव्यावर्त्यभेद इत्यत आह। परेषामिति। कार्यत्वानित्यत्वयोर्मिथोऽव्यभिचारितया पूर्वमेव गतत्वात् सत्त्वगर्भमाह। प्रागिति। केषाञ्चिन्मतमाह। स्वमतेनेति। स्वमतेन नैयायिकमतेन, अतो न अलीकत्वदोषः। सत्त्वागर्भे पुनरत्रापि मते बोध्यम्। न च शब्दमात्रमिति मूलम्, तथा चावच्छेदकशब्दमात्रोपाधिभेदेन विरोधः स्यादित्यर्थः, स च न सम्भवति, शब्दस्य तादृशभेदवद्वृत्तेर्व्यावृत्त्यवच्छेदकत्वात्, न त्ववच्छेदकस्योपाधित्वं,तद्वृत्तेरेव तत्त्वादत आह। शब्दमात्रमिति।

(१) माभूदिहास्य—पाठः। (२) तन्मन्तव्यम्-पाठः। (३) सत्त्वं चानित्यत्वमिति-पाठः। (४) शब्दमात्र—कालि० मु० पु० पा०।

नापि विकल्पभेदः, स्वरूपकृतस्य तस्य व्यावृत्ति-भेदकत्वेऽसमर्थव्यावृत्तेरपि भेदप्रसङ्गात्, विषयकृतस्य तु तस्य(१) भेदकत्वेऽन्योन्याश्रयप्रसङ्गात(२) । न च निर्निमित्त एवायं व्यावृत्तिभेदव्यवहारः, अतिप्रसङ्गात्(३) ।

दीधितिः ।

त्तिरानुपूर्वीभेदादिः । उपाधिः, विरोधसम्पादक इति शेषः । पर्यायेति । बोधकशब्दभेदेन बोध्यव्यावृत्तिभेदे पर्यायोच्छेदः । भिन्नयोरभिन्नप्रवृत्तिनिमित्तकत्वं पर्यायत्वम् । विकल्पभेद इति । उपाधिरित्यादिकमनुषज्यते । भेदप्रसङ्गादिति । तथा च व्याप्ति-पक्षधर्मताज्ञानाभ्यां विषयीकृतयोर्भेदे क्व प्रसङ्गादिवार्तेति भावः ॥

दीधितिटिप्पणी ।

आनुपूर्व्यास्तु शब्दवृत्तित्वमस्त्येवेति न दोषः । एतावतापि स्वा-वच्छेदकोपाधीतिपर्यन्तं प्राप्तम्, तद्व्यावर्त्यभेदेनेति न प्राप्तम्, अतः पूरयति । उपाधिरिति । एवञ्च विरोधेत्यादेः स्वव्यावर्त्यभेदेनेत्यादि-पर्यन्तं लब्धम् । कथं पर्यायोच्छेद इत्यत आह । भिन्नयोरिति । तच्चात्र नास्तीति भावः । एतन्मतेऽतद्व्यावृत्तेरेव प्रवृत्तिनिमित्तत्वात् तद्भेदे च नैकप्रवृत्तिनिमित्तकत्वरूपपर्यायत्वमित्यर्थः । तथा चेत्यादि । ज्ञानभेदस्य व्यावृत्तिभेदकत्वे हेतुकृताया असमर्थव्यावृ-त्तेरपीदृशत्वाद्विभिन्नाभ्यां व्याप्तिपक्षधर्मताज्ञानाभ्यां भेदात् कथमेकत्र हेतौ व्याप्तिपक्षधर्मताज्ञाने येन प्रसङ्गस्तद्धेतुत्वे साधकः स्यात् । न च परामर्शात्मकविशिष्टज्ञानविषयत्वान्न तथेति वाच्यम् । तन्मते परामर्शानङ्गीकारात् । न च तन्मते यत्प्रकारकं व्याप्तिज्ञानं तत्प्रकारकं पक्षधर्मताज्ञानं कारणमुच्यते, तच्चैकस्मिन्नेव धर्मिणि भिन्ने चेति न

(१) कृतस्य तस्य—पुण० पु० पा० । (२) शङ्करमिश्रसम्मतोयं पाठः । भेदकत्वे परस्पराश्रयत्वप्रसङ्गात्—पुण० पु० पा । (३) प्रसङ्गादिति—पुण० पु० पा० ।

कोपि विशेष इति वाच्यम् । तथासति विकल्पभेदेन व्यावृत्तिभेद एकप्रकारकत्वमेवासिद्धम्, व्यावृत्तेरेव प्रकारतया विभिन्नज्ञानयोरेक-प्रकाराभावादिति भावः ॥

कल्पलता ।

ननु गोत्वाश्वत्ववत् परस्परपरिहारो वृक्षत्वशिंशपात्ववत् सामान्यविशेषभावो वा मास्तु, उक्तदोषात्, किं तु कार्यत्वानित्यत्ववत् समव्याप्तिरस्तु, तथा च स्यादेवाप्याद्यापादकभावो भेदाधीन इत्यत आह । नापीति । उक्तोपाधेरन्यस्मादुपाधिभेदादित्यर्थः । प्रागभावावच्छिन्नसत्तायोगित्वं(१) कार्यत्वं ध्वंसावच्छिन्नसत्तायोगित्व(१)मनित्यत्वमित्यु(२)पाधेर्भिन्नत्वमस्तु, प्रकृते तु न तथोपाधिरस्तीत्याह । तदभावादिति । ननु समर्थ(३)पदवाच्यत्वादन्यदेव कारि(४)पदवाच्यत्वमिति कथं न भेद इत्यत आह । न चेति । शब्दभेदादेव यद्यर्थभेदस्तदैकस्मिन्नर्थे शब्दानां वृत्तिः(५) पर्यायत्वं तन्न स्यादित्यर्थः(६) ॥

नापि द्वितीयः । सा हि सहकारिसाकल्यं वा प्रातिस्विकी वा ।

दीधितिः ।

प्रातिस्विकी प्रतिकारणजातीयानियता ॥

दीधितिटिप्पणी ।

प्रतिकारणेति । स्वं स्वं प्रतीति व्युत्पत्त्या बीजत्वादिरुच्यते ॥

(१) सत्ताप्रतियोगित्वं—पुस्त० पु० पा० । (२) मिति तद्‌—पुण० पु० पा० ।
(३) नन्वसमर्थ—पुण० पु० पा० । (४) देवाकारि—पुण० पु० पा० ।
(५) प्रवृत्तिः—पुण० पु० पा० । (६) यद्यपि शब्दभेदस्योपाधित्वेप्यभिन्नप्रवृत्तिनिमित्तकतया पर्यायत्वं स्यादेव, तथापि शब्दभेदादर्थभेदः कल्प्यत इति मते पर्यायशब्दोच्छेदो दूषणमित्यर्थः—इत्यधिकं पुण० पु० ।

कल्पलता।

कारित्वप्रकारकज्ञानात् समर्थत्वप्रकारकं ज्ञानमन्यदिति तद्भेदादपि न भेद इत्यत आह(१)। नापीति। स्वरूपकृतस्येति। ज्ञानव्यक्तिभेदमात्रकृतस्येत्यर्थः। अन्योन्याश्रयेति। विषयभेदाधीनो विकल्पभेदो विकल्पभेदाधीनश्च विषयभेद इत्यन्योन्याश्रय इत्यर्थः(२)॥

योग्यतापक्षं दूषयति। नापीति। सा हीति। प्रति स्वं नियता प्रातिस्विकी, यथा बीजेषु बीजत्वं तन्तुषु तन्तुत्वम्, तत्तत्कारणतावच्छेदिका जातय इत्यर्थः।

न तावदाद्यः पक्षः(३), सिद्धसाधनात, परानभ्युपग-

दीधितिः।

सिद्धसाधनादिति। सिद्धसाधनहेत्वासिद्धी विपर्ययप्रसङ्गयोः। परः स्थिरवादी। विपर्यये सिद्धसाधनं विवृणोति,

दीधितिटिप्पणी।

(४)कुशूलस्थबीजे नैयायिकैः सहकारिसाकल्यानभ्युपगमाद्धेत्वसिद्धिरिति प्रसङ्गे लगतीत्यभिप्रायेण व्युत्क्रमाभिधानमाह। सिद्धसा-

* प्रमादवशात्पूर्वमनिवेशितोऽयमंशः ४० पृष्ठीय ११ पङ्क्तौ संयोज्य पठनीयः।

(१) इत्याह--पुण० पु० पा०।

(२) अतिप्रसङ्गादिति। प्रयोजकविरहेपि यदि सामर्थ्यकारित्वयोर्भेदस्तदा त्वभिन्नेपि स्यादित्यर्थः।—इत्याधिकं पुण० पु०। (३) न तावदाद्यः,—पुण० पु० पा०।

(४) श्रीरामतर्कालङ्कारभट्टाचार्यविरचितस्यात्मतत्त्वविवेकदीधितिव्याख्यानस्यैकमेवादर्शपुस्तकमत्यशुद्धमुपलब्धमेतद्ग्रन्थमुद्रणारम्भसमयेऽस्माभिर्वाराणसीस्थराजकीयसरस्वतीभवनादिति तदवलम्ब्यैवास्माभिरतिश्रमेण मुद्रणकार्यमेतावत्पर्यन्तं कृतम्, परमिदानीं भगवदिच्छयाऽन्यदप्येकं पुस्तकं खण्डितमपि प्रायः शुद्धमधिगतमस्त्यत्रत्यानामेव स्वर्गीयपण्डितप्रवरश्रीनागेश्वरपन्तधर्माधिकारिणां तनुजन्मनः पण्डितश्रीलक्ष्मीधरपन्तधर्माधिकारिण इति महान् हर्षविषयः। एतत्पुस्तकलाभेन मुद्रणकार्यमतिसुलभमेव सञ्जातमिति सुधियो विदाङ्कुर्वन्तु। इतःपरं धर्माधिकारिपुस्तकं १ पुस्तकमिति व्यवहरिष्यत इति ध्येयम्।

मेन हेत्वासिद्धेश्च। यत् सहकारिसमवधानवत् तद्(१) करोत्येवेति को नाम नाभ्युपैति(२) यमुद्दिश्य साध्यते। न चाकरणकाले सहकारिसमवधानवत्त्वमस्माभि(३)-रभ्युपेयते यतः प्रसङ्गः प्रवर्तेत (४)।

दीधितिः।

यदित्यादिना। यदि कश्चिदकुर्वाणमपि कारणजातीयं सहकारिसमवहितमभ्युपेयात् तदा तं प्रति तस्याकारित्वेन सहकारिसमवधानाभावः साधयितुमुचितः, न त्वेतदस्ति; सहकारिसमवहिते करणनियमाभ्युपगमेनार्थतोऽकारिणः सहकारिसमवधानाभावनियमस्याप्यभ्युपगतत्वात्, तथा चाकुर्वाणे सहकारिसमवधानाभावसाधने सिद्धसाधनमिति भावः। यत्तु सहकारिसमवहिते(५) सहकारिसमवधानेन करणप्रसञ्जने सिद्धसाधनमिष्टापत्तिरिति, तन्न, तादृशप्रसङ्गस्याप्रस्तुतत्वेन तत्र दूषणोपन्यासायोगात्॥

दीधितिटिप्पणी।

धनेति। यथाश्रुतमूले विपर्ययीयसाध्यादर्शनात्तत्र सिद्धसाधनप्रदर्शनमेतस्य न शब्दतो लभ्यते, अतोऽर्थतो व्यतिरेकमर्थेन तथा दर्शयति। यदि कश्चिदित्यादि। इदमेवोपसंहरति। तथा चेति। प्रसङ्ग एव सिद्धसाधनं व्याख्यातॄणां मते आह। यत्त्विति। एतन्मते सहकारिसमवहितक्षेत्रादिस्थबीजमेव पक्षः, अत एव सप्तम्यन्तेन पक्षकथनम्। तर्के सिद्धसाधनाभावादिष्टापत्तिपर(ता)माह। सिद्धसाधनमिति। तादृशप्रसङ्गस्य सहकारिसमवहितपक्षकप्रसङ्गस्य। अप्रस्तुतत्वेनेति। क्षेत्रस्थप्रतियोगिकभेदसाधनाय कुशूलस्थासामर्थ्यसाधनस्यैव तस्योद्देश्यतया तत्पक्षकस्याप्रस्तावोचितत्वमिति भावः॥

(१) तत्—पुण० पु० पा०। (२) नाभ्युपगच्छति—पाठः।
(३) समवधानवत्त्वास्माभि—पुण० पु० पा०। (४) प्रवर्तेत—पुण० पु० नास्ति।
(५) पक्षे इति शेषः।

कल्पलता।

सिद्धसाधनादिति। (सङ्गहं) विवृणोति। यदिति। परानभ्युपगमेनेति। विवृणोति। न चेति। अकुर्वतः कुशूलस्थस्य बीजस्य परेण नैयायिकेन सहकारिसमवधानानभ्युपगमात् तर्कस्य पराभ्युपगममादायैव प्रवृत्तेरित्यर्थः॥

प्रातिस्विकी तु योग्यता अन्वयव्यतिरेकविषयीभूतं(१) बीजत्वं वा स्यात् तदवान्तरजातिभेदो वा सहकारिवैकल्य(२)प्रयुक्तकार्याभाववत्त्वं वा।

दीधितिः।

अन्वयव्यतिरेकेति। अन्वयव्यतिरेकग्रहेत्यर्थः। बीजत्वमिति बीजमधिकृत्य। एतच्च बीजस्यैवा(३)ङ्कुरजनकत्वमिति मतेन। बीजे विनष्टे तदवयवेभ्य एवाङ्कुरोत्पाद इति मते(४) तु कपालादिव्यावृत्तकलमयवाद्यवयवानुगतजातिविशेषपरं बीजत्वपदमिति वदन्ति। तदवान्तरेति। बीजत्वव्याप्यं कुर्वद्रूपत्वं वेत्यर्थः। कार्याभावः कार्यकारित्वाभावः। चरम-

दीधितिटिप्पणी।

ननु दण्डत्वादिकं विहाय कथं बीजत्वमेवोक्तमत आह। बीजत्वमितीति। तथा च प्रकृतस्थले बीजं प्रक्रान्तमिति तदुक्तम्। एतच्च बीजत्वमिति योग्यतावच्छेदकमिति कथनम्। कपालेत्यादि। कपालादिपदेन बीजेतरस्यावयवोपलक्षणम्, तथा च कपालादौ न वर्तते कलमयवादिरूपबीजानामवयवे वर्तते या जातिः सैवात्र बीजत्वपदेनोच्यत इत्यर्थः। तादृशजातिसिद्धिश्च बीजजनकतावच्छेदकतया। ननु निमित्तकारणे सहजत एव कार्याभावोऽस्ति, कथं सहकारिविरह-

(१) विषयीभूतं पुण० पु० पा०। (२) सहकारिव्यतिरेक—पुण० पु० पा०।
(३) बीजस्या—पाठः। (४) इति मतेन—कलि० मु० पु० पा०।

दीधितिः ।

कारणस्याप्युत्तरकाले कार्यकारित्वाभावः सहकारिविरहप्रयुक्त इति भावः । यथाश्रुतं त्वस्माकं निमित्तासमवायिनोः परेषामुपादानस्याप्यसिद्धमिति द्रष्टव्यम् ॥

दीधितिटिप्पणी ।

प्रयुक्तः स्यादत आह । कार्यकारित्वाभाव इति । ननु चरमकारणे कार्यकारित्वाभावरूपविशेषस्यासत्त्वान्न सहकारिविरहेत्यादिरूपवत्ता स्यादत आह । चरमेति । तस्यापि कार्यद्वितीयक्षणे कार्यकारित्वाभावः सहकारिविरहप्रयुक्त एवेति भावः । कारित्वपर्यन्तव्याख्याप्रयोजनमाह । यथाश्रुतं त्विति । निमित्तासमवायिनोरित्यसिद्धमित्यनेनान्वयि । परेषामिति । न च तन्मतेऽयथाश्रुतमप्यसिद्धम्, न हि तेनोपादाने सहकारिविरहप्रयुक्तकार्यकारित्वाभावोऽप्यङ्गीक्रियते, क्षणिकत्वात्, तथा च यथाश्रुतेपि तत्रासिद्धौ को दोष इति वाच्यम् । भावानवगमात् । तथाहि, अयं यथाश्रुतहेतुः कस्य मते कुतः, यद्यस्माकं मते, तदा निमित्तासमवायिनोरसिद्धिः, अथ परमते, तदा तेषामुपादानेऽप्यसिद्धमिति भावः, तथा चोभयथापि यथाश्रुतं न समीचीनम्, व्याख्यातं तु नैयायिकमत एव समीचीनमिति भावः ॥

कल्पलता ।

बीजे सत्यङ्कुरं तद्विना नेत्यन्वयव्यतिरेकौ । तदवान्तरजातिभेदः कुर्वद्रूप(व)त्वं पराभ्युपगतमित्यर्थः । उभयसाधारणीं योग्यतामाह । सहकारीति । सहकारिवैकल्यप्रयुक्तो व्याप्यो यः कार्याभावस्तद्वत्त्वमित्यर्थः । शिलाशकले कार्याभावो न सहकारिवैकल्यप्रयुक्तः, किं तु शिला(१)त्वप्रयुक्त एव । बीजे सहकारिसाकल्ये कार्याभावो न भवत्येव ॥

---

(१) शिलाशकल—पुण० पु० पा० ।

न तावदाद्यः, अकुर्वतोपि बीजजातीयस्य प्रत्यक्षसिद्धत्वात्, तवापि तत्राविप्रतिपत्तेः।

दीधितिः।

अकुर्वतोपीत्यादि। तथा च बीजत्वस्य करणव्यभिचारोऽकरणस्य बीजत्वाभावव्यभिचारश्चोभयसिद्ध इति न प्रसङ्गविपर्ययप्रवृत्तिरिति भावः।

दीधितिटिप्पणी।

तथा चेति। क्रमेण तयोर्व्यभिचारप्रदर्शनम्॥

कल्पलता।

अकुर्वतोपीति। यदि कुशूलस्थं बीजं स्यात् तदा कुर्यादिति प्रसङ्गः, न च करोति तस्मान्न बीजमिति विपर्ययश्च व्यभिचारबाधाभ्यामनुपपन्न इत्यर्थः॥

न द्वितीयः(१), तस्य कुर्वतोपि(२) मयानभ्युपगमेन दृष्टान्तस्य साधनविकलत्वात्, को हि

दीधितिः।

तस्य कुर्वद्रूपत्वस्य, दृष्टान्तस्य अङ्कुरकारिणो बीजस्य, साधनम् प्रसङ्गसाधनं कुर्वद्रूपत्वम्, तद्विकलत्वम् तदप्रसिद्ध्या तद्वत्त्वग्रहाभावः, तथा च प्रसङ्गे हेतोरप्रसिद्धिः, अत एव तदभावरूपस्य

दीधितिटिप्पणी।

विपर्ययसाधने वैकल्याभावादाह। साधनमिति। तद्वत्त्वग्रहाभाव इति। यद्यपि तद्वत्त्वग्रहस्याप्यप्रसिद्ध्या तदभावोऽपि वक्तुं न शक्यत एव, तथापि ग्रहे प्रसिद्ध्यावत्पदार्थान्यतराविषयताकत्वे तात्पर्यम्। नन्वेवं मूलेन प्रसङ्ग एव दोषदाने विपर्यये न कोपि दोषः स्यादत आह। अत एवेति। यत एव प्रसङ्गहेतोरप्रसिद्धिः, अत एवैतद्-

(१) नापि द्वितीयः पाठः। (२) कुर्वत्यपि—पुण० पु० पा०। अयमेव समीचीनः।

नाम सुस्थात्मा प्रमाणशून्यमभ्युपगच्छेत । स हि न तावत्(१)* प्रत्यक्षेणानुभूयते, तथानवसायात् । नाप्यनुमानेन, लिङ्गाभावात् । यदि न कश्चिद्विशेषः,

दीधितिः ।

विपर्यये साध्यस्याप्रसिद्धिः, अतो व्याप्यत्वासिद्ध्या नैकस्यापि प्रवृत्तिरिति भावः । नानभ्युपगममात्रेण प्रामाणिकोऽर्थो निवर्तेत इत्यत आह(२)। को हीति। प्रत्यक्षम् निर्विकल्पकम्, अनुभवनम् विषयीकरणम् । प्रत्यक्षम् इन्द्रियम्, अनुभवः निर्विकल्पकमिति वा । अवसायः सविकल्पकम्, तदभावे निर्विकल्पकाभावस्य तवाप्यभिमतत्वादिति भावः । बीजमङ्कुरं करोतीति बुद्धेश्च फलोपहितं स्वरूपं फलाव्यवहितप्राक्कालवृत्ति स्वरूपं वा विषयो न तु कुर्वद्रूपत्वमिति । लिङ्गाभावादिति । साध्याप्रसिद्ध्या व्याप्यत्य-

दीधितिटिप्पणी ।

तोरभावोपि विपर्ययसाध्योऽप्रसिद्ध इत्यर्थः । अत इति । प्रसङ्ग हेत्वप्रसिद्धिरूपा व्याप्यत्वासिद्धिः, विपर्यये च साध्याप्रसिद्धिरूपेति भावः । (३)को हीति । तथा च प्रामाणिकत्वमेव खण्डितमिति भावः। तथानवसायादित्यनेन निर्विकल्पकीयप्रमाणाभावो दर्शितः, स चात्र निर्विकल्पकप्रदर्शनेनैव लगतीत्यत आह । प्रत्यक्षमिति । निर्विकल्पकस्यानुभवाभावादाह । अनुभवनमिति । अपरप्रकारमाह । प्रत्यक्षमिन्द्रियमिति । वाकार एकतरसूचकः । अभिमतत्वादिति । निर्विकल्पके सविकल्पकस्यैव प्रमाणत्वादिति भावः । *बीजमङ्कुरं करोतीत्यादिसाविकल्पकमेव तत्र मानमित्यत्राह । बीजमित्यादि । फलाव्यवहितप्राक्काले तदुपधानाभावा(४)दाह । फलाव्यवहितेति ।* साध्याप्रसिद्ध्येति । तथा च लिङ्गपदेनात्र गृहीतव्याप्तिक एवोच्यत इति

(१) तावत्—पुण० पु० नास्ति । (२) इत्याह-कालि० मु० पु० पा० ।

(३) रूपभावः । रूपकेति । ईश्वरे । कोहीति इत्यादर्शपुस्तके पाठः ।

* एतच्चिह्नान्तर्गतो ग्रन्थः २ पुस्तक एव वर्तते । गुणानन्दीयटीकायामप्ययमक्षरश उपलभ्यते । (४) फलोपहितमित्यस्य फलोपधानविशिष्टमित्यर्थः, अङ्कुरोत्पत्तिप्रयोजकताविशिष्टमिति

कथं तर्हि(१) करणाकरणे इति चेत्, क एवमाह नेति । परं(२) किं जातिभेदरूपः सहकारिलाभालाभरूपो वेति नियामकं प्रमाणमनुसरन्तो न पश्यामः । तथापि योऽयं सहकारिमध्यमध्यासीनोऽक्षेप-

दीधितिः ।

ग्रहेण लिङ्गत्वायोगादिति । तज्जातीयत्वाविशेषेऽपि करणाकरणे न विना प्रयोजकविशेषमुपपद्येते,(३)अतः करणोपपादकतया विशेषः सिध्यन् परिशेषाज्जातिरूप एव सिद्ध्यति, तदभावादेव चाकरणमित्याशङ्कते । यदीति । जातिभेदः कुर्वद्रूपत्वम् ,तद्रूपः तत्स्वरूपः तन्निरूप्यस्तदभावश्च । जातिभेदस्याभिधानात् तदभावोऽप्यर्थतो लब्ध इत्यन्ये । न पश्याम इति । साध्यसन्देहेऽपि न परिशेषावकाश इत्यभिप्रायेण । तथापीति । स्वोत्पत्त्यव्यवहितोत्तरका-

दीधितिटिप्पणी ।

भावः । विनेति प्रयोजकविशेषान्वयि । जातिभेदरूप इत्यनेन करणाकरणानियामक उच्यते, तत्र केवला जातिः करणनियामिका, न तु तदभावनियामिका, तथा च तदनभिधाने न्यूनता स्यात्, अत एवाग्रे सहकारिलाभालाभेत्युभयमुक्तम्, अतोऽत्र जातिभेद(रूप)शब्दस्यैव जातितदभाववाचकत्वमाह । जातिभेद इत्यादि । तत्स्वरूप इति । तत्स्वरूपोऽप्युक्तः तन्निरूप्यः तदभावः, सोऽप्युक्त इत्यर्थः । नन्वेवं न पश्याम इत्यादिना स्वोक्तस्याप्यनिर्णयदर्शनान्न स्वमतसिद्धिरत आह । सन्देहेपीति । तथा चेदृशसन्देहेपि भवदुक्तपरिशेषो नावतरतीत्यभिप्रायेण सन्देहो दर्शितः, वस्तुतः पुनः सन्देह एव नास्तीति भावः । स्वोत्पत्तीत्यादि । न चैवमेतावतापि न क्षणिकत्वसिद्धिः स्यात्, स्वद्वितीयक्षण यावत्, उत्पत्तिप्रयोजकतायाः करोत्यर्थत्वात् वैशिष्ट्यस्याख्यातार्थत्वात्, तत्रोत्पत्तिप्रयोजकत्वं कारणस्वरूपं न सम्भवति, तथात्वेऽन्यदापि तत्प्रसङ्गात्, किं तूत्पत्तिकाल एव, तस्याभावादित्यर्थः ।

(१) तर्हि-पुग० पु० नास्ति । (२) परन्तु-पुग० पु० पा० । (३) उपपद्येत-कालि० मु० पु० पा० ।

करणस्वभावो भावः स यदि प्रागप्यासीत् तदा प्रसह्य कार्यं(१) कुर्वाणो गीर्वाणशापशतेनाप्यपहस्तयितुं न(२) शक्यत इति चेत्, युक्तमेतत यद्यक्षेपकरणस्वभावत्वं(३)भावस्य प्रमाणगोचरः स्यात्, तदेव (४)कुतः

दीधितिः।

ल(५)वृत्तिकार्यमात्रकारित्वं स्वकार्यव्यवहितप्राक्कालावृत्तित्वं स्वकार्यप्रागभावसमानकालीनध्वंसप्रतियोगिसमयावृत्तित्वं स्वोत्पत्तिक्षण(६)एव कारित्वं वाऽक्षेपकारित्वम्। तथा च पूर्वं कार्यानुत्पादात् तदानीन्तनानामक्षेपकरणस्वभावस्य विरहेण बीजत्वस्य

दीधितिटिप्पणी।

एव कार्यं जनयित्वा कार्याजनकस्य शतशः प्रचुरकालावस्थायित्वेऽप्येतद्रूपसत्त्वादिति वाच्यम्। एतावतापि प्रकृतनिर्वाहात्। यद्वा तथापि तेनावश्यं स्वध्वंसो जननीयः, तथा च द्विक्षणावस्थायित्वे नैतद्रूपनिर्वाह इत्यदोषः। उत्पत्तिघटितस्य गुरुतया एतदपेक्षया लाघवात्(७) प्रकारान्तरमाह। स्वकार्यव्यवहितेति। अत्र स्वकार्यव्यवहितप्राक्कालत्वं स्वकार्यप्रागभावाधिकरणकालप्रागभावाधिकरणकालत्वरूपं न सम्भवति,कार्यव्यवहितप्राक्कालवृत्तिस्थूलकालस्यापि तथात्वेनासम्भवापत्तेः, क्षणत्वरूपेण प्रवेशे गौरवात्, अतः प्रकारान्तरमाह। स्वकार्यप्रागभावेति।· आचार्यानुरोधादाह। स्वोत्पत्तीति। उत्पत्तेरनन्तरमेव करणमित्यनेनाचार्यैः(८)रेतल्लक्षणस्य कर्तव्यत्वात्। कार्यानुत्पादात् स्वकीययावत्कार्यानुदयात्, अन्यथा अङ्कुररूपयत्किञ्चित्कार्यस्य पूर्वमुत्पादेपि तदानीं ध्वंसरूपकार्यानुत्पादादक्षेपकरणत्वाभावात् पूर्वमित्यादिहेतुकथनमसङ्गतं स्यात्।?तदानीन्तनानाम् कुशूलस्थादीनाम। पूर्वोक्तप्रसङ्गविपर्ययोरक्षेपकारित्वसा

(१) कार्यं—पुण० पु० नास्ति। (२) शतेनापि नापहस्तयितुं—पुण० पु० पा०।
(३) करणधर्मत्वं—पाठः। (४) तदेव तु—पुण० पु० पा०।
(५) त्तरसमय–कालि० मु० पु० पा०। (६) त्तिसमय–कालि० मु० पु० पा०।
(७) एतदपेक्षया लघु–पा० २ पु०। (८) करणमित्याचार्यैः–पा० २ पु०। अयमेव युक्तः

सिद्धमिति नाधिगच्छामः(१)। प्रसङ्गतद्विपर्ययाभ्यामिति चेन्न, परस्पराश्रयप्रसङ्गात् । एवंस्वभावत्वसिद्धौ(२) *(हि) तयोः प्रवृत्तिः, तत्प्रवृत्तौ चैवंस्वभावत्वसिद्धिरिति(३)।

दीधितिः ।

तन्नियामकत्वानुपपत्त्या तन्नियामकं कुर्वद्रूपत्वं नाम जात्यन्तरमास्थेयमिति भावः। तादृशस्वभावत्वासिद्धौ सत्यामेवमेतद्(४), तदेव त्वसिद्धमित्याह, युक्तमित्यादिना । प्रसङ्गेति । यन्न यत्कार्याक्षेपकारि तन्न तत्कारि यथाऽलीकम्, शिलाशकलं वा, नाङ्कुराक्षेपकारि च सामग्रीसमवहितं बीजमुपेयते परैरिति प्रसङ्गः, यद्यदङ्कुरं करोति तत् तदक्षेपकारि यथा धरण्यादिभेदः, करोति चाङ्कुरमिदं बीजमिति विपर्ययः । परस्परेति। चक्रकेऽपि परस्पराश्रयत्वमक्षतम् ॥

दीधितिटिप्पणी ।

धकत्वाभावात् तदन्यौ तौ दर्शयति । यन्नेत्यादि । यत् प्रसङ्गे हेतुः क्रियते तद्विपर्यय एव विपर्यये साध्यं क्रियते अतः प्रसङ्गेऽक्षेपकारित्वं न साध्यं कृतम् । स्थिरवादिमते ध्वंसविशेष एवाक्षेपकारित्वसिद्धिः, येनोत्पत्तिद्वितीयक्षण एव ज्ञानं जनितमिति । अत्र च सामग्रीसमवहितबीजस्य पक्षत्वम् । परैरिति । क्षेत्रस्थबीजस्यापि स्वकार्यव्यवहितप्राक्कालावृत्तित्वस्य नैयायिकैरनङ्गीकारादित्यर्थः । एवंस्वभावत्वसिद्धाविति मूलम्, कुत्रापि वस्तुनि अक्षेपकारित्वस्य-

(१) नावगच्छामः— पुण० पु० पा० ।

(२) स्वभावसिद्धौ—पाठः । अयमेव भगीरथाभिप्रेतः ।

* () मूल एतच्चिन्हान्तर्गतो ग्रन्थः पुणतामकरसम्मतो न भवतीति सर्वत्र ज्ञेयम् ।

(३) स्वभावत्वमिति—पुण० पु० पा० ।

(४) सत्यामेतत्-पा० २ पु० । सत्यामेव तत्-पाठः ।

दीधितिटिप्पणी ।

भावसिद्धौ साध्यसिद्धौ सत्यामेवानयोरभावः सिद्ध्यतीति स्या-दित्यर्थः ॥

कल्पलता ।

कुशूलस्थं बीजं यदि कुर्वद्रूपत्वजातिमत् स्यात् कुर्यात् क्षेत्रपतितबीजवदिति प्रसङ्गं निरस्यति । नहीत्यादि इति । तस्य जातिविशेषस्य । दृष्टान्तस्येति । क्षेत्रपतितेऽपि बीजे कुर्वद्रूपत्वं नास्ति, तथा चापादक-विकलो दृष्टान्त इत्यर्थः। ननु तत्रानभ्युपगममात्रेण कथं जातिविशेषविरह इत्यत आह। को हीति। प्रमाणाभा-वाधीन एवानभ्युपगमो ममेति भावः। प्रमाणाभाव-मेवोपपादयति । स हीति । अनुभवः आलोचनम्(१), तस्यैव तन्मते प्रमाणत्वात्। तथानवसायादिति । अव-सायः सविकल्पकम्, तदेवालोचनोन्नायकम्, तदभावा-दालोचने प्रमाणान्तरं(२) नास्तीत्यर्थः।लिङ्गाभावादिति। स चानुपलम्भादिति भावः।(ननु) करणा(३)न्यथानुपपत्त्यु-न्नेय एव जातिविशेषस्तदभावश्चाकरणो(४)न्नेयः कुशूल-स्थ इत्याह। यदीति। अर्थापत्तावन्यथोपपत्तिशङ्कामाह। क एवमाहेति। सहकारिलाभाधीनं करणं तदभावाधी-नमकरणमिति(५) यद्यपि निश्चय एव,तथाप्यापाततः स-

(१) निर्विकल्पकमित्यर्थः।

(२) प्रमाणं-पुण० पु० पा०। अयमेव युक्तः।

(३) कारणा-पुण० पु० पा०।

(४) कारणो-पुण० पु० पा०।

(५) तदलाभाधीनमकरणमिति— कालि० मु० पु० पा०।

कल्पलता।

न्देहादप्यर्थापत्ति(१)र्दूषिता भवति(२) तमेवाह। परमिति। बीजस्याक्षेपकरणस्वाभाव्ये साध्येपि(३) पूर्वापरबीजयोरैक्ये दोषमाह। तथापीति। वस्तुत एवाक्षेपकरणस्वाभाव्ये दोषोयं(४) न त्वन्यथापीति परिहरति। युक्तमेतदिति। अक्षेपकारित्वस्वाभाव्यं वास्तवं शङ्कते। प्रसङ्गेति। बीजं यदि अक्षेपकरणस्वभावं न स्यात् न कुर्यात्, करोति च, तस्मादक्षेपकारिस्वभावमिति प्रसङ्गविपर्ययाभ्यामक्षेपकारिस्वाभाव्यसिद्धिरित्यर्थः। परिहरति। परस्परेति।(५) अक्षेपकरणस्वाभाव्यस्य प्रतियोगिनः प्रसिद्धौ तदभावमादाय प्रसङ्ग(६)प्रवृत्तिस्तत्प्रवृत्तौ च स्वाभाव्यसिद्धिरित्यर्थः॥

स्यादेतत्। कार्यजन्मैव अस्मिन्नर्थे प्रमाणं, त्रिल-

दीधितिः।

अस्मिन्नर्थे अक्षेपकारित्वे। अक्षेपविलम्बयोरन्यस्य प्रकार-

दीधितिटिप्पणी।

ननु विलम्बकारिस्वभावानुवृत्ताविति मूलमसङ्गतम्, अक्षेपकारित्वाभावविशिष्टस्य विलम्बकारिस्वभावत्वेन नियमाभावात्, इतरस्वभावस्यापि सम्भवादत आह। अक्षेपविलम्बयोरिति।

---

(१) सन्देहादप्यर्थापत्ति—पुण० पु० पा०।

(२) भवतीति—पुण० पु० पा०। अयमेव युक्तः।

(३) स्वाभाव्यमारोप्य—पाठः। अयमेव युक्तः, वस्तुत एवाक्षेपकरणस्वाभाव्ये दोषोयमित्युत्तरग्रन्थस्वारस्यात्।

(४) स्वाभाव्यदोषोयं-पुण० पु० पा०।

(५) परिहरति। नेति—कलि० मु० पु० पा०।

(६) प्रसङ्गविपर्यययोः—पुण० पु० पा०।

म्बकारिस्वभावानुवृत्तौ कार्यानुत्पत्तिः सर्वदे(१)ति चेन्न, विलम्बकारिस्वभावस्य सर्वदैवाकरणे तत्त्वव्याघातात् । ततश्च विलम्बकारीत्यस्य यावत् सहकार्यसन्निधानं तावन्न करोतीत्यर्थः । एवं च कार्यजन्म(२) सामग्र्यां प्रमाणयितुं

दीधितिः ।

स्याभावा(३)द्विलम्बबाधे परिशेषादक्षेपसिद्धिरिति भावः । विलम्बो ह्यत्राकरणम्, तच्च सर्वदैव, कदाचिद्वा । आद्ये विलम्बकारित्वासिद्धिः, द्वितीये तु कार्योत्पत्तेरविरोधान्न परिशेषावतारः, तथा चाक्षेपकरणस्वभावस्यासिद्धौ न तन्नियामकत्वेन कुर्वद्रूपत्वसिद्धिरित्याह, न विलम्बेत्यादिना । एतेनाविवक्षितविशेषं सामान्यतो जनकतावच्छेदकरूपवत्त्वमेव सामर्थ्यमभिहितमिति परास्तम्, स्वरूपयोग्यस्यापि करणप्रयोजकसहकारिसाहित्य-

दीधितिटिप्पणी ।

न परिशेषावतार इति । विलम्बकारित्वे कार्यानुत्पादभिया परिशेषादक्षेपकारित्वासिद्धिस्त्वया क्रियते, तथा च विलम्बकारित्वपक्षेऽपि कार्योत्पादो यदि न विरुद्ध्यते, तदा किंनिबन्धनमक्षेपकारित्वं सेत्स्यतीति भावः । एतेन प्रघट्टकेन(४) । अभिमतम्,(५) प्रसङ्गहेतुत्वेन । प्रघट्टकमेवाह । स्वरूपयोग्यस्येति । मूलेति । एतद्व्याप्तेर्मूलस्य

(१) वृत्तौ सर्वदा कार्यानुत्पत्तिरि-पुण० पु० पा० ।

(२) जननं-पुण० पु० पा० ।

(३) स्यासम्भवा-कलि० मु० पु० पा० ।

(४) एतादृशप्रघट्टकप्रतिपाद्येन सहकारिसाहित्यस्य करणप्रयोजकत्वेनेत्यर्थः ।

(५) एतादृशप्रतीकधारणेन दीधितौ 'सामर्थ्यमभिमतम्' इति पाठष्टिप्पणीकृन्मत इति विज्ञायते ।

शक्यते, न तु जातिभेदे। ते तु किं यथानुभवं विलम्ब-कारिस्वभावाः परस्परं प्रत्यासन्नाः कार्यं कृतवन्तः, किं वा यथात्वत्परिकल्पनं क्षिप्रकारिस्वभावा इत्यत्र कार्यजनन(१)मजागरूकमेवेति।

दीधितिः।

विरहेणाकरणोपपत्तेर्मूलशैथिल्यात्। ते बीजादयः(२)॥

दीधितिटिप्पणी।

समर्थस्य क्षेपायोगादिति व्याप्तेः(३) शैथिल्यमित्यर्थः। मूले, यथानुभवम् अनुभवानतिक्रमेण। यथात्वत्परिकल्पनम् त्वत्परिकल्पनानतिक्रमेण॥

कल्पलता।

ननु विलम्बकारित्वे कदापि कार्यजन्म न स्यादिति तदन्यथानुपपत्त्यैवाक्षेपकारित्वसिद्धिरिति शङ्कते। कार्येति। विलम्बकारित्वेपि कार्यजन्मोपपद्यत एवेत्याह। विलम्बेति। ननु विलम्बकारित्वस्वाभाव्यं चेत् तदा ध्वंसपर्यन्तं तत्स्वाभाव्यानुवृत्तौ कार्यजन्म न स्यादेवेति विलम्बकारित्वमन्यथा समर्थयति। ततश्चेति। ततश्च यदधीनं कार्यजन्म तत् तदेव गमयेत्, न त्वक्षेपकारित्वमित्याह। एवं चेति। न तु(४) जातिभेदे पराभ्युपगते। विलम्बकारित्वेपि कार्यजन्मोपपा-

(१) कर्मोपजनन—पाठः।

(२) ते बीजादयः-इति क्वचिन्नास्ति।

(३) यदि कुशूलस्थबीजमङ्कुरजनकतावच्छेदकरूपवत् स्यात् अङ्कुरकारि स्यादिति प्रसङ्गमूलीभूताया यदङ्कुरजनकतावच्छेदकरूपवत्तन्नाङ्कुराकारीत्यर्थक-'समर्थस्य क्षेपायोगात्'-इतिवाक्यप्रतिपाद्याया इत्यर्थः।

(४) न च-पुण० पु० पा०।

कल्पलता ।

दयति । ते त्विति । सामग्रीघटकाः सहकारिण इत्यर्थः । तथा चाक्षेपकारित्वे कार्यजन्माप्रयोजकमिति भावः ॥

नापि तृतीयः, विरोधात् । सहकार्यभावप्रयुक्तकार्याभाववांश्च सहकारिविरहे कार्यवांश्चेति व्याहतम् । त-

दीधितिः ।

नापीत्यादि । यद्यदा सहकारिविरहप्रयुक्तयत्कार्याभाववत् तत् तदा तत्कार्यं करोतीत्येव(१)वा प्रसङ्गः, किं वा यदा तदेति परित्यज्य । नाद्यः, विरोधात् । द्वितीयेपि किमापाद्यापादकयोर्यौगपद्येन सामानाधिकरण्यस्य ग्रहः, कालभेदेन वा । नाद्यः, विरोधेन तथाग्रहासम्भवात् । द्वितीये तु एकस्यैव धर्मिणः पूर्वापरकालावस्थायित्वलक्षणं स्थैर्यमवगाहमाना सामानाधिक-

दीधितिटिप्पणी ।

कार्याभावकार्ययोरेककाल एव विरोधः, अतो भिन्नकालोक्तौ न कोपि दोषः स्यादतो विकल्पस्य न्यूनतां परिहरति । यद्यदे-त्यादि । यौगपद्येनेति । न च यदा तदेत्यस्य परित्यागे कथं यौगपद्यं लब्धमिति वाच्यम् । अत्र संसर्गविधयैककालत्वस्य लब्धत्वात्, अत एव न पूर्वेण पौनरुक्त्यम्, तत्र तस्य प्रकारत्वात्, केवलं न्यूनत्वपरिहारार्थमेव तदुपादानमिति न दोषः । द्वितीये त्वित्यादि । कालभेदेन विवक्षणेयमर्थः स्यात्, यद्बीजमेककाले सहकार्यभावप्रयुक्तकार्याभाववत् तत् तदन्यकाले कार्यवत्, एवं चैकबीजस्योभयकालीनत्वावगाहनमेव क्षणिकत्वविरोधीति भावः । यथाश्रुते यदभावेत्यसङ्गतम्, न हि चक्राभाव एव दण्डो घटं न करोति, अपि

---

(१) अयं पाठः क्वचिदुपलभ्यते । करोत्येव–कलि० मु० पु० पा० ।

स्माद्यद्यदभाव एव यन्न करोति, तत् तत्सद्भावे तत् करोत्येवेति (तु) स्यात्। एतच्च स्थैर्यसिद्धेरेव परं बीजसर्वस्वमिति(१)।

दीधितिः।

रणबुद्धिरेव क्षणिकत्वं विरुणद्धीत्यर्थः। यदित्यादावेवकारौ भिन्नक्रमेण(२), यदेव तदेवेति। यदभावे यस्य सहकारिसाकल्यस्याभावे, इत्यन्ये। तौ च नियतान्वयव्यतिरेकाभ्यां कार्यकरणाकरणयोः सहकारिसमवधानासमवधानप्रयुक्तत्वस्य प्रदर्शनाय॥

दीधितिटिप्पणी।

तु सलिलाद्यभावेपीत्येवकारासङ्गत्याऽऽह। एवकाराविति। भिन्नक्रम इति। एतत्क्रमातिरेके न दोषावहमित्यर्थः। तदेवाह। यदेवेति। अत्र चैवकारः स्वरूपार्थक एव, अन्यथाऽसङ्गतः, दण्ड एव करोतीत्यस्यापि वक्तुमसम्भवित्वात्। नन्वेवमेवकारद्वयोक्तोभयमते निष्प्रयोजनावत आह। तौ चेति। आद्यैवकारेणाकरणस्य सहकारिविरहप्रयुक्तत्वं दर्शितम्, द्वितीयेन तु करणस्य सहकारिसमवधानप्रयुक्तत्वमिति भावः॥

कल्पलता।

ननु कुशूलस्थं बीजं यदि सहकारिविरहप्रयुक्तकार्याभाववत् स्यात् कुर्यात्, न च करोति, तस्मान्न तथेति प्रसङ्गविपर्ययौ स्यातामित्यत आह। नापीति। कुशूलस्थस्य सहकारिवैधुर्यमुभयासिद्धम्, तथा च सहकारिविधुरं बीजं यदि सहकारिविरहप्रयुक्तकार्याभाववत् स्यात् तदा कुर्यादिति विरुद्धमित्याह।

---

(१) अयमेव पुणतामकरसंमतः पाठो युक्तः, 'बीजम् प्रत्यभिज्ञानम्, तस्य सर्वस्वं, उपपादकत्वात्' इति भगीरथेन व्याख्यानात्। बीजं सर्वस्वम्-कालि० मु० पु० पा०।

(२) भिन्नक्रमे-पाठः। अयमेव टिप्पणीकृत्सम्मतः।

कल्पलता ।

विरोधादिति । तस्मात् यत् सहकारिविरहान्न करोति तदेव सहकारिसत्त्वे करोतीत्यायातम्, तच्च स्थैर्यसिद्धावेव स्यादित्याह । तस्मादिति ॥

एतेन समर्थव्यवहारगोचरत्वं हेतुरिति निरस्तम्, तादृग्व्यव(१)हारगोचरस्यापि बीजस्याङ्कुराकरणदर्शनात । नासौ मुख्यस्तत्र व्यवहारः(२), तस्य ज(३)ननिमित्तकत्वात्, अन्यथा त्वनियमप्रसङ्गादिति

दीधितिः ।

समर्थेति । तथा च न प्रागुक्तसाध्यावैशिष्ट्यमिति भावः । हेतुः प्रसङ्गहेतुः । तादृगित्यादि । तथा च व्यभिचार इति भावः । मुख्यत्वेन व्यवहारस्य विशेषणान्न व्यभिचार इत्याशयेनाशङ्कते । नासाविति । कथं न मुख्यता, अत(४) आह । तस्येति । अन्यथा जनकजातीयत्वस्य सहकारिविरहप्रयुक्तकार्याभाववत्त्वस्य वा निमित्तत्वे । अनियमप्रसङ्गात् द्रव्यत्वादिना बीजसजातीय(५)शिलादौ समर्थव्यवहारस्य सहकारिसमवहिते कुर्वत्यपि तदभा-

दीधितिटिप्पणी ।

यथाश्रुतमूले मुख्यत्वस्य तत्रासत्त्वप्रदर्शनेपि व्यभिचारो नोद्धृतः, मुख्यत्वविशेषणस्य तत्रानुपादानादिति मुख्यत्वविशेषणं दत्वा भावार्थमाह । मुख्यत्वेनेत्यादि । अन्यथेत्यनेन प्रागुक्तजननिमित्त(क)त्वस्याभावोक्तावनियमप्रसङ्गो न व्यक्तीभवतीत्यतोऽन्यथा व्याचष्टे । अन्यथेति । द्रव्यत्वादिनेति । इयं कल्पद्वये यथासङ्ख्येन । तदभावस्य

(१) अयमेव कल्पलतादीधितिकृत्संमतः पाठः । तादृशव्यव-पुण० पु० पा० । अयं भगीरथाभिमतः । (२) अयमेव पुणतामकरंमतो युक्तः पाठः,'तत्र अङ्कुराद्यनुपहिते बीजे'इति भगीरथेन व्याख्यानात् । तद्व्यवहार:—कलि० मु० पु० पा० ।

(३) तस्य तज्ज —पुण० पु० पा० ।

(४) मुख्यतेत्यत-पाठः । (५) बीजजातीय -कलि मु० पु० पा० ।

चेत्, कीदृशं पुनर्जननं मुख्यसमर्थव्यवहारनिमित्तम् । न तावदक्षेपकरणम्, तस्यासिद्धेः । नियमस्य च सहकारिसाकल्ये सत्येव करणं करणमेवेत्येवंस्वभावत्वेना(१)-

दीधितिः ।

वस्य वा प्रसङ्गात् । नियतं करणं तथा स्यादत आह । नियमस्येति । नियमस्य करणनियमस्य, नियतकरणस्येति यावत् । सत्येव करणमित्यन्तस्य एवकारबललभ्ये सहकारिवैकल्ये करणाभावे तात्पर्यम्, तथा च यद्धर्मावच्छिन्नस्याकरणं सहकारिविरहप्रयुक्तं तद्धर्मवत्त्वमित्यर्थः । अस्ति चेदं कुर्वद्दशायामपि बीजे, ना-

दीधितिटिप्पणी ।

वेति । तदानीं सहकार्यभावाधीनकार्याभावरूपप्रवृत्तिनिमित्ताभावादित्यर्थः, तदानीं कार्यस्यैव सत्त्वात् । कीदृशं पुनरित्यादिना जननस्यैव तदभिधानस्य प्रकृतत्वान्नियमस्य तदभिधानमपर्यनुयोज्यविधयोत्तरमतस्तत्पदं नियमितजननपरमाह । नियतमित्यादि । सर्वत्र च करणपदं भावपरम् । तथापि न तद्दोषोद्धार इत्यत आह । नियतकरणस्येति यावदिति । नियमस्येत्यादिमूलं न समीहितसाधकम्, एतावता ग्रन्थेनैवकारलभ्यस्य सहकारिसाकल्याभावाकालीनसहकारिसाकल्यकालीनजननस्य समर्थव्यवहारनिमित्तत्वमानीतम्,तथा चाकरणदशायां न समर्थव्यवहारप्रसिद्धिरायाता(२), अत एव केवलकरणपदलभ्यविशेष्यीभूतस्य करणस्य दूरीकरणेन तल्लभ्यविशेषणीभूत एव तात्पर्योपवर्णनेनार्थमाह । सत्येवेति । करणाभाव इति । करणाभाव एव तात्पर्यम्, न तु विशेष्यीभूते करणेपीत्यर्थः । यद्धर्मावच्छिन्नस्य यद्धर्माधिकरणस्य । कुर्वत्यपीत्याद्युक्तदोषोद्धारं दर्शयति । अस्ति चेदमिति । अवच्छेदकधर्मस्य त-

(१) स्वभावत्वे—पाठः ।

(२) व्यवहारप्रसिद्धावायतो-पाठः ।

प्युपपत्तेः, ततश्च जननानिमित्त(१) एवायं व्यवहारो न च(२) व्याप्तिसिद्धिरिति।

दीधितिः।

स्ति च शिलाशकलादौ सत्यपि सहकारिसाकल्ये, तत्र कार्यानुत्पादेन स्वभावस्यैव तत्प्रयोजकत्वात्। अथ बीजमपि भृष्टं शिलासमानमिति चेत्*(न), अभृष्टबीजत्वमेवास्तां तादृशो धर्मः, आसादयतु वा भर्जनाद्यभावोपि सहकारिभावम्। करणमेवेत्यस्य च सत्यन्तानुषङ्गात् यद्धर्मावच्छिन्नस्य सहकारिसाकल्येऽवश्यं करणं तद्वत्त्वमर्थः। एवं चैतन्निमित्तकसमर्थव्यवहार(विषय)स्यापि सहकारिरहितस्य(३) बीजादेः करणाविरहाद्व्यभिचारेण न व्याप्तिसिद्धिरित्याह। ततश्चेति। न च यावत्सत्त्वं करणं करणनियतजा-

दीधितिटिप्पणी।

दानीमपि सत्त्वादिति भावः। यद्धर्मावच्छिन्नेत्यनेन द्रव्यत्वादीत्यादिना शिलादावतिप्रसङ्गदानमप्युद्धृतमिति दर्शयति। नास्ति चेति। शिलादेः सहकारिसाकल्ये सत्यपि कार्याजनकत्वमित्यर्थः, तथा च बीजत्वमपि जनकतावच्छेदकधर्म इत्यर्थः। तादृशः अवच्छेदकः। आसादयतु वेति। तथा च भृष्टबीजे सहकारिसाकल्यविरहादेव न कार्यमिति भावः। करणमेवेति नियमस्या(४)ऽव्यवश्यं करणमित्यर्थः, तथा चेदं प्रवृत्तिनिमित्तमकुर्वति बीजे नास्तीति न समीहितसिद्धिरित्यतोऽप्यवच्छेदकधर्म प्रवेशयार्थमाह। करणमेवेत्यस्येति। सत्यन्तानुषङ्गात् एवकाररहितसत्यन्तानुषङ्गात्। ततश्चेत्यादिमूले जननपदं निरुक्तावच्छेदकधर्मपरमिति सूचयन् व्याचष्टे। एवं चेति।

(१) जननानिबन्धन--पुण० पु० पा०। अयमेव गदाधरसम्मतः।

(२) न --कालि० मु० पु० पा०।

* () दीधितावेतच्चिन्हान्तर्गतो ग्रन्थः पुणतामकरसम्मतो न भवतीति सर्वत्र ज्ञेयम्।

(३) सहकारिविरहितस्य-पुण० पु० पा०।

(४) करणमवेत्यादिमूलोक्तनियमस्येत्यर्थः।

दीधितिः।

तिमत्त्वं वा तथा(१), असिद्धत्वात्. अकरणदशायामपि तादृशत्वाविरोधाच्च। अनियमप्रसङ्गं निरस्यति, नियमस्य चेति तु सम्प्रदायः। अथ भवतां पटादौ नीलं रूपमिव समर्थव्यवहारस्य शुद्धं जननं निमित्तं, लाघवात्, अत एव जनकतावच्छेदकरूपवत्त्वमपि परास्तमिति चेत्, अस्तु तावदेवम्, तथापि निमित्तसत्त्वासत्त्वाभ्यामेव व्यवहारतदभावोपपत्तेरविरोधात्। निमित्ततदभावयोः करणाकरणरूपयोरेव विरोध इति चेत् (न), तस्याग्रे निरसनीयत्वात्। एतेन कारिपदबोध्यत्वेन करणप्रसञ्जनं करणविरहेण च कारिपदबोध्यत्वाभावसाधनमपि व्याख्यातम्॥

दीधितिटिप्पणी।

एतत् अवच्छेदकधर्म(ः)। द्वितीये, अकरणदशायामपीति। इदानीं मूलानुक्तफक्किकां स्वयमाशङ्क्य निराकरोति। अथेति। शुद्धम् केवलम्। अत एव लाघवादेव, जनकतावच्छेदकरूपवत्त्वमेव समर्थव्यवहारनिमित्तमिति मतमप्यपास्तमित्यर्थः। तथापीति। निमित्तम् जननरूपनिमित्तम। इतरहेतुकप्रसङ्गविपर्ययावपि दूषयति। एतेनेति। एतेन अविरोधेन॥

कल्पलता।

ननु कुशूलस्थं यदि समर्थव्यवहारगोचरः स्यात् तदा कुर्यात्, न च करोति, तस्मान्न समर्थव्यवहारगोचर इति प्रसङ्गविपर्ययौ स्यातामित्यत आह। एतेनेति। अत्रापि प्रसङ्गे मूलशैथिल्यं विपर्यये च बाध इत्याह। तादृगिति। ननु मुख्यसमर्थव्यवहारजनकत्वनिबन्धनौ प्रसङ्गविपर्ययावि(२)ति नोक्तदोष इति शङ्कते। नासा-

(१) जातिमत्त्वं, स च तथा-पुण० पु० पा०।

(२) विपर्यययोरि-पुण० पु० पा०।

कल्पलता ।

विति । अन्यथेति । यदि यथाकथञ्चित् समर्थव्यवहारनिबन्धनमेव करणं स्यात् तदा भ्रान्ततादृशव्यवहारगोचरशिलाशकलादेरप्यङ्कुरः स्यादित्यर्थः । यद्वा कुशूलस्थस्यापि (मुख्य)समर्थव्यवहारगोचरत्वे ततोऽप्यङ्कुरः स्यादित्यनियमप्रसङ्ग इत्यर्थः । मुख्यव्यवहारं प्रति निमित्तं(१) विकल्प्य दूषयति । न तावदिति । अनियमप्रसङ्गं परिहरति(२) । नियमस्य चेति । कुशूलस्थस्य मुख्यसमर्थव्यवहारगोचरत्वेऽप्यङ्कुराजननं सहकारिवैधुर्यप्रयुक्तमिति नानियम इत्यर्थः । (एवं) बीजं जनयत्येवेत्यत्यन्तायोगव्यवच्छेदो नियमः, सहकारिसमवहितमेव जनयति, जनयत्येवेत्यन्ययोगायोगाभ्यां नियमः(३) । शिलायां न प्रथमः, केवलबीजे (तु) न द्वितीय(४) इति भावः । मुख्यसमर्थव्यवहारगोचरत्वमुपसंहरति । ततश्चेति । कदाचिज्जननमेव शिलाशकदिविलक्षणं(५) मुख्यसमर्थव्यवहारगोचरत्वे मूलम्, तथा च यदि समर्थव्यवहारगोचरः स्यात् तदा कुर्यादिति न व्याप्तिरस्तीत्यतः प्रसङ्गे मूलशैथिल्यमित्यर्थः । यद्वा सत्त्वक्षणिकत्वयोरेतावता न व्याप्तिसिद्धिरित्यर्थः ॥

(१) व्यवहारानिमित्तं—पुण० पु० पा० ।

(२) दूषयति—पाठः ।

(३) अयमेव सार्वत्रिकः पाठः । जनयत्येवेत्ययोगान्ययोगाभ्यां नियमः–पुण० पु० पा० । जनयत्येवेत्यन्ययोगात्यन्तायोगाभ्यां नियमश्च–कलि० मु० पु० पा० ।

(४) न तु द्वितीय—पाठः ।

(५) विलक्षण—कलि० मु० पु० पा० ।

स्यादेतत्। एतावतापि भावस्य कः स्वभावः समर्थितो (भवति,) न हि क्षेपाक्षेपाभ्यामन्यः प्रकारोऽस्तीति चेन्न, दूषणाभिधानसमये(१) निश्चयाभावेनैव सन्दिग्धासिद्धिनिर्वाहे कथापूर्वरूपपर्यवसानात्।

दीधितिः।

अक्षेपकारित्वान्यथानुपपत्त्या क्षणिकत्वं सिषाधयिषुर्भावस्वाभाव्यं(२) पृच्छति। स्यादेतदिति। कथायाः जल्पस्य। पूर्वं रूपम्(३) प्रतीकम्, परपक्षखण्डनम्॥

दीधितिटिप्पणी।

अक्षेपकारित्वेत्यादि। भावं पक्षीकृत्य स्वभावसाधने इतरबाधेनाक्षेपकारित्वं प्रसाध्य तदन्यथानुपपत्त्या क्षणिकत्वं साधयितुमुत्सुक इत्यर्थः। दूषणावसर इति मूलस्यायमर्थः, भावस्यैकतरस्वभावासमर्थनेन परपक्षखण्डनपूर्वकस्वपक्षव्यवस्थापनरूपजल्पे को दोषो दीयते, न तावत् परपक्षखण्डने, त्वन्मतस्य दूषणावसरकाले अक्षेपकारित्वरूपसाधनस्य निश्चयाभावेनैव सन्दिग्धासिद्धिनिर्वाहे जल्पस्याद्यरूपरक्षणात्। षष्ठीसमासपुरस्सरमर्थमाह। कथाया इति॥

कल्पलता।

क्षेपकारिस्वाभाव्ये सर्वदैवाकरणमित्यक्षेपकरणस्वाभाव्यमेव भावानामङ्गीकार्यम्, तच्च स्वोत्पत्त्यव्यवहितोत्तरक्षण एव करणे सति स्यात्, तथा च समर्थासमर्थबीजक्षणयोर्भेदासिद्धौ सिद्धं क्षणिकत्वमित्याशयेन (भावस्वाभाव्यं) पृच्छति। स्यादेतदिति। न

(१) दूषणावसरे—पुण० पु० पा०। अयमेव भगीरथटिप्पणीकृतोः सम्मतः।

(२) भावस्वभावं-कलि० मु० पु० पा०।

(३) पूर्वरूपम्-कलि० मु० पु० पा०।

कल्पलता ।

हीति । 'परस्परविरोधे हि न प्रकारान्तरस्थितिः' इति यत इति भावः । अक्षेपकारित्वस्वाभाव्यं सामर्थ्यमालम्ब्य यदि समर्थं स्यात् कुर्यादिति प्रसङ्गस्त्वयावतारितः, तत्र च(१) तत्स्वाभाव्यसन्देहादपि सन्दिग्धासिद्धिदूषणमुक्तम्, एतावतैव परोक्तसाधने दूषणाभिधानस्य कथापूर्वरूपस्य पर्यवसानात् तव पराजय इत्याह । दूषणाभिधानेति ॥

उत्तरपक्षावसरे तु सोपि न दुर्वचः । तथाहि, करणं प्रत्यविलम्ब इति कोऽर्थः, किमुत्पत्तेरनन्तरमेव करणं, सहकारिसमवधानानन्तरमेव वा । विलम्ब इत्यपि कोऽर्थः, किं यावन्न सहकारिसमवधानं तावद-

---

दीधितिः ।

उत्तरः पक्षः प्रतीकम्(२), स्वपक्षस्य प्रकृते स्थैर्यस्य स्थापनम् । उत्पत्तेरनन्तरं करणम्(३) उत्पत्त्यनन्तरकालीनकार्यकारित्वम्, उत्पत्तिकाले कारित्वमिति यावत् । एवमग्रेपि नेयम् ।

दीधितिटिप्पणी ।

ननु जल्पस्य द्वितीयदलरक्षार्थमेव समर्थनं कार्यमित्यत आह । उत्तरेति । एवं पक्ष इत्यस्यार्थः, प्रतीकम् । स्वोत्पत्तेरनन्तरं स्वस्यैवाभावेन कथं तदानीं जननानुकूलव्यापाररूपकरणमत आह । उत्पत्तेरिति । प्रथमस्य कुत्रचित्प्रमाणमाशङ्क्य समाधत्ते । कस्यचि-

---

(१) तदत्र-कालि० मु० पु० पा० ।

(२) उत्तरपक्षः-कालि० मु० पु० पा० । अयमेव टिप्पणीकृत्सम्मतः ।

(३) रनन्तरकरणम्-कालि० मु० पुं० पा० ।

करणं, सर्वथैवाकरणमिति वा(१)। तत्र प्रथमचतुर्थयोः प्रमाणाभावादनिश्चयेपि द्वितीयतृतीययोः प्रत्यक्षमेव प्रमाणम्। बीजजातीयस्य हि सहकारिसमवधानानन्तरमेव करणं करणमेवेति प्रत्यक्षसिद्धमेवेति,तथा सहकारिसमवधानरहितस्याकरणमित्यपि, अत्र च भवानपि न विप्रतिपद्यत एव(२), प्रमाणसिद्धत्वात्, विपर्यये बाधकाच्च(३)। तथाहि, यदि सहकारिविरहेऽकुर्वाणस्त-

---

दीधितिः।

प्रथमेति। कस्यचिदुत्पत्तेरनन्तरमेव किञ्चित्कार्यकारित्वेपि न सर्वत्र तथात्व(४)नियमः, तस्य तदानीं सहकारिसाकल्यनिबन्धनत्वादिति भावः। क्षणिकत्ववादिभिरेकस्यां व्यक्तौ करणाकरणयोरनङ्गीकारादाह। बीजजातीयस्येति(५)। तथेति। अविलम्बकारित्वे एवकारेणा(६)न्तर्भावितोप्यर्थः प्राधान्येन विल-

दीधितिटिप्पणी।

दिति। ननु बीजजातीयस्य हीत्यादौ मूले यदविलम्बकारित्वं वितर्कितं तदन्तर्गतैवकारादेव तथेत्यादिमूलोक्तविलम्बकारित्वार्थलाभे व्यर्थं मूलेन तथेत्यादिना विलम्बकारित्वार्थकथनमत आह। अविलम्बकारित्व इत्यादि। तथा चात्र प्राधान्यमेवोक्तमिति भावः।

---

(१) सर्वदैवाकरणं वा—पाठः। सर्वदैव वाऽकरणमिति—पाठः।

(२) भवानापि विप्रतिपद्यत एव न—पाठः।

(३) बाधकाभावाच्च—पाठः।

(४) कारित्वेपि सर्वत्र तथात्वा-पुण० पु० पा०।

(५) बीजेति-पाठः।

(६) एवकारा-पा० २ पु०।

त्स(१)मवधानेऽपि न कुर्यात् तज्जातीयमकरणमेव स्यात(२), समवधानासमवधानयोरुभयो(३)रप्यकरणात्। एवं(४) तत्समवधानविरहेऽपि यदि(५) कुर्यात् सहकारिणो(६) न कारणं स्युः, तानन्तरेणापि करणात्। तथा चानन्यथासिद्धान्वयव्यतिरेकवताम(प्य)कारणत्वे कार्यस्याकस्मिकत्वप्रसङ्गः(७)। तथा च कादाचित्क-

दीधितिः।

स्वरूपतया पृथगुपदर्शितः। तज्जातीयम् तद्धर्मावच्छिन्नम्। अकारणम्(८) अस्वरूपयोग्यं, तथात्वं च प्रामाणिकमिति भावः। एवमिति। सहकारिणो यदि तत्कार्यकारणापेक्षणीया न स्युः तत्कार्यकारणानि न स्युरित्यर्थः। तेन न वैयधिकरण्यम्(९)। तथा चेति। तुल्यन्यायतया सर्वेषामेवाकारणत्वादिति भावः।

दीधितिटिप्पणी।

तज्जातीयमितरधर्मावच्छेदेनास्वरूपयोग्यमेवेत्यत आह। तद्धर्मेति। तथा च तद्धर्मावच्छेदेन स्वरूपयोग्यत्वाभावः साध्य इत्यर्थः। ननु सहकारिणामकारणत्वेपि सहकारितानिरूपकदण्डादेः कारणत्वं कथं बाधितमत आह। तुल्येति। दण्डादेरपि चक्रादिसहकारितया सहकारिणामकारणत्वे दण्डस्याकारणत्वमेव स्यादित्यर्थः। मूले

(१) यत् सहकारिसमवधानेऽप्यकुर्वाणं यदि तत्सहकारिस—पाठः।
(२) तज्जातीयमकारणं स्यात्-पाठः।
(३) समवधानयो—पाठः।
(४) एवं यदि—पाठः।
(५) विरहे—पाठः।
(६) णोपि—पुण० पु० पा०।
(७) कार्यस्याकारणकत्वप्रसङ्गः—पाठः।
(८) अकरणम्-कलि० सु० पु० पा०।
(९) तेन वैयाधिकरण्यं न-पाठः।

त्वविहति(१)रिति। एवं च द्वितीयपक्षविवक्षायामक्षेपकारित्वमेव(२) भावस्य स्वभावः। तृतीयपक्षविवक्षायां तु क्षेपकारित्वमेव भावस्य स्व(३)रूपमिति नोभयप्रकार(४)निवृत्तिरिति।

दीधितिः।

एवं चेत्यादि। ननु यद्युपदर्शितं करणमकरणं च स्वभावो भावस्य, तदा यावत्सत्त्वं तदुभयापत्तिः, सति धर्मिणि स्वभावविरहायोगादिति चेत्, तत्स्व(५)भावत्वं हि(६) तत्तादात्म्यं वा स्यात्, यावत्त(७)त्सत्त्वं तत्र स(८)त्त्वं वा, तद्धर्मतामात्रं वा। तत्राद्ययोरनभ्युपगमः, अन्तिमस्तु धर्मधर्मिणोरत्यन्तभेदेनं धर्मिसत्त्वेऽप्यसत्त्वं न विरुणद्धि॥

दीधितिटिप्पणी।

द्वितीयपक्षः, तथा हीत्यादिवितर्कितद्वितीयपक्षः। नोभयप्रकारनिवृत्तिरित्यत्रैव शङ्कते। ननु यदीति। उपदर्शितमिति। अक्षेपकारित्वं क्षेपकारित्वं चेत्यर्थः। धर्मधर्मिणोरिति। यद्यनयोरभेदः स्यात्तदैव धर्मिसत्त्वं विरुद्धं स्यात्, न चैवम्॥

कल्पलता।

ननु जल्पे स्वपक्षसाधनमपि वक्तुमुचितमित्यत आह। उत्तरेति। क्षेपाक्षेपयोरविवेचितयोरेकतरकोटिपरिग्रहोऽनुचित इति विवेक्तुं विकल्पयति। उत्पत्तेरनन्तरमेवेति। स्वोत्पत्त्यव्यवहितोत्तरक्षण एवेत्यर्थः।

---

(१) त्वव्याहति—पुण० पु० पा०। (२) कारित्वं—पाठः।

(३) कारित्वमेव स्व—पाठः। (४) नोभयाकार—पाठः।

(५) दिति चेन्न, स्व-कालि० मु० पु० पा०। (६) हि-कलि० मु० पु० नास्ति।

(७) याव-कालि० मु० पु० पा०। (८) तत्र तत्स-कालि० मु० पु० पा०।

कल्पलता ।

प्रथमचतुर्थयोरिति । स्वोत्पत्त्यनन्तरमेव करणे(१) प्रमाणाभावः, सर्वथैवाकरणे कार्यजातं कदापि नोपलभ्येतेति बलवत्प्रतिपक्षदण्ड इत्यर्थः। प्रमाणाभावादित्यापा(त)तः, विपरीतमेव प्रमाणमिति वस्तुगतिः। प्रत्यक्षमेवेति । अन्वयव्यतिरेकबलप्रवृत्तमित्यर्थः। अत्यन्तायोगव्यवच्छेदे चायमेवकारः। बीजत्वेनैव कारणतेति विवक्षन्नाह । बीजजातीयस्येति । ताद्रूप्येणैवान्वयव्यतिरेक(प्र)दर्शनप्रवृत्तेरिति भावः। अयोगान्ययोगव्यवच्छेदाभ्यामक्षेपकारित्व(२)मेव द्रढयति । क्षेपकारित्वमाह । तथेति । नन्वेवं न(३) मन्यामहे इत्यत आह । अत्र चेति । प्रमाणेति । सहकारिषु सत्सु(४) करणस्यासत्सु चाकरणस्य प्रत्यक्षसिद्धत्वादित्यर्थः। विपर्यये बाधकं स्फुटयति । तथाहीति । यज्जातीयं(५) सहकारिसमवधानासमवधानयोरकारणं तज्जातीयमकारणमेव शिलाशकलवदिति(६)व्याप्त्युपष्टम्भेनाह(७) । यदीति । न च दीपोपरि नयनात् पक्वबीजे व्यभिचारः, तत्रापि सहकारिविशेषविरहस्य कल्पनीयत्वात् । यत्कार्यं यद्व्यतिरेकेण यत् करोति तत्कार्ये न तस्य तत्सहकारि(त्वं), यथा दण्डस्य घटे जनयितव्ये तन्तुरिति-

(१) नन्तरकरणे-पाठः ।

(२) माक्षेपकारित्व-पुण० पु० पा० । मेवोपकारित्व-पाठः ।

(३) न त्वेवं-पुण० पु० पा० ।

(४) सहकारिषु मतस्य-पुण० पु० पा० ।

(५) यज्जातीय-पाठः ।

(६) दित्यति-पुण० पु० पा० ।

(७) व्याप्त्यवष्टम्भेनाह-पाठः ।

कल्पलता।

ऽयाप्त्यवष्टम्भेनाह । एवमिति। यदि सहकारित्वेनाभिमताः क्षित्यादयोऽङ्कुरे जनयितव्ये बीजं (न) नापेक्षेरन् तदा ते तत्र सहकारिणो न स्युः, रासभवदित्यापादनार्थः। न चेष्टापत्तिः, अन्वयव्यतिरेकसिद्धकार्यकारणभावतिरस्कारे तद्व्यवस्थैव न स्यात्, स्याच्च कार्यस्याकस्मिकत्वमित्याह । तथा चेति। ततः किमित्यत आह। तथा चेति। किञ्चित्कालेऽसतः(१) किञ्चित्कालसत्त्वं कादाचित्कत्वं सुदृढप्रमाणावधृतमपि न स्यादित्यर्थः। ननु तथापि भावस्य कः स्वभाव इति प्रश्ने किमुत्तरमत आह। एवं चेति। सहकारिसमवधानासमवधानरूपावच्छेदभेदमादायाक्षेपकारित्वक्षेप(२)कारित्वयोरुभयोरप्येकस्मिन्(३) बीजजातीये दर्शनान्नानयोर्विरोध इत्यर्थः(४)।

तथापि किमसमर्थस्यैव सहकारिविरहः स्वरूप-

दीधितिः।

स्यादेतत्। बीजत्वेन सामर्थ्ये सिद्धे समर्थानां बीजजातीयानामिवैकस्यापि बीजस्य सहकारिसाकल्यवैकल्याभ्यामेव करणाकरणयोरुपपत्तौ सिध्यति स्थैर्य(५), न त्वेतदस्ति, समर्थस्य

दीधितिटिप्पणी।

न्यूनतां परिहृत्य भावार्थं प्रकाशयन् मूलीयाभासं ददाति। स्यादेतदिति। यदि बीजत्वेन सामर्थ्यं भवेत् तदा यथा समर्थानां

---

(१) किञ्चित्कालासतः-पुण० पु० पा०। (२) मादाय क्षेपकारित्वाक्षेप-पुण० पु० पा०।
(३) रप्येकत्र-पुण० पु० पा०। (४) इति भावः-पुण० पु० पा०।
(५) पक्षे स्थैर्यं सिध्यति-पाठः।

लाभानन्तरं कर्तुरेव (वा) सहकारिसमवधानम्, अन्यथा वेति किं नियामकमिति चेत्, इदमु(१)च्यते,

दीधितिः ।

क्षेपायोगादिति(२), तथा च कुर्वद्रूपत्वेनैव सामर्थ्यं न बीजत्वेन, समर्थ एव हि(३) सहकारिणां लाभो लाभ(४) एव, तथा च न सहकारिसाकल्यवैकल्यप्रयुक्ते करणाकरणे, किं तु सामर्थ्यासामर्थ्यप्रयुक्ते इत्याशयेनाशङ्कते । तथापीति । असमर्थेत्यादि(५)। समर्थस्यापि सहकारिविरहे(६) तदानीं कार्यस्यानुत्पत्तौ समर्थस्याप्यकरण(७)मुत्पत्तौ च सहकारिणामकरणत्वम(८), असमर्थे च सहकारिसाकल्ये समर्थबीजविरहेपि कार्यस्यो(९)त्पत्तौ बीजस्याकरणत्वम्(१०) अनुत्पत्तौ च बीजविरहेण समर्थस्यापि सहकारिणोऽकरणं(११) प्रसज्येत, तेन तदुभयं व्यु-

दीधितिटिप्पणी ।

बीजानां मध्ये कस्यापि सहकारिविरहप्रयुक्तकार्याभाववत्त्वं कस्यापि तत्प्रयुक्तकार्यवत्त्वं तथा सामर्थ्यस्याविशेषादेकस्या अपि व्यक्तेरुभयत्वं न विरुद्धमिति रीत्या दृष्टान्तीकृत्य स्थैर्यं साध्यंतेत्यर्थः । ननु कथं कुर्वद्रूपत्वेन तत्, कथं वा न बीजत्वेन तदत आह । समर्थ एव हीति । यस्मात् समर्थ एव सहकारिणां लाभो न तु समर्थभिन्ने, अतः कुर्वद्रूपे सहकारिलाभनिबन्धनं तत्त्वेनैव सामर्थ्यं वाच्यं, न तु बीजत्वेन, यस्मात् उत्पत्तौ कार्यस्य सहकारिणां लाभ आवश्यकः तदेव समर्थम(१२), अत एव सहकारिणाऽसमवहिते बीजे सामर्थ्यासत्त्वेन व्यभिचारः स्यादिति न बीजत्वमवच्छेदकम् । उत्पत्तौ कार्यस्योत्पत्तौ । तेन नियमद्वयेन । अन्यथेत्यस्यैवा-

(१) अथो-पुण० पु० पा० । (२) योगात्-पा० २ पु० । (३) अयमेव पाठष्टिप्पणीकृन्मतः। समर्थ एव च-इति तु सर्वत्र । (४) रिणा लाभ—पाठः । (५) असमर्थेति-पाठः ।
(६) विरहे च-पा० २ पु० । (७) अकारणत्वमित्यर्थः । अन्वयव्यभिचारेणेत्यादिः ।
(८) मकारणत्वम्-पुण० पु० पा० । व्यतिरेकव्यभिचारेणेत्यादिः । (९) कार्ये-पाठः ।
(१०) कारणत्वम्-पुण० पु० पा० । व्यतिरेकव्यभिचारेणेत्यादिः । (११) कारणत्वं-पाठः ।
अन्वयव्यभिचारेणेत्यादिः । (१२) सामर्थ्यम्-पा० २ पु० ।

कुशूलस्थबीजस्याङ्कुरानुकूलः शिलाशकलाद् विशेषः कश्चिदस्ति न वा(१), न चेन्नियमेनैकत्र प्रवृत्तिः अन्यस्मा(२)न्निवृत्तिश्च त(३)दर्थिनो न(४) स्यात्। परम्परयाङ्कुरप्रसवसमर्थ(५)बीजक्षणजननादस्त्येवेति

दीधितिः।

दस्तम्। अन्यथा वेति। समर्थस्यापि कदाचित्सहकारिणां वैकल्यं कदाचित्(६) साकल्यं, तेनाकरणं करणं चेति। प्रवृत्त्यन्यथानुपपत्त्या बीजत्वेनैव सामर्थ्यमित्याशयेन पृच्छति। कुशूलेत्यादि(७)। प्रवृत्तिमन्यथोपपादयति। परम्परयेति(८)। अस्त्येवेति। शिलाशकलाद्विशेषः। समर्थ क्षणं(९) प्रत्येवानायत्या बीजत्वेन सामर्थ्यं(१०) वाच्यम्, तथा च समर्थस्यापि

दीधितिटिप्पणी।

र्थमाह। समर्थस्यापीति। बीजत्वेनैवेति। तथा च बीजजातीयदृष्टान्तेन एकत्रापि व्यक्तौ तदुभयवत्त्वं वाच्यमिति भावः। अनायत्येति। शिलाशकलतो विशेषरक्षार्थं बीजत्वेन समर्थबीजक्षणं प्रति स्वरूपयोग्यत्वोक्तौ अफलोपहितबीजस्य सामर्थ्ये सत्यपि सहकार्यभावाधीन एव फलाभाव उक्त इति भावः।

(१) शकलात् कश्चिदस्ति विशेषो वा—कलि० मु० पु० पा०।
(२) अपरस्मा—पाठः। अपरस्मि—पुण० पु० पा०।
(३) त्तिस्त—पाठः। (४) र्थिनः—पुण० पु० पा०। (५) प्रसवक्षम—पाठः।
(६) कदाचिच्च पुण० पु० पा०। (७) कुशूलेति-पाठः।
(८) परम्परेति-कलि० मु० पु० पा०। (९) समर्थक्षणं-कलि० मु० पु० पा०।
(१०) परम्पराया एकरूपाया अभावात् परम्परानिरूपकस्यापि बीजस्यैक्याभावादनुगमार्थं बीजत्वेनैव सामर्थ्यमिति भावः।

चेत्, कदा पुनः परम्परयापि तथाभूतं करिष्यतीति(१)। तत्र(२) सन्देह इति चेत्, स पुनः किमाकारः। किं सहकारिषु(३) समवहितेष्वपि करिष्यति न वेति, उता(४)समवाहितेष्वपि (तेषु) करिष्यति न वेति(५), अथ यदा सहकारिसमवधानं तदैव करिष्यत्येव(६)

दीधितिः।

सहकारिविरहादकरणमित्यायातमित्याशयेन पृच्छति। कदेत्यादि। केचित्तु तज्जातीयानां सहकारिलाभालाभयोः करणाकरणे न स्थैर्यसाधके, क्षणिकत्वेऽप्युपपन्नत्वात्, एकस्यैव तु ते नाद्यापि सिद्धे, प्रत्यभिज्ञानं च व्यभिचारिजातीयमसिद्धप्रमा(७)भावं न साधकमतः कथं स्थैर्यसिद्धिरित्या(८)शयेनाह। तथापीति। असमर्थेत्यादिनियम(९)द्वयं समर्थस्यापि सहकारि(णा)वैकल्यादकृतवतः पश्चात् साकल्ये सति करणस्य

दीधितिटिप्पणी।

पूर्वोक्तभावतोपि निर्दुष्टमाह। केचिदिति। अत एव प्राहुरिति वक्ष्यते, एकस्यां व्यक्तौ करणाकरणासिद्धेः। क्षणिकत्वेपीति। क्षणिकत्वे कस्यापि बीजजातीयस्य तद्वत्त्वं कस्यापि तदभाववत्त्वमविरुद्धमित्यर्थः। ते करणाकरणे। समर्थस्यापीति। अपिनाऽसमर्थस्यापीति सूचितम्, तदैव नियमद्वयसार्थक्यात्। पूर्वं तु एतन्नियमद्वयं समर्थस्य क्षेपायोगादित्युपष्टम्भेन योजितमित्यतोपि मतयोर्भेदः।

---

(१) करिष्यति—पाठः। (२) अत्र—पुण० पु० पा०।

(३) कारि—पाठः।

(४) उत तद—पुण० पु० पा०। (५) न वा—पाठः।

(६) करोत्येव-पाठः।

(७) प्रमाण—पुण० पु० पा०। (८) स्थैर्यमित्या—कालि० मु० पु० पा०।

(९) तथापीति। नियम—पाठः।

परं कदा तेषां(१) समवधानमिति सन्देहः।

दीधितिः।

प्रतिक्षेपकम्। प्रवृत्त्यन्यथानुपपत्त्या बीजत्वेन सामर्थ्यसिद्धौ न तादृशनियमसिद्धिरित्याशयेन पृच्छति। कुशूलेति। इति प्राहुः॥

दीधितिटिप्पणी।

न तादृशानियमासिद्धिः न समर्थस्येत्यादिक्षणिकत्वसाधकनियमसिद्धिः। कदा तेषां समवधान(२)मिति सन्देहफलप्रश्नालिखनम्, न तु सन्देहाकारस्य। सन्देहाकारस्तु इदानीं तदानीं वा समवधानमिति बोध्यः॥

कल्पलता।

नन्वेवं स्वभावद्वयस्थितावपि न स्थैर्यं, यतः कुर्वद्रूपस्यैव सहकारिसमवधान(म)तद्रूपस्यैव तद्विरह इति क्षणिकत्वेप्युपपद्यत(३) इत्याभिप्रेत्याह। तथापीति। कर्तुरेवेति। कुर्वद्रूपत्वजातिमत एवे(४)त्यर्थः। अकुर्वदपि बीजत्वालिङ्गितं समर्थमेवेत्येकस्यैव सहकारिलाभालाभाभ्यां करणाकरणे इति स्थैर्यमेवे-त्य(५)भिप्रेत्य पृच्छति। कुशूलस्थेति। अङ्कुरार्थि(६)प्रवृत्त्यन्यथानुपपत्त्यैव कुशूलस्थस्यापि सामर्थ्यमित्याह। न चेदिति। तदर्थिप्रवृत्तेरन्यथोपपत्तिमाह। परम्परयेति। असमर्थमपि कुशूलस्थं समर्थं जनयिष्यति, शिलाशकलं तु न तथेति विशेष इत्यर्थः। अस्त्येवेति। तदर्थिप्रवृत्तिरित्यनुषङ्गः। यद्वा

(१) तेषां सहकारिणां पाठः। (२) मूलस्थमिदं प्रतीकम्।
(३) त एवं—पुण० पु० पा०। (४) इवे—कालि० मु० पु० पा०।
(५) मेवा—पुण० पु० पा०। (६) रादि—कालि० मु० पु० पा०।

कल्पलता।

शिलाशकलाद्विशेष इत्यनुषज्यते। काचिद्भुक्तनष्टा व्यक्तिः समर्थ(१)लक्षणं न जनयत्यथ च(२) तत्रापि तदर्थिप्रवृत्तिरिति बीजत्वेनैव सामर्थ्यं वाच्यमिति हृदि निधाय पृच्छति। कदेति। परम्पराकारणे(३) प्रवृत्तौ कालावच्छेदज्ञानमतन्त्रमित्याशयेनाह। तत्रेति(४)। बीजं सहकारिसमवधाने करिष्यत्येव, समवधानं तु(५) कदेति(६) सन्देहो वाच्यः, तथा च बीजत्वेनैवाङ्कुरं प्रति सामर्थ्यं वाच्यमित्याशयेन संशयाकारं विकल्पयति। स पुनरिति॥

न तावत् पूर्वः(७), सामान्यतः कारणत्वावधारणे(८) तस्यानवकाशात्, अवकाशे वा कारणत्वानव(९)धारणात्। नापि द्वितीयः, सहकारिणां तत्त्वावधारणे तस्यानवकाशात्, अवकाशे वा तेषां तत्त्वानवधारणात्। तृतीये तु सर्व एव तत्सन्तानान्तःपातिनो बीजक्षणाः

दीधितिः।

सामान्यत इति। न चाङ्कुरसमर्थबीजक्षणं प्रत्यपि परेषां बीजत्वेन न कारणत्वम्, अपि तु तत्कुर्व(१०)द्रूपत्वेनैवेति(११) वाच्यम्। तथात्वेपि बीजजातीयस्य सत्यां सहकारिसम्पत्तौ अ-

---

(१) समर्थं बीज—पुण० पु० पा०। (२) यति भवति च—पुण० पु० पा०।
(३) कारेण—पुण० पु० पा०। (४) न तत्रेति—पाठः।
(५) धानं—कलि० मु० पु० पा०। (६) कदेत्यत्र—पुण० पु० पा०।
(७) न तावदाद्यः-पाठः। (८) कारणत्वावगमे-पाठः। (९) वा तदनव-पाठः।
(१०) तथा च सामान्यतः सामर्थ्यानवधारणात् सन्देहोपपत्तिरिति भावः।
(११) अपि तु कुर्व-पाठः।

समानशीलाः प्राप्नुवन्ति, यत्र तत्र सहकारिसमवधाने(१) सति करणनियमात्, सर्वत्र च सहकारिसमवधानसम्भवात् ।

दीधितिः ।

वश्यं करणमिति सामान्यतोऽवधारणात्(२), अनवधारणे वा नियतप्रवृत्त्यनु(३)पपत्तेः । समानशीलाः समानयोग्यताकाः, तथा च सिद्धं बीजत्वेन कारणत्वमिति भावः(४) ॥

दीधितिटिप्पणी ।

अवधारणादिति । अङ्कुरार्थमेव सर्वैर्बीजसामान्यरक्षणादिति भावः । परेण कथमिदमवधार्यमित्यत आह । अनवधारणे वेति । वाकारश्चार्थः । बीजत्वमादाय समानशीलत्वं तैरप्युच्यत इत्यत आह । समानयोग्यताका इति ॥

---

(१) समवधानेपि-पाठः । (२) तथा च सन्देहानुपपत्तिः । (३) वा प्रवृत्त्यनु-पाठः ।

(४) अत्रायं भावः । सामान्यत इत्यादिमूलेन(७२ पृष्ठे ११ पङ्क्तौ) बीजत्वेन सामान्येन कारणत्वावधारणे सकलसहकारिषु समवहितेष्वपि बीजमङ्कुरसमर्थबीजक्षणं करिष्यति न वेति संशयो नोपपद्यत इत्युक्तम् । अत्र बीजत्वेन कारणत्वमेव नावधार्यते, अङ्कुरमिव तत्समर्थबीजं प्रत्यपि तत्तत्कुर्वद्रूपत्वरूपजात्यन्तरपुरस्कारेण कारणत्वसम्भवादित्याशङ्क्य निराक्रियते; न चेत्यादिना(७२ पृष्ठे १७ पङ्क्तौ) । तथात्वेपीत्यस्य अवान्तरजात्यन्तरस्य कारणतावच्छेदकत्वसम्भवेपीत्यर्थः । इति सामान्यतोऽवधारणादिति । इत्याकारकसहकारिसम्पत्तिविशिष्टबीजत्वरूपसामान्यधर्मे करणनियमावधारणेनोक्तसंशयनिवर्त्तकविशेषदर्शनसत्त्वादित्यर्थः । अनवधारणे, अङ्कुरार्थिनो बीजत्वपुरस्कारेण प्रवृत्तिदशायां तथानवधारणे, प्रवृत्त्यनुपपत्तेः, तादृशावधारणस्य प्रवृत्त्यङ्गत्वात्, अन्यथा सहकारिसम्पन्नमपि न करिष्यतीति सम्भावनायामपि प्रवृत्त्यापत्तेरित्यर्थः । समानशीला इति व्याचष्टे । समानयोग्यताका इति । अङ्कुरसमर्थबीजक्षणयोग्यत्वेन समाना इत्यर्थः । करणनियमादिति मूलम्, बीजत्वाक्रान्ते सहकारिसम्पत्तिमति क्वचिदपि अकरणस्यादर्शनादित्यर्थः । नन्वस्तु सहकारिसमवहितबीजे करणनियमः, तावतापि न सर्वबीजानां योग्यतासिद्धिः, सहकार्यसमव[illegible]नामकरणेनायोग्यत्वे बाधकाभावादत आह । सर्वत्र चेति । सहकारिसमवधानसम्भवादिति । तथा च यत्र बीजे सामर्थ्यं भवता नोपेयते, तत्रापि सहकारिसमवधानसम्भवेन सहकारिसम्पत्तिमतो बीजस्याकरणं प्रसज्येतेति भावः । विवृतौ, सिद्धं बीजत्वेन कारणत्वमिति [illegible] जातेर्न्यूनवृत्तितया योग्यतावच्छेदकत्वासम्भवादिति भाव इति सम्प्रदायः । अथात्र यदा सहकारिसमवधानं तदैव करिष्यत्येव, परं कदा तेषां समवधानमिति सन्देह इति तृतीयपक्षे सर्व एव तत्सन्तानान्तःपातिनो बीजक्षणाः समानशीलाः प्राप्नुवन्ति यत्र तत्र सहकारिसमवधाने सति

कल्पलता

सामान्यत इति। न च सौगतानभ्युपगतमिदं, बीजजातीयस्य सहकारिसमवधाने सत्येव करणं करणमेवेति प्रत्यक्षसिद्धमि(१)त्यादिना(२) तत्साधनात्। तेषामिति। न चेष्टापत्तिः, सहकारिणो न कारणं स्युरित्यादिना(३) पूर्वमेव साधनात्(४)। समानशीकरणनियमात् सर्वत्र च सहकारिसमवधानसम्भवादित्यादिना(७२ पृष्ठे १५ पङ्क्तौ) दूषणाभिधानं न सङ्गच्छते, सहकारिसमवधानसम्भावनामात्रेण शिलाशकलसाधारणेन योग्यतायाः कुशूलादिस्थबीजसाधारण्या निश्चेतुमशक्यत्वात्। न च कुशूलादिस्थे योग्यताया उक्तरीत्याऽनिर्णय इष्ट एव, सन्दिग्धयापि तया परपक्षप्रतिक्षेपनिर्वाहादिति वाच्यम्। उत्तरपक्षावसरे तु सोऽपि न दुर्वच इत्यादिना(६८ पृष्ठे ९ पङ्क्तौ) तन्निर्णयस्यैवोपक्रान्ततया तस्यैवाकाङ्क्षिततया तदनभिधाने मूलस्य न्यूनतापत्तेरिति चेन्न, कुशूलादिस्थबीजेऽङ्कुरार्थिनः प्रवृत्तिं प्रति शिलाशकलसाधारणस्य सकलसहकारिसमवधानसन्देहस्य स्वरूपतः साक्षाज्जनकत्वासम्भवेनाङ्कुरात्मकफलोपधायकतासन्देहस्य च तन्निर्वाहकस्य सहकारिसमवधानसम्भावनामात्राधीनत्वे तत्सम्भावनायाः शिलाशकलसाधारणतया तत्राप्यङ्कुरार्थिप्रवृत्तिप्रसङ्गस्य दुष्परिहरतयाऽनायत्याऽङ्कुरजननस्वरूपयोग्यतात्मकफलोपधायकत्वतदभावरूपकोटिद्वयसहचरितधर्मवत्तानिर्णयाधीनस्यैवाङ्कुरोपधायकत्वसन्देहस्याङ्कुरार्थिप्रवृत्तिहेतुत्वं वाच्यम्, तथा च लाघवात्स्वरूपयोग्यतानिर्णयस्यैव तादृशप्रवृत्तिहेतुत्वस्यौचिततया कुशूलादिस्थेऽपि बीजेऽङ्कुरार्थिप्रवृत्त्यन्यथानुपपत्त्या तस्य तत्र योग्यतानिर्णयः सिद्ध्यति। न च यद्धर्मावच्छिन्नस्य सहकारिसाकल्ये सत्यवश्यं करणं तद्धर्मवत्त्वं यदि योग्यतापदार्थस्तदा तन्निर्णयोऽकारिण्यपि सम्भाव्यते, योग्यतापदार्थ एव तु कुर्वद्रूपमस्त्वित्यत्र नैव विनिगमकमस्तीति कुर्वद्रूपात्मकयोग्यतापक्षेऽकारिणि योग्यतानिर्णयो दुर्घट इति वाच्यम्। प्रवृत्तिविषयांशे प्रकारीभूय विषयविधया प्रवृत्तिजनकतावच्छेदकस्य योग्यतापदार्थत्वनियमेन बीजत्वादिरूपस्य तादृशधर्मस्य योग्यतारूपत्वौचित्यात्, कुर्वद्रूपत्वस्य च शिलादिसाधारणसन्देहविषयस्याकारिणि प्रवृत्तिनिर्वाहकत्वासम्भवात्। न च कुर्वद्रूपत्वस्य शिलादौ सन्देहो नोपगन्तुं शक्यते, यद्धर्मावच्छिन्ने सहकारिसाकल्ये सत्यवश्यं करणं बीजत्वरूपतद्धर्मविरहात्मकविशेषदर्शनस्यैव तत्र तादृशसन्देहविरोधिनः सत्त्वात्, इत्थं च कुर्वद्रूपत्वसन्देहमात्रस्य प्रवर्त्तकत्वेऽपि शिलादौ प्रवृत्तेरापादयितुमशक्यतया योग्यतानिर्णयाधीनैवाङ्कुरार्थिनामकारिबीजविषयिणी प्रवृत्तिरिति रिक्तं वच इति वाच्यम्। यद्धर्मावच्छिन्ने सहकारिसाकल्येऽवश्यं करणं तद्धर्मवत्त्वानिर्णयाधीनकुर्वत्त्वसन्देहस्य तद्रूपेण प्रवृत्तिजनकत्वे गौरवस्यानुपदमेवोक्तत्वात्, यथाकथञ्चित्तत्सन्देहमात्रस्य प्रवर्त्तकत्वे च किञ्चिद्धर्मावच्छिन्नेऽपि सहकारिसाकल्यदशायां करणनियममनिर्धारितवतः पुंसस्तादृशधर्मविरहात्मकफलोपधायकताधीविरोधिविशेषदर्शनासम्भवेन प्रमेयत्वादिरूपसाधारणधर्मदर्शनाधीनस्य कुर्वत्त्वसन्देहस्य शिलादावपि सम्भवेन तद्दशायामङ्कुरार्थिनस्तस्य शिलादौ प्रवृत्त्यापत्तेः कथञ्चिदपि वारयितुमशक्यत्वात् योग्यतारूपबीजत्वनिर्णयस्यैव प्रवृत्तिहेतुत्वाभ्युपगमस्यावश्यकत्वादिति विभावनीयम्।

(१) सिद्धमेव-पुण० पु० पा०। (२) ६३ पृष्ठे ३ पङ्क्तौ। (३) ६४ पृष्ठे २ पङ्क्तौ।
(४) पूर्वमेव निरासात्—पुण० पु० पा०।

कल्पलता।

ला इति। समानं सामर्थ्यरूपं(१) शीलं येषां ते तथा। एवं तर्हि कुशूलस्थस्यापि स्यादित्यत आह(२)। सर्वत्र चेति॥

समर्थ एव क्षणे क्षित्यादिसमवधानमिति चेत्, तत् किमसमर्थे(३) सहकारिसमवधानमेव नास्ति(४), समवधाने सत्यपि वा तस्मान्न(५) कार्यजन्म(६)। नाद्यः, शिलाशकलादावपि क्षितिसलिलतेजःपवन(७)-योगदर्शनात्। न द्वितीयः, शिलाशकलादिव(८) कदाचित् सहकारिसाकल्यवतोपि(९) बीजादङ्कुरानुत्पत्तिप्रसङ्गात्(१०)।

दीधितिः।

समर्थ एवेति। तथा च न समानशीलत्वमिति भावः॥

कल्पलता।

समर्थासमर्थयोरेव सहकारिसमवधानासमवधाने इति नैकस्यैव तदधीने फलो(११)पधानानुपधाने इति कथमेकशीलत्वमित्याह। समर्थ एवेति॥

(१) समानसामर्थ्यरूपं-कलि० मु० पु० पा०।

(२) इत्यत आहेति। इत्याकारकग्रन्थम्, अतः, अनेन ग्रन्थेन, सार्वविभक्तिकस्तसिः, आहेत्यनेनान्वयः।

(३) असमर्थक्षणे-पाठः।

(४) न-पाठः।

(५) सत्यपि न वा तस्मात्—पुण० पु० पा०। सत्यपि न तस्मात्-पाठः।

(६) जन्म वा-पाठः।

(७) क्षितिपवनतेजःसं-पाठः।

(८) शकलादिवत्-पाठः।

(९) साकल्यवतो-पाठः।

(१०) तथा च कस्यचिद्बीजस्य शिलाशकलवदसमर्थस्याप्यभ्युपगमः स्यादिति भावः।

(११) धीनफलो-पुण० पु० पा०।

एवमपि स्यात्, को दोष इति चेत्, न तावदिदमुपलब्धम् । आशङ्क्यत इति चेन्न(१), तत्समवधाने सत्यपि अकरणवत् तद्विरहे(२) करणमप्या(३)शङ्क्येत । आशङ्क्यतामिति चेत्, तर्हि बीजविरहेप्याशङ्क्येत, तथा च सति साध्वी(४) प्रत्यक्षानुपलम्भ(५)परिशुद्धिः(६) ।

दीधितिः ।

बीजजातीयस्य सहकारिसमवधाने सत्येव करणं सति करणमेवेति तावन्नियतान्वयव्यतिरेकाभ्यामवधारितम्, तत्र यद्येकस्मिन्नंशे(७) आशङ्का स्यात् स्यादंशान्तरेपि, विपरीतनिश्चयस्याकिञ्चित्करत्वादित्याह, तत्समवधान इत्यादिना(८) । तद्भ्यां सहकारिणः परामृशति ॥

दीधितिटिप्पणी ।

तत्समवधाने सतीत्यादिमूलेन एकत्र शङ्कायामन्यत्रापि तदापादनं निर्युक्तिकमत आह । बीजजातीयस्येति । तद्भ्याम् तत्समवधाने सतीत्यादौ तत्पदाभ्याम् । इदं च अव्यवहितपूर्वस्थशङ्काबोधापत्त्या व्याख्येयम् ॥

कल्पलता ।

एवमपीति । सहकारिसमवधानवतोप्यङ्कुरानुत्पत्तिः स्यादित्यर्थः । न तावदिति । क्षेत्रेपि तर्हि

(१) इति चेत्-पाठः । (२) तद्विरहेपि-पुण० पु० पा० ।
(३) करणमित्यप्या-पुण० पु० पा० । (४) तथा च साध्वी-पुण० पु० पा० ।
(५) नुपलब्धि-पाठः । (६) द्धिरिति-पाठः । (७) यद्येकांशे-पाठः ।
(८) तद्विरहेपि करणमित्याशङ्क्येतेतिप्रतिबन्दिमुखेन सूचितं शङ्काद्वये तुल्यप्रतिबन्धकसमवधानं स्पष्टयति विवृतौ, बीजजातीयस्येत्यादिना(१८ पङ्क्तौ) । सत्येव करणमित्यन्तावधारणं द्वितीयशङ्काया विरोधि, सति करणमेवेत्यवधारणं प्रथमशङ्कायाः । एकस्मिन्नंशे, सहकारिसमवहितस्याकरणे । अंशान्तरे, तदसमवहितस्य करणे । अकिञ्चित्करत्वात्, भवताऽविरोधित्वोपगमात् । गदाधरः ।

कल्पलता।

कदाचिदङ्कुरो न स्यादिति भावः। आशङ्क्येत इति। त्वन्मते समर्थादपि कुशूलस्थादङ्कुरानुत्पत्तिश्चेत् तदा सहकारिसमवहितादपि तदनुत्प(१)त्तिः शङ्कास्पदं स्यादेवे(२)त्यर्थः। अनुभवमतिक्रम्यापि यदि शङ्का, त-त्राह। तत्समवधान इति। आशङ्क्यतामिति। एता-वतापि न क्षणिकत्वक्षतिरिति भावः। अनिबन्धना चेच्छङ्का, तदाऽऽह(३)। तर्हीति। तथा चाङ्कुरार्थिप्रवृ-त्तिर्नियमतो न स्यादिति भावः। तथा चेति। प्रत्य-क्षानुपलम्भौ अन्वयव्यतिरेकौ, तत्परिशुद्धिः तदुप-स्थितकार्यकारण(४)भावानिश्चयः, तथा च प्रवृत्ति-निवृत्त्योरभावे निरीहं(५) जगज्जायेतेति भावः॥

दीधितिः।

ननु नियतान्वयव्यतिरेकाभ्यां बीजजातीयस्याङ्कुरं प्रति सामर्थ्यमेवाव(६)धृतम्, तच्च न बीजत्वेन, समर्थस्य क्षेपायोगात् कुशूलस्थादेरपि(७) बीजादङ्कुरोत्पाद(८)प्रसङ्गात्, परं तु बीजत्वा-वान्तरेण कुर्वद्रूपत्वेन, समर्थानां च स्वकारणसामर्थ्याधीनः समा-जनियमः प्रमाणबलादेव कल्प्यते, एकविरहेऽपरस्मात् कार्योत्पादे तस्याकारणत्वप्रसङ्गात्, अनुत्पादे च सामर्थ्यायोगात्, शिलादि-

दीधितिटिप्पणी।

मूले अवान्तरजातिविशेषमाश्रित्येत्यत्र हेतुर्नोक्तः, एवमेकवि-रहे इत्यपि नोक्तमतो न्यूनतापरिहारायाह। नन्विति। स्वमतेपि

(१) तदनुपप-कलि० मु० पु० पा०।

(२) स्यादि—कलि० मु० पु० पा०।

(३) तत्राह-पुण० पु० पा०।

(४) तदुपप्लवे कार्यकारण—पुण० पु० पा०।

(५) निर्बाधं-पाठः।

(६) सामर्थ्यमव-पुण० पु० पा०।

(७) कुशूलस्थादपि-पाठः।

(८) दङ्कुरोत्पत्ति-पाठः।

स्यादेतत्। न बीजादीनां(१) परस्परसमवधानवतामेव कार्यकरणमङ्गीकृत्या(२)शङ्क्यते येन समवधानानियमात्(३) सर्वेषामेव(४) तज्जातीयानामेकरसतानिश्चयः(५) स्यात्। नापि यत्र तत्र(६) समर्थोत्पत्तिमङ्गीकृत्य, येन विकलेभ्योपि कदाचित् कार्यजन्म(७)सम्भावनायां प्रत्यक्षानुपलम्भविरोधः(८) स्यात्। किं नाम, बीजादिषु समवहितेष्व(९)वान्तरजातिविशेष(१०)माश्रित्या-

दीधितिः।

मिलितास्तु बीजविरहिणः क्षित्यादयो न समर्थाः कार्याजनकत्वा(११)दित्याशयेना(शयेना)शङ्कते। स्यादेतदिति। परस्परेति। एवकारेणातिशय(१२)नैरपेक्ष्यलाभः। आशङ्क्यते देश्यते, क्षणिकत्वमिति शेषः(१३)। एकरसत्वम् एकस्वभावत्वम्, एककार्यसामर्थ्यमिति यावत्(१४)। जातिभेदः कुर्वद्रूपत्वम्। एतदङ्गीका(१५)रश्चा-

दीधितिटिप्पणी।

परस्परसहकारिमतामेव कार्योत्पादाङ्गीकारादसङ्गतेराह। एवकारेणेति। अतिशयः कुर्वद्रूपत्वम्, तथा च कुर्वद्रूपत्वनिरपेक्षकार्यजनकत्वमङ्गीकृत्य नाशङ्क्यत इत्यर्थः। प्रकृते फक्किकैव क्रियते न शङ्केत्यत आह। आशङ्क्यत इति। ननु कार्यव्यक्तिभेदनियामकतया

(१) स्यादेतत्। बीजादीना न-पुण० पु० पा०।
(२) मङ्गीकृत्य-पुण० पु० पा०। अयमेव शङ्करमिश्रसम्मतः पाठः।
(३) समवधानानियमात्—कलि० मु० पु० पा०। (४) सर्वेषां-पुण० पु० पा०।
(५) मेकरसतानियमः-पुण० पु० पा०। (६) यत्र-पाठः। (७) जनन-पुण० पु० पा०।
(८) प्रत्यक्षानुपलब्धिविरोध इति शङ्करमिश्रसम्मतः पाठः।
(९) समवहितेष्वन्य-पाठः। (१०) जातिभेद-पुण० पु० पा०। अयमेव दीधितिकृत्सम्मतः।
(११) कार्यावर्जकत्वा-पुण० पु० पा०। (१२) तिशये-कलि० मु० पु० पा०।
(१३) क्षणिकत्वम्-पुण० पु० पा०। (१४) सामर्थ्यम्-पुण० पु० पा०।
(१५) त्वम्। तदङ्गीका-पाठः।

पि(१) कार्यजन्म सम्भाव्यत इति ॥

दीधितिः।

नुगताङ्कुरजातीयनियामकतया, कार्यव्यक्तिभेदस्य तथोत्पन्न-कारणव्यक्तिभेदादेवोपपत्तेः। जातिश्च नैयायिकानां विधिरूपा व्यावृत्तिरूपा परेषां(२) धर्मिणि वर्त्तमाना जन्यत्वजनकत्व-योरवच्छेदिका अनुगतव्यवहारादिनियामिका चेति। सम्भा-व्यत इतीति। अङ्गीकृत्या(३)शङ्क्यत इत्यनुषज्यते। अङ्कुर-कारीणि बीजान्यङ्कुराकरणदशापन्नबीजावृत्तिजातिमन्ति न वा, तादृशबीजावृत्त्यङ्कुरजनकतावच्छेदकजातिमन्ति न वेत्या-दिकां कुर्वद्रूपत्वे विप्रतिपत्तिं वदन्ति। बीजवृत्तिजातित्वं प्रत्य-क्षत्वव्याप्यं न वेति तु(४) न वाच्यम्, कुशूलस्थबीजसाधार-ण्यातीन्द्रियजातिसिद्धावपि कुर्वद्रूपत्वासिद्धेः॥

दीधितिटिप्पणी।

कथं नोक्तमत आह। कार्यव्यक्तिभेदस्येति। व्यावृत्तिरूपेति। अतद्व्यावृ-त्तिरूपा। अङ्कुरकारीणीत्यादि। अङ्कुराकरणदशापन्नं यत् बीजं तद-वृत्तीत्यर्थः। जातिपदं रूपादिना सिद्धसाधनवारणाय। गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमाश्रित्येदम्, अन्यथा नैयायिकाभावकोटेर-प्रसिद्ध्यापत्तेः, लाघवेन बीजावृत्तिजातित्वस्यैवावच्छेदकत्वात्, न तु अङ्कुराकरणदशापन्नमन्तर्भाव्य, गौरवात्। तादृशजातेरवच्छेद-कत्वं न सिद्धमत आह। तादृशबीजेति। अङ्कुराकारिबीजेत्यर्थः। केषाञ्चिन्मतमाह। बीजवृत्तीति। अत्र विधिकोटिर्नैयायिकानाम्॥

कल्पलता।

स्यादेतदिति। पूर्वं कुर्वद्रूपत्वे साधकाभाव उ-क्तः, इदानीं विस्तरेण बाधकमभिधीयत इत्य(५)पौनरु-

(१) माश्रित्य-पाठः। (२) विधिरूपा परेषां व्यावृत्तिरूपा-पाठः।
(३) कृत्य-स० २ पु०। (४) न वेति-पाठः।
(५) इति न—पुन० पु० पा०।

कल्पलता ।

कस्यम्। बीजं सहकारिसमवहितं सद(१)ङ्कुरं करोति, सहकारिसमवधानमेव कदा भविष्यतीति सन्देहे बीजानां सर्वेषां समानशीलता प्रसक्ता, अतस्तत्सन्देहं(२) निरस्यति । न बीजा(दी)नामिति । शङ्क्यत इति । कदा सहकारिसमवधानं स्यादिति सन्दिह्यत इत्यर्थः । एकरसता(३) बीजत्वेनैव सर्वेषां बीजानामङ्कुरकारणता । अ(४)ङ्गीकृत्येत्यनन्तरं शङ्क्यत इत्यनुषज्यते । प्रत्यक्षानुपलब्धिविरोधः गृहीतान्वयव्यतिरेकभङ्गः । किं नामेति । बीजत्वं वा कारणतावच्छेदकं कुर्वद्रूपत्वं वा तथेति सन्दिह्यते इत्यर्थः ॥

न(५), दृष्टसमवधानमात्रेणै(६)वोपपत्तौ तत्कल्पनायां प्रमाणाभावात्(७), कल्पनागौरवप्रसङ्गप्रति(८)-

---

तेः ।

बीजत्वेन सामर्थ्येपि सहकारिविरहादेव क्षेप उपपद्यत इत्याशयवान्निराकरोति, नेत्यादिना(९) । प्रमाणाभावा-

दीधितिटिप्पणी ।

मूले तत्कल्पनायां मानाभावादिति यदुक्तम्, तत्र समर्थस्य क्षेपानुपपत्तिरेव मानं दातुं पार्यते, अत एवाभावेपि एतदुपष्टम्भकीकृतमित्यत आशयं पूरयति । बीजत्वेनेत्यादि । ननु अङ्कुराकरणदशापन्नबीजावृत्तीत्यादिविप्रतिपत्तिविषयाभावकोटिर्नैयायिकेन साधनीया, तत्र प्रमाणाभावादिति हेतुना नायातम्, अनेन हेतुना तस्य

---

(१) तद-पुण० पु० पा० ।   (२) तं सन्देह-पुण० पु० पा० ।
(३) रसता-कलि० मु० पु० पा० ।   (४) कारणताम कलि० मु० पु० पा० ।
(५) नेति-पाठः ।   (६) समवधानेनै-पाठः ।
(७) ल्पनायां मानाभावात्—दीधितिटिप्पणीकृन्मतः पाठः । (८) प्रसङ्गपरा-पाठः ।
(९) नेति-पाठः ।

दीधितिः ।

दिति । परेषां प्रमाणाभावमात्रेणैव प्रमेयाभावा(१)वधारणम्, यद्वक्ष्यति, यो यदर्थमित्यादि(२) । पार(३)मार्थिकं बाधकमाह । कल्पनेति । तादृशजातितदभावान्यतरवत्त्वस्य तादृशजातितदभावान्यतरप्रकारकप्रमाविषयत्वस्य(४) वा साधकात् सत्त्वादेः क्लृप्तजातिबाधादक्लृप्त(५)कल्पना(६)गौरवप्रतिस-

दीधितिटिप्पणी ।

सिद्धिरेव निरसिता, न तु तदभावसिद्धिर्विहितेत्यत आह । परेषामिति । अत एव तैः प्रमाणाभावेन शशशृङ्गाभावसाधनात् सर्वकालावृत्तित्वरूपमलीकत्वं स्वीक्रियते, अस्माकं तु अभावप्रमाणसत्त्व एव प्रमेयाभावावधारणमित्यादि मन्तव्यम् । केचित्तु परेण प्रमाणत्वावच्छिन्नाभावो नाङ्गीक्रियते, अतः प्रमाणस्फूर्त्यभावो हेतूकर्तव्यः, स च न प्रमेयाभावसाधकः, अत आह । परेषामिति । एवं च प्रमाणाभावमात्रेण प्रमाणस्फूर्त्यभावमात्रेणेत्याहुः । तच्चिन्त्यम् । यो यदर्थमितीत्यस्य सहकारि(७)तद्विरहप्रयुक्तकरणाकरणेनैव तादृशजातेरन्यथासिद्धिरेव तदभावबोधिकेत्यर्थः । पारमार्थिकम् उभयमतासिद्धम्, नैयायिकैः प्रमाणाभावेन प्रमेयाभावानवधारणात् । पारमार्थिकत्वं प्रकाशयति । तादृशजातीत्यादि । तादृशजातिः अङ्कुराकरणदशापन्नबीजावृत्तिजातिः । जातितदभावयोरेकेन सम्बन्धेनावर्तमानत्वादन्यतरस्य नैकेन सम्बन्धेन साध्यत्वमत आह । तादृशजातिप्रकारकेति । ननु दृष्टलमवधानेत्याद्यारभ्य यावन्तो हेतवः प्रयुक्तास्तावतां(८) मध्ये अपरेषामेव (अग्रे) प्रत्येकं विवरणं

(१) भावमात्रा–पाठः । (२) मिति–पाठः । (३) त्यादि । परेषां पार–पाठः ।

(४) तादृशजातिप्रकारकप्रमाविषयत्वतदभावप्रकारकप्रमाविषयत्वान्यतरस्य· पा० २ पु० । अयमेव पाठष्टिप्पणीकृन्मतः । (५) बाधात् क्लृप्त–कलि० मु० पु० पा० ।

(६) कल्पन–पुण० पु० पा० ।

(७) यदर्थमितीति । सहकारि–इत्यादर्शपुस्तके पाठः ।

(८) प्रयुक्तास्तेषां–इत्यादर्शपुस्तके पाठः ।

हृतत्वात्, अतीन्द्रियेन्द्रियादिविलोपप्रसङ्गात्, विकल्पा-

दीधितिः ।

न्धानसहकृतात् तदभावसिद्धिरिति भावः(१)। सम्मिश्रयैव चाग्रे बाधकद्वयविवरणम्। प्रमाणवतो गौरवस्याबाधकत्वात् प्रमाणाभावसहकृतं तद्बाधकत्वेनोपात्तमित्यपरे(२) । अतीन्द्रियेति । न च नेदमनिष्टं परेषामिति वाच्यम् । अपरिदृश्यमानगोलकादिव्यक्तिविलोपप्रसङ्गादित्यर्थात्(३)। न च विना गोलकं कथं रूपोप-

दीधितिटिप्पणी ।

कृतं, कथं नाऽऽद्यहेतुद्वयस्येत्यत आह । सम्मिश्रयैव चेति । तथा चोत्पत्तेरारभ्येत्यादिना*एकत्रैव तदुभयविवरणं कृतमिति, तथाहीत्यारभ्य विरूपाः करोतीतिपर्यन्तं दृष्टसमवधानोपपत्तिर्दर्शिता, केन वा प्रमाणेनेति प्रमाणाभावविवरणम्, येनेत्यादि द्वितीयहेतुविवरणम्। मतान्तरमाह । प्रमाणवत इति । तथा चैतन्मते प्रमाणाभावात् कल्पनागौरवेत्याद्येक एव हेतुरिति भावः । उभयस्य मिलित्वा एकहेतुत्वे पञ्चम्यन्तद्वयासङ्गतिः, प्रमाणाभावमात्रस्यैव सम्यक्त्वादित्ययमस्वरसोऽपरे इत्यनेन सूचितः । न चेदमिति(४) । गोलकातिरिक्तेन्द्रियानङ्गीकारादिति भावः । अपरीति । येषां गोलकादि न दृश्यत इत्यर्थः, एवं आकाशादिविलोपप्रसङ्गः, तथा चातीन्द्रियपदेनापरिदृश्यमान उक्तः, इन्द्रियपदेन च गोलक उक्त इति भावः। विलोपप्रसङ्गे हेतुं भङ्ग्या उत्थापयति । न च वि-

(१) सत्त्वादेरिति (पृष्ठे ८१ पङ्क्तौ ६)। हेतोरिति शेषः । क्लृप्तजातिबाधेति। तादृशबीजावृत्तिघटत्वपटत्वादिजात्यभावनिश्चयेत्यर्थः। कुर्वद्रूपत्वस्य सन्देहदशायां तादृशजातिसामान्यबाधासम्भवात् क्लृप्तेत्युक्तम् । अन्यतरान्तर्गतैकविशेषतादृशजातिसामान्याभावनिश्चयं विना तदन्तर्गतापरविशेषस्य तादृशजात्यभावस्य विशिष्य निश्चयासम्भवान्मूलोक्ताक्लृप्तजातिकल्पनागौरवज्ञानोपादानम्, तथा च बीजनिष्ठजातौ तादृशबीजावृत्तित्वस्याक्लृप्तत्वरूपस्य गौरवस्य प्रतिसन्धानसहकृततादृशबीजावृत्तिक्लृप्तजातिबाधः क्लृप्ताक्लृप्तसाधारणतादृशजातिसामान्यबाधनिश्चयकार्यकारीति तदभावरूपापरविशेषासिद्धिर्निष्प्रत्यूहैवेति भावः ।—गदाधरः ।

(२) त्यपरः–कलि० मु० पु० पा० । तथा च सम्मिश्रय प्रमाणाभावगौरवयोर्विवरणं साधु सङ्गच्छत इत्यर्थः ।–गदाधरः । (३) प्रसङ्गात्-पाठः ।

(४) न च नेदमिति–इति पाठोपेक्षितः ।

दीधितिः ।

लब्धिः, यतो गोलकस्य गोलकत्वेन न हेतुत्वम्, अपि तु कुर्वद्रूपत्वेन, तथा च कुर्व(१)द्रूपत्वशालिनस्तात्कालिककाया(२)देरेव तदुत्पत्तिसम्भवात्, शालिवृत्तेः कुर्वद्रूपत्वस्याशालाविव गोलकवृत्तेस्तस्यागोलकेपि सम्भवात् । अथैवं(३) कार्येण कारणानुमानं विलीयेतेति चेत्(४), किं न विलीयेत भवताम्(५) । तदुक्तम्, 'प्रत्यक्षानुपलम्भगोचरो न कार्ये प्रयोजक इति वदतो बौद्धस्य शिरस्येव(६) प्रहारः'- इति । इन्द्रियादीत्यतद्गुणसंविज्ञानो बहुव्रीहिरित्यन्ये(७) ।

दीधितिटिप्पणी ।

मा गोलकमिति । तात्कालिकेति । दर्शनादिकालीनेत्यर्थः । ननु गोलकवृत्तिकुर्वद्रूपत्वं यदि तात्कालिकार्थे वर्तते तदैवं स्यात्, न चैवमित्यत आह । शालिवृत्तेरिति । अथैवमिति । तात्कालिकयोग्यव्यक्तेरेव कार्योत्पत्तिसम्भवेन कार्यातीन्द्रियकारणं क्वापि न स्यादित्यर्थः, यदि च स्यात्तदा रूपोपलब्ध्याप्यतीन्द्रियमिन्द्रियमनुमीयेतेति भावः । प्रत्यक्षानुपलम्भः अन्वयव्यतिरेकः, तद्विषयो बीजत्वादिः ।

---

(१) तथा च तत्कुर्व—पाठः । अयं गदाधरसम्मतः । (२) कार्या-पुण० पु० पा० ।
(३) अथैवं वा—पाठः । (४) विलीयेतेति चेन्न, विलीयेत—कलि० मु० पु० पा० ।
(५) भवता-कलि० मु० पु० पा० । (६) स्यैव—कलि० मु० पु० पा० ।

(७) मूले अतीन्द्रिये(पृष्ठे ८२पङ्क्तौ१)ति विशेषणं कार्यलिङ्गकानुमानोच्छेदे सति तद्विलोपहेतुः । विवरणग्रन्थे, इदम् (पृष्ठे ८२ पङ्क्तौ ६) अतीन्द्रियेन्द्रियादेः प्रसाञ्जितमप्रामाणिकत्वम्, परेषां मानिष्टमिति, परैः प्रत्यक्षसिद्धगोलकादीनामेव कुर्वद्रूपत्वेन प्रत्यक्षहेतुताया उपगमसम्भवादिति भावः । अन्धकार इति क्वाचित्कः पाठः । अपरिदृश्यमानेति प्रत्यक्षप्रमाणागृहीतेत्यर्थकं प्रकृतातीन्द्रियपदार्थविवरणम्, तथा च गोलकस्येन्द्रियग्रहणायोग्यत्वरूपातीन्द्रियत्वविरहेपि न क्षतिरिति भावः । चाक्षुषादिरूपकार्यैकप्रमाणगम्यानामिन्द्रियत्वेन परैरभ्युपगतानामिन्द्रियाधिष्ठानगोलकानामसिद्धिप्रसङ्गादिति समुदायार्थः, गोलकमन्तरेणापि तात्कालिकात् कुर्वद्रूपत्ववतः कायादेरेव तत्कार्योपपत्तेरिति मूलाभिप्रेतहेतुं शङ्कोत्तराभ्यां स्पष्टयति, न चेत्यादिना । रूपोपलब्धिरित्यत्र न चेत्यस्य सम्बन्धः । कथन्ताविरहे हेतुर्यत इत्यादिः । तत्कुर्वद्रूपत्वेति । रूपोपलब्धिकुर्वद्रूपत्वविशिष्टस्येत्यर्थः । तदुत्पत्तीति । रूपोपलब्ध्युत्पत्तीत्यर्थः । ननु कतिपयगोलकवृत्तेः कुर्वद्रूपत्वस्य गोलकभिन्नशरीरादिवृत्तित्वे गोलकविशेषत्वादिजात्या सङ्करप्रसङ्ग इत्यतः कुर्वद्रूपत्वस्य जात्यन्तरसङ्करो दुर्वार एवेत्याह । शालिवृत्तेरिति । अशाली, यवादिबीजे । एवम्, गोलकवृत्तिकुर्वद्रूपत्वस्यागोलकेपि स्वीकारे । कार्येण, धूमादिना । कारणानुमानम्, वह्न्याद्यनुमानम् । वि-

नुपपत्तेः, विशेषस्य विशेषं प्रति प्रयोजकत्वाच्चेति ।

दीधितिः ।

विकल्पानुपपत्तेः सङ्ग्राहकत्वप्रतिक्षेपकत्वविकल्पानुपपत्तेः । विशेषस्येति । बीजगतविशेषस्य बीजकार्यस्या(१)ङ्कुरस्य विशेषं प्रति प्रयोजकत्वं, न तु(२) बीजसामान्ये(३)ङ्कुरसामान्य(४)-

दीधितिटिप्पणी ।

अतीन्द्रियपदस्य यथाश्रुतार्थरक्षिणां मतमाह । इन्द्रियादीत्यादि । सङ्ग्राहकत्वेति । सङ्ग्राहकत्वप्रतिक्षेपकत्वयोर्यो विकल्प(५)स्तेन जातिविशेषस्यानुपपत्तिरित्यर्थः। यद्वा विकल्पः (विविधः) कल्पः, षष्ठीसमासः(६), अत एव मूले विकल्पमेव दर्शयिष्यति, स खल्विति । बीजगतविशेषस्येति प्रयोजकत्वान्वयि । एतावतापि न समीहितसिद्धिरित्यत आह । न त्विति। तथा च बीजगतविशेषाङ्गीकारेपि बीजाङ्कुर-

लीयेतेति । वन्ह्यादिवृत्तिधूमादिकुर्वद्रूपत्वस्यावन्हावपि सम्भवज्ञानेन वन्ह्यादिकं विना धूमाद्युत्पत्तावपि वन्ह्यादौ धूमादिहेतुत्वाभावप्रसङ्गासम्भवेन विपक्षबाधकविरहेण व्यभिचारशङ्काया अनिवृत्तेरिति भावः । किं न विलीयेत भवतामिति । कुर्वद्रूपत्वेन हेतुतावादिनां बौद्धानाम्, अन्वयव्यतिरेकग्रहविषयतावच्छेदकवन्हित्वादेर्धूमादिजनकतावच्छेदकत्वानुपगमेन धूमादिना वह्नित्वावच्छिन्नानुमानं विलीयेतेति भावः । उक्तम्, कुसुमाञ्जलौ । प्रत्यक्षानुपलम्भगोचर इति । कारणताग्राहकान्वयव्यतिरेकोपलम्भविषयतावच्छेदक इत्यर्थः, अपि तु कुर्वद्रूपत्वमिति शेषः । अतीन्द्रियपदार्थस्य यथाश्रुतार्थकत्वानुरोधिनामिन्द्रियादिपदस्य कार्यैकप्रमापकपरमतासिद्धातीन्द्रियान्तरादृष्टादिपरत्ववादिनां मतमाह । इन्द्रियेति ।—गदाधरः ।

(१) कार्या—कलि० मु० पु० पा० । कार्यम्-पाठः । (२) न—कलि० मु० पु० पा० ।

(३) सामान्यस्या —कलि० मु० पु० पा० । (४) न्येङ्कुरमात्र—पुण० पु० पा० ।

(५) विकल्पः विरुद्धः कल्पः, क्लृप्तिः, वृत्तिरिति यावत्, विरुद्धा वृत्तिः, अनुपपत्तिः, तथा च सङ्ग्राहकत्वप्रतिक्षेपकत्वयोरनुपपत्तिरित्यर्थः ।

(६) तथाविधविकल्पयोरनुपपत्तिरिति षष्ठीसमासः कर्तव्य इत्यर्थः ।

THE KUPPUSWAMY SASTRI
RESEARCH INSTITUTE.

दीधितिः ।

प्रयोजकतायाः प्रतिक्षेपकत्वं(१) यत इत्यर्थः(२) ॥

दीधितिटिप्पणी ।

योः न सामान्यकार्यकारणभावव्याहतिरित्यर्थः । यत इत्यनेन पञ्च-म्यर्थस्यापि व्याख्यानं कृतम् ॥

कल्पलता ।

दृष्टेति । अन्वयव्यतिरेकाविषयीभूते सति बी-जत्वे तदन्यकल्पनायां न प्रमाणमित्यर्थः । तत्र कुर्वद्रूपत्वे विप्रतिपत्तयः । अङ्कुरकारणतावच्छे-दकं(३) फलोपहितबीजमात्रवृत्ति न वा, बी-जवृत्तिजातित्वं प्रत्यक्षविषयत्व(४)व्याप्यं न वा, अङ्कुरोपहितमात्रवृत्तिधर्मोऽङ्कुरकारणतावच्छेदको न वा । प्रमाणाभावादिति । योग्यानुपलब्धेर्योग्य-व्यक्तिवृत्तिजात्यन्तराभाव एव सिद्धो यत इ-त्यर्थः । दोषान्तरमाह । कल्पनेति । बीजत्वे-नैव प्रत्यक्षसिद्धेनाङ्कुरकारणतावच्छेदे सम्भवति तदर्थमतीन्द्रियजातिकल्पना न सम्भवतीत्यर्थः । दोषान्तरमाह । अतीन्द्रियेति । बाह्यालोकादेरेव कु-र्वद्रूपात् साक्षात्कारोपपत्ताविन्द्रियकल्पनापि न स्या-दित्यर्थः । दोषान्तरमाह । विकल्पेति । शालित्वादि-

(१) क्षेपकं—पाठः ।

(२) विकल्पानुपपत्तेरिति मूलं स खलु जातिविशेषः शालित्वस्य सङ्ग्राहको वा स्यादित्या-दिमलानुसारेण व्याचष्टे । सङ्ग्राहकत्वेत्यादि (पृष्ठे ८४ पङ्क्तौ १)। अङ्कुरकुर्वद्रूपत्वस्य शालित्वेन समं व्याप्यव्यापकभावो विरोधो वेतिपक्षद्वयस्यैवानुपपत्तेरित्यर्थः । विशेषं प्रतीत्यस्य विशेषमेव प्रतीत्यवधारणपरतया बीजगतविशेषस्याङ्कुरसामान्यप्रयोजकत्वव्यवच्छेदलाभाद्बीजसा-मान्यस्याङ्कुरसामान्यप्रयोजकताव्याघातकं न विशेषस्येति पर्यवसितमित्याशयेन तदर्थं स्पष्टयति । न त्विति ।—गदाधरः ।

(३) दकत्वं—कालि० मु० पु० पा० । (४) विषयता—पुस्त० पु० पा० ।

कल्पलता ।

ना परापरभावादिविकल्पवज्जाति(१)विशेषस्यानुपपत्तेरित्यर्थः । दोषा(२)न्तरमाह । विशेषस्येति । बीजत्वसामान्यस्य कश्चित्प्रयोजकत्वमावश्यकं, तच्च निरूप्यमाणमङ्कुरं प्रत्येव स्यादित्यर्थः ॥

तथाहि, उत्पत्तेरारभ्य मुद्गरप्रहार(३)पर्यन्तं घटस्तावज्जात्यन्तरानाक्रान्त एवानुभूयमानः(४) क्रमवत्सहकारिवैचित्र्यात् कार्यकोटीः(५) सरूपा विरूपाः(६) करोति, तत्रैतावतैव(७) सर्वस्मिन् समञ्जसे अनुपलभ्यमानजातिकोटिकल्पना(८) केन प्रमाणेन केन वो(९)-

दीधितिः ।

जात्यन्तरेति । जातेर्योग्यव्यक्तिवृत्तितयैव योग्यत्वात् तदभावस्य सुग्रहत्वात्, (९)तदतीन्द्रियत्वकल्पनायाश्चाप्रामाणिक(१०)त्वात् । एवकारबललभ्ये जात्यन्तरवत्त्वानुभवाभावे वा तात्पर्यम्, यद्वक्ष्यति, अनुपलभ्यमान(११)जातीति । केन

दीधितिटिप्पणी ।

जात्यन्तराभावः कथं प्रत्यक्ष इत्यत आह । जातेरिति । एवकारेति । अत्रैवकारेण जात्यन्तरेणानुभूयमानत्वाभावे सति जात्यन्तराभावेनानुभूयमानत्वं लब्धम्, तत्र च विशेषण एव तात्पर्यमिति भावः । यद्वक्ष्यतीति । तथा च तत्रापि जात्य(न्तरेणानु-

(१) जातिविकल्पेन—पाठः । विकल्पेन जाति-पुण० पु० पा० ।

(२) दूषणा-पुण० पु० पा० ।

(३) मुद्गरपात—पाठः ।

(४) जात्यन्तराक्रान्ततयाऽननुभूयमान इत्यर्थः । एतावता प्रमाणाभावो विवृतः ।—गदाधरः ।

(५) कर्मकोटीः—पाठः ।

(६) सरूपविरूपाः—पुण० पु० पा० ।

(७) करोति, तावत्यैव-पुण० पु० पा० ।

(८) कल्पनं-पुण० पु० पा० ।

(९) केन चो-पाठः ।

(१०) श्चाप्रमाण—पुण० पु० पा० ।

(११) अनुपलभ्य—पा० २ पु० ।

पयोगेन, येन (कल्पना)गौरवप्रसङ्गदोषो(१) न स्यात(२)। यो यदर्थं कल्प्यते तस्यान्यथासिद्धिरेव(३) तस्या(४)भाव इति भवानेवाहेति।

दीधितिः।

वेति(५)। उपयोगस्यापि प्रमाणत्वात् गोबलीवर्दन्यायेन पृथगुपादानम्(६)॥

दीधितिटिप्पणी।

भूयमानत्वा)भाव एव दर्शित इति भावः॥

कल्पलता।

तत्राद्यं विवृणोति। उत्पत्तेरारभ्येति। जात्यन्तरामाक्रान्त इति। यदि तदाक्रान्तः(७) स्यात् तदा तथोपलभ्येत, (न चोपलभ्यते,) तस्मान्न जात्यन्तराक्रान्त

(१) कल्पनादोषप्रसङ्गो-पाठः। (२) न सिद्ध्येत्-पाठः।

(३) रेव हि-पुण० पु० पा०। (४) तद-पाठः।

(५) केन चेति—पा० २ पु०।

(६) जात्यन्तरानाक्रान्त एवानुभूयमान इत्यस्य यथाश्रुतस्य जात्यन्तरशून्यतयानुभूयमान इत्यर्थे तन्मते जातिरूपविशेषस्यापि तैरतीन्द्रियत्वोपगमात्तदभावस्य प्रत्यक्षानुपपत्तेरसङ्गतिरित्याशङ्कां परिहरति। जातेरिति (पृष्ठे ८६ पङ्क्तौ १२)। योग्यवृत्तितयैव योग्यत्वादिति। जातेर्योग्यत्वे योग्यव्यक्तिवृत्तिनामात्रस्य प्रयोजकत्वादित्यर्थः, बीजगतविशेषस्यायोग्यत्वासम्भवादित्यर्थः। तदभावस्य, शाल्यादिबीजत्वाव्यापकजात्यभावस्य। सुग्रहत्वादिति। प्रत्यक्षेण ग्रहीतुं शक्यत्वादित्यर्थः। ननु योग्यवृत्तित्वेपि कुर्वद्रूपत्वजातेस्तादात्म्येन प्रत्यक्षविरोधित्वकल्पनया तत्साधारणनिरुक्तरूपावच्छिन्नाभावस्य दुर्ग्रहत्वमुपपादनीयमित्यत आह। तदतीन्द्रियत्वकल्पनाया इति। तस्या इन्द्रियग्राह्यत्वविरोधिताकल्पनाया इत्यर्थः। एतद्ग्रन्थस्य प्रमाणाभावविवरणरूपतया जात्यन्तरानाक्रान्त एवेत्येवकारबललभ्ये जात्यन्तराक्रान्ततया अनुभूयमानत्वस्य व्यवच्छेदे तात्पर्यस्यावश्यकतया जात्यन्तरशून्यतया अनुभूयमानत्वाविवक्षामाह। जात्यन्तरेति। अग्रे जात्यन्तरस्यानुपलभ्यमानत्वमात्रोक्त्या मूलस्यायमेवार्थोऽभिप्रेत इत्याह। वक्ष्यतीति। उपयोगेनेति मूलं अन्यथानुपपद्यमानस्य कार्यविशेषस्योपयोगितापरम्, तादृशकार्यमप्यनुमानप्रमाणान्तर्गतमिति प्रमाणसामान्यमभिधायोपयोगाभिधानं पुनरुक्तमित्याशङ्क्याह। उपयोगस्यापीति।—गदाधरः।

(७) क्रान्तं—पुण० पु० पा०।

कल्पलता ।

इत्यर्थः । तर्हि प्रथममेव किं नाकार्षीदित्यत आह । क्रमवादिति । कार्यकोटीरिति । अन्यथा तत्तत्कार्यं प्रति(१) कुर्वद्रूपत्वरूपजातिकोटिकल्पना स्या(२)दिति भावः । अत एवाह । सरूपा विरूपा(३) इति । द्वितीयं(४) हेतुं विवृणोति । यो यदर्थमिति । अन्ये तु भवानेवाहेतिपर्यन्तं प्रमाणाभावादित्यस्यैव विवरणप्रपञ्च इत्याहुः ॥

इष्टं च जातिभेदं तिरस्कृत्य स्वभावभेदकल्पनयैव(५) कार्योत्पत्तौ(६) सहकारिणोपि दृष्टत्वात् कथञ्चित्(७) स्वीक्रियन्ते, अतीन्द्रियेन्द्रियादिकल्पना तु विलीयेत मानाभावात् ।

दीधितिः ।

जातिभेदम् बीजत्वादिकम्(८) । स्वीक्रियन्ते, भवद्भिः(९) ॥

---

(१) त्कार्य—पुण० पु० पा० ।

(२) कल्पना न—पुण० पु० पा० । कल्पनं—पाठः ।

(३) सरूपविरूपा—पाठः । सरूपाविरूप–पुण० पु० पा० ।

(४) द्वितीये—पुण० पु० पा० । (५) स्वभावकल्पनयैव–पाठः ।

(६) कार्योपपत्तौ–पाठः । (७) दृष्टत्वात्–पाठः ।

(८) मूले, दृष्टम्, प्रत्यक्षसिद्धम् । विवृतौ जातिभेदमित्यस्य व्याख्या, बीजत्वादिकमिति । मूले, स्वभावभेदः, कुर्वद्रूपत्वम् । कार्योत्पत्तौ, सहकार्यकल्पनेपि कार्योत्पत्तिनियमोपपत्तौ । दृष्टजातितिरस्कारादेर्नैयायिककर्तृकत्वासम्भवात् दृष्टत्वात् अन्वयव्यतिरेकदर्शनाविषयत्वात् स्वीक्रियन्त इत्यत्र अस्माभिरिति कर्तृपदाध्याहारासम्भवादुक्तं कर्तृपदं पूरयति विवरणे, भवद्भिरिति । एवञ्च दृष्टत्वात् सहकारिकल्पकस्य दृष्टबीजत्वादितिरस्कारोऽनुचित इत्याक्षेपे मूल(स्थकथञ्चित्पद)तात्पर्यम् ।—गदाधरः । (९) भवद्भिरिति शेष—पाठः ।

कल्पलता ।

तृतीयं हेतुं विषदयति । दृष्टं चेति । दृष्टमिति जातिभेदविशेषणम्(१) । स्वीक्रियन्त इत्यनन्तरमनुमन्यामह इति शेषः । तदयमर्थः, अन्वयव्यतिरेकविषयीभूतबीजत्वतिरस्कारे स्वस्य भावो(२) धर्मः कुर्वद्रूपत्वं, तत्कल्पनयैव कार्योपपत्तौ दृष्टत्वात् सहकारिणः स्वीक्रि(३)यन्त इत्यनुमन्यामहे । इन्द्रियं न कल्पनीयम्(४), सहकारिण एव कुतश्चित् कुर्वद्रूपात् कार्योपप(५)त्तेरिति । आदिपदात् समनन्तरप्रत्ययादीनां ग्रहणम् । अत एवाह । मानाभावादिति । अन्यथानुपपत्तिरतीन्द्रियकल्पनायां मानम्, सहकारिण एव कस्यचित् कुर्वद्रूपत्वकल्पनायां सा नास्ती(६)त्यर्थः । गोलकादीनामपी(७)न्द्रियत्वे अदृष्टादिविशिष्टं तदतीन्द्रियमेव । अतद्गुणसंविज्ञानबहुव्रीहिर्वा ॥

त्रिकल्पानुपपत्तेश्च । स खलु जातिविशेषः शालित्वसङ्ग्राहको(८) वा स्यात्, तत्प्रति(९)क्षेपको

दीधितिः ।

स इति । अङ्कुरसामान्यप्रयोजको बीजमात्रवृत्तिरित्यर्थः । शालित्वस्य(१०) सङ्ग्राहकः व्यापकः । प्रतिक्षे-

---

(१) दृष्टं चेति—कलि० मु० पु० पा० । (२) स्वभावो—पाठः ।

(३) स्वीक्री—कलि० मु० पु० पा० । (४) न सिद्ध्येत्—पाठः ।

(५) कार्योत्प-पुण० पु० पा० । (६) कुर्वद्रूपत्वकल्पनास्त्वि-पुण० पु० पा० ।

(७) दीनामि—पाठः । (८) शालित्वस्य सङ्ग्राहकः-पाठः । अयमेव दीधितिकृत्सम्मतः ।

(९) स्यात्, प्रति-पुण० पु० पा० । अयमेव दीधितिकृत्सम्मतः ।

(१०) त्वस्य जातिविशेषस्य—पुण० पु० पा० । अयं गदाधरसम्मतः । जातिविशेषस्य शालित्वस्य—पाठः ।

वा। आद्ये कुशूलस्थस्यापि शालेः कथं न तद्रूपत्वम्(१)। द्वितीये त्वभिमतस्यापि शालेः कथं तद्रूपत्वम्(२)। एवं शालित्वमपि तस्य सङ्ग्राहकं प्रतिक्षेपकं वा। आद्येऽशालेरतत्त्वप्रसङ्गः(३) । द्वितीये

दीधितिः।

पकः व्यापकीभूताभावप्रतियोगी। एकस्य सङ्ग्राहकत्वे प्रतिक्षेपकत्वे वा लब्धे निरस्ते वाऽन्यस्य सङ्ग्राह्यत्वं प्रतिक्षेप्यत्वं वा लभ्यते निरस्यते चे(४)ति न तदुभयं विकल्प्य निराकृतम्। न तद्रूप(५)त्वम् न तज्जातिविशेषवत्त्वम्(६), तथा च कृतं तेन(७), बीजत्वसम(८)शीलत्वात् । अभिमतस्य अङ्कुरकारिणः। तस्य जातिविशेषस्य। प्रतिक्षेपकं वेति। यद्यप्येकस्या(९) जातेरपरप्रतिक्षेपकत्वविधिनिषेधयोरपरस्या अपि तत्प्रतिक्षेप(१०)कत्वविधिनिषेधावर्थलब्धौ, तथापि स्पष्टत्वा(११)र्थं विकल्प्य क्रमा(१२)नुरोधेनै(१३)तदभिहितम्। अतत्त्वप्रसङ्गः

दीधितिटिप्पणी।

ननु यथा सङ्ग्राहकत्वं विकल्प्य दूषितं, तथा सङ्ग्राह्यत्वं विकल्प्य कथं न दूषितमत आह। एकस्येति। यथासङ्ख्यमन्वयः। तदा को दोषोऽत आह। तथा चेति। यद्यपीत्यादि। एकस्य

(१) तद्रूपवत्त्वं-पाठः।
(२) तद्रूपवत्त्वम्-पाठः।
(३) रतत्त्वापत्तिः-पाठः।
(४) स्यते वे—कलि० मु० पु० पा०। (५) रूपव—पाठः।
(६) वत्त्वमित्यर्थः—पा० २ पु०। (७) तथा च तेन कृतं—पा० २ पु०।
(८) समान—पाठः। अयं गदाधरसम्मतः।
(९) स्या एव—पाठः। (१०) तत्क्षेप—पा० २ पु०।
(११) स्पष्टा—पुण० पु० पा०। (१२) विकल्पक्रमा—पुण० पु० पा०। अन्यत्रापि
(१३) नैव—पा० २ पु०।

तु शालेर्वा(१)तत्त्वप्रसङ्गः(२)।

दीधितिः।

तज्जातिविशेषशून्यत्वप्रसङ्गः(३)॥

दीधितिटिप्पणी।

सङ्ग्राहकत्वविधिनिषेधेऽपरस्यापि तथात्वं (न) लभ्यत इति प्रतिक्षेपकत्वमात्रस्यैव दर्शितम्॥

---

(१) शालेर—पाठः। (२) तत्त्वापत्तिरिति शङ्करमिश्रसम्मतः पाठः।

(३) विलक्षणशालियवाङ्कुरादिविशेषप्रयोजकावान्तरकुर्वद्रूपत्वानां शालित्वादिव्याप्यतायां बाधकासम्भवात् स इति व्याचष्टे। अङ्कुरसामान्येति। (पृष्ठे ८९ पङ्क्तौ १९) जातिविशेष इत्यस्य व्याख्या, बीजमात्रवृत्तिरिति। शालित्वस्योपाधित्वे वक्ष्यमाणजातिसङ्करासङ्गतेस्तस्य जातित्वमाह। जातिविशेषस्येति। सङ्ग्राहकत्वस्य सामानाधिकरण्यरूपत्वे तत्पक्षे कुशूलस्थस्य शालेः कुर्वद्रूपत्वाभावकथन्ताया असङ्गतेस्तस्य व्यापकत्वरूपतामाह। व्यापक इति। तत्प्रतिक्षेपकत्वस्य तत्समानाधिकरणाभावप्रतियोगितारूपत्वे तत्पक्षे सहकारिसमवहितशालेः कुर्वद्रूपत्वे कथन्ताया असङ्गतेराह। व्यापकीभूतेति। ननु कुर्वद्रूपत्वस्य शालित्वसङ्ग्राहकत्वप्रतिक्षेपकत्वे एव विकल्प्य दूषिते, न तु तत्सङ्ग्राह्यत्वप्रतिक्षेप्यत्वे, एवं शालित्वस्यापि कुर्वद्रूपत्वसङ्ग्राहकत्वप्रतिक्षेपकत्वे विकल्प्य दूषिते, न तु तत्सङ्ग्राह्यत्वप्रतिक्षेप्यत्वे इति न्यूनत्वमिति शङ्कां निराकरोति। एकस्येति। शालित्वकुर्वद्रूपत्वयोरेकतरस्यापरसङ्ग्राहकत्वे लब्धे अपरस्य तत्सङ्ग्राह्यत्वं लभ्यते, एवमेकतरस्यापरप्रतिक्षेपकत्वे लब्धे अपरस्य तत्प्रतिक्षेप्यत्वं लभ्यते, एवमेकस्यापरसङ्ग्राहकत्वे प्रतिक्षेपकत्वे च निराकृते अपरस्य तत्सङ्ग्राह्यत्वप्रतिक्षेप्यत्वे निराकृते भवत इति विकल्प्य तयोः परस्परसङ्ग्राहकत्वप्रतिक्षेपकत्वनिराकरणादेवार्थतः परस्परसङ्ग्राह्यत्वप्रतिक्षेप्यत्वनिराकरणसम्भवान्न तदुभयं विकल्प्य निराकृतमित्यर्थः। स जातिविशेष इत्यस्य प्रक्रान्तत्वात् कुशूलस्थशालेर्न कथं तद्रूपत्वमित्यतस्तादृशशालेः कथं तज्जातिरूपत्वाभाव इत्यर्थलाभे असङ्गतिरतः स जातिविशेषो रूपं धर्मो यस्य स तद्रूप इतिबहुव्रीहिसमासाभिप्रायेण तद्रूपत्वमिति व्याचष्टे। न तज्जातिविशेषवत्त्वमिति। अस्तु कुशूलस्थबीजस्यापि तद्रूपत्वमित्यत आह। तथा चेति। सतीति शेषः। कृतं तेनेति। अलं तज्जातिस्वीकारेणेत्यर्थः। बीजत्वसमानशीलत्वादिति। अकारिसाधारणत्वादित्यर्थः, तथा च तेन रूपेण हेतुत्वेऽपि सहकारिविरहस्य कार्याभावप्रयोजकताया आवश्यकत्वाद्बीजत्वेनापि हेतुतासम्भव इति भावः। अभिमतस्येत्यस्य व्याख्या, अङ्कुरकारिण इति। तस्येति मूलस्य व्याख्या, जातिविशेषस्येति। ननु कुर्वद्रूपत्वस्य शालित्वविरुद्धत्वरूपतत्प्रतिक्षेपकत्वस्य निराकृतत्वादेव शालित्वे तद्विरुद्धत्वं निराकृतं भवति, स्वं यदविरुद्धं तस्य स्वविरुद्धत्वाप्रसक्तेरिति शालित्वमपि तस्य सङ्ग्राहकं प्रतिक्षेपकं वेति विकल्प्य दूषणाभिधानमर्थपौनरुक्त्यग्रस्तमित्याशङ्कते। यद्यपीति। अतत्त्वप्रसङ्गेत्यस्य न सः असः, तस्य भावोऽतत्त्वमिति व्युत्पत्त्या प्रसक्तस्य तज्जातित्वाभावप्रसङ्गार्थकत्वाभिमानस्य निराकरणाय नास्ति स जातिविशेषो यत्रेति बहुव्रीहिणाऽतच्छब्दो जातिविशेषशून्यार्थकस्तत्त्वमतत्त्वमित्यर्थकता स्फुटयति। तज्जातिविशेषेति।—गदाधरः।

कल्पलता ।

चतुर्थं दूषयति(१) । विकल्पेति । त्व(२)दभ्युपगतानां वि(विधानां)कल्पनानामनुपपत्तेरित्यर्थः॥ शालित्वसङ्ग्राहकः शालित्वव्यापकः । तत्प्राति(३)क्षेपकः तद्विरोधी । कथमिति । तत्राप्यङ्कुरकुर्वद्रूपत्वस्य सत्त्वादित्यर्थः । तद्रूपत्वमिति । कुर्वद्रूपत्वमित्यर्थः । परस्परविरोधादिति भावः(४) । एवमिति । यद्यपि परस्परप्रतिक्षेपकत्वं विकल्पितमेव, तथापि शालित्वं पुरस्कृत्य विकल्प्यत इत्य(५)पौनरुक्त्यम् । आद्य इति(६) । अतत्त्वापात्तिरि(७)ति । (८) शालित्वस्य(९) कुर्वद्रूपत्वव्यापकत्वे यवादीनामङ्कुरकारित्वं न स्यादित्यर्थः । (अतत्त्वापत्तिरिति । अङ्कुराकुर्वद्रूपत्वापत्तिरित्यर्थः)(१०) ॥

न च नोभयमपीति वाच्यम् । विरोधाविरोधयोः

दीधितिः ।

नोभयमपीति । न सङ्ग्राहकं नापि प्रतिक्षेपकमित्यर्थः । विरोधाविरोधौ सहानवस्थानावस्थाने, तथा च वि-

दीधितिटिप्पणी ।

उभयत्वावच्छिन्नाभावभ्रमनिरासायाह । नोभयमपीति । ननु तदभावव्याप्यत्व(११)रूपविरोधतत्सामानाधिकरण्यरूपाविरोधयोर्भिन्नः प्रकार आकाशादावेवास्तीत्यत आह । विरोधाविरोधाविति । ननु

---

(१) चतुर्थमिति क्रियाविशेषणम्, चतुर्थदूषणमाहेत्यर्थः ।

(२) विकल्पेति । त—पुण० पु० पा० । (३) व्यापकः । प्रति-पुण० पु० पा० ।

(४) दित्यर्थः—पुण० पु० पा० । (५) इति न-पाठः ।

(६) आद्य इति नास्ति क्वचित् । (७) अतत्त्वप्रसङ्ग इ-पुण० पु० पा० ।

(८) अतत्त्वापात्तिरिति । अङ्कुराकुर्वद्रूपत्वापात्तिरित्यर्थः । द्वितीय इति ।-कलि० मु० पु० पा० । (९) शालित्वं—पाठः । (१०)( ) इति चिन्हितो ग्रन्थः कलि० मु० पु० नास्ति ।

(११) व्यापकत्व-इत्यादर्शपुस्तके पाठः ।

दीधितिः ।

रोधे प्रतिक्षेप्यप्रतिक्षेपकभावोऽविरोधे चावश्यं सङ्ग्राह्यसङ्ग्राहकभावः, लाघवेन सामान्यत एव मिथोऽव्यभिचारिजात्योः सामानाधिकरण्यविरहस्य समानाधिकरणजात्योश्च मिथोऽव्यभिचार(१)विरहस्य विशेषतश्च तज्जातिसमानाधिकरणाभाव(२)प्रतियोगिन्यास्तदभावसमानाधिकरणायाश्च(३) जातेस्तत्सामानाधिकरण्याभावस्य तज्जातिसमानाधिकरणाभावप्रतियोगितत्समानाधिकरणजातेस्तदभाव(४)सामानाधिकरण्याभावस्य तादृशसमानाधिकरणधर्मस्य वा तदभावसमानाधिकरण(५)जातित्वाभावस्य(६) तत्समानशील(७)नियमानां चावधारणा-

दीधितिटिप्पणी ।

अविरोधे कथं सङ्ग्राह्यसङ्ग्राहकभावः, भूतत्वमूर्तत्वयोरतथाभावादतो जातित्वविशेषणदानेनाह । लाघवेनेति । निखिलषष्ठ्यन्तस्यावधारणादित्यनेनान्वयः, आद्ये प्रतिक्षेप्यप्रतिक्षेपकभावप्रदर्शनं, द्वितीये सङ्ग्राह्यसङ्ग्राहकभावप्रदर्शनम् । एवं विशेषत इत्यत्रापि बोध्यम्, लाघवेनेति सर्वत्र हेतुः, भवता गोत्वाश्वत्वादौ तथावधारणेन कस्याश्चिज्जातिसमानाधिकरणाभावप्रतियोगिन्यास्तदभावसमानाधिकरणजातेस्तत्सामानाधिकरण्याभावः कल्पनीयः, तादृश्याः कस्याश्चित् तत्सामानाधिकरण्यं कल्पनीयं, मया पुनस्तादृशजातित्वावच्छेदेन तत्सामानाधिकरण्याभावमात्रं कल्प्यते, ममैव कल्पनालाघवमित्यर्थः । ननु यादृशजातेर्व्याप्यजातिर्नास्ति, तत्र जातिसाङ्कर्यं न बाधकमायातमित्यत आह । तादृशसमानाधिकरणेति । तज्जातिसमानाधिकरणाभावप्रतियोगितत्समानाधिकरणस्येत्यर्थः । तत्समशीलानामिति । तादृशसमानाधिकरणतदभावसमानाधिकरणध-

---

(१) व्यभिचारि—पा० २ पु० ।

(२) धिकरणात्यन्ताभाव—पाठः । (३) याश्च—कलि० मु० पु० पा० ।

(४) तदभावा—कलि० मु० पु० पा० । (५) धिकरणस्य—पाठः ।

(६) भावस्यैव—कलि० मु० पु० पा० ।

(७) तत्समशीलानां—इति पाठष्टिप्पणीकृन्मतः ।

दीधितिः ।

दिति भावः(१)। अथैवं मृत्पाषाणसुवर्णादिघटेषु कथं घटत्व-

दीधितिटिप्पणी ।

मस्य जातित्वाभाव इत्यादीनामित्यर्थः। एवम् जातिसङ्करस्य दो-

---

(१) मूले, विरोधाविरोधयोः प्रकारान्तराभावादिति। (पृष्ठे ९४ पङ्क्तौ १४) विरोधाविरोधोभयविरोधिरूपान्तराभावादित्यर्थः, विरोधस्याविरोधस्य च विरहिणोऽसम्भवादिति यावत्। अत्र यदि विरोधस्तदभावव्याप्यत्वम्, अविरोधः सहावस्थायित्वमिति विवक्ष्यते, तदा तदुभयमवृत्तावेव नास्तीति प्रकारान्तराभावादित्यसङ्गतमत उभयोर्भावाभावरूपतामाह। विरोधाविरोधाविति। विरोधः तदधिकरणावृत्तित्वम्, अविरोधस्तदधिकरणवृत्तित्वमित्यर्थः। यद्यपि तयोस्तदभावव्याप्यत्वतदभावाव्याप्यत्वरूपत्वेपि प्रकारान्तराभावादिति सङ्गच्छते, तथापि गुरुशरीरतया तयोरुपेक्षितमिति ध्येयम्। ननु विरोधाविरोधयोः प्रकारान्तरासम्भवेपि सङ्ग्राहकत्वप्रतिक्षेपकत्वयोः प्रकारान्तरं सम्भवत्येव, भूतत्वमूर्तत्वादौ तदभावादित्यसङ्गतिमाशङ्क्य विरोधानङ्गीकारेऽविरोधोपगम आवश्यक इति जात्योरविरोधेऽवश्यं सङ्ग्राह्यसङ्ग्राहकभाव इति भावं स्पष्टयति। तथः चेति। ननु व्याप्यव्यापकभावविरहेपि भूतत्वमूर्तत्वयोरिव जात्योरपि सामानाधिकरण्यरूपोऽविरोधः स्वीकरणीय इत्याशङ्क्यां निराकरोति। लाघवेनेति। मिथोव्यभिचारीति। जातिमात्रस्य स्वव्यभिचारिस्वानिष्ठव्यभिचारप्रतियोगिजातिसामानाधिकरण्याभावस्येत्यर्थः, सामान्यतोऽवधारणादित्यनेन सम्बध्यते। एतावता शालित्वादौ जातित्वेन हेतुना स्वव्यभिचारिस्वाव्यापकजातिसामान्यसामानाधिकरण्याभावसिद्धौ अर्थतस्तत्समानाधिकरणतादृशकुर्वद्रूपत्वजातिनिराकरणनिर्वाहः। न च जातित्वरूपहेतुमत्यां सत्तायां स्वव्यभिचारिजात्यप्रसिद्ध्या तद्घटितसाध्यवत्त्वानिर्वाहः, स्वत्वाननुगमात् सामान्यनियमानिर्वाहश्चेति वाच्यम्। स्वव्यभिचारिस्वाव्यापकजातिसमानाधिकरणं यद्यत् स्वं तद्भेदकूटस्य साध्यतोपगमेन सामञ्जस्यात्, तादृशस्वपदार्थस्य घटपटसंयोगादिव्यक्तीनामेव प्रसिद्धत्वात्। व्याप्यव्यापकभावापन्नं यदुभयं तदवृत्तिजातिमात्रवृत्तिद्वित्वस्याधेयतानवच्छेदकत्वनियमे वा तात्पर्यम्, स्वाश्रयस्वाश्रयव्यापकोभयवृत्ति यद्यत् तदन्यत्वरूपं द्वित्वविशेषणमवृत्त्यन्तार्थः, तादृशद्वित्वत्वेन हेतुना तादृशद्वित्वत्वरूपपक्षतावच्छेदकावच्छेदेनाधेयतानवच्छेदकत्वसाधने सङ्कीर्णजातिनिराकरणं स्फुटमेव, सङ्कीर्णजातिद्वयसत्त्वे तद्वृत्तिद्वित्वस्याधेयतानवच्छेदकत्वव्याघातात्। मिथोव्यभिचारिजात्योः सामानाधिकरण्यविरहनियमवत् मिथःसमानाधिकरणजात्योर्मिथोव्यभिचाराभावनियमादपि सङ्कीर्णजातिखण्डननिर्वाहात्तादृशनियमावधारणमप्याह। समानाधिकरणेति। आधेयतावच्छेदकजातिपर्याप्तद्वित्वे मिथोव्यभिचारिद्वयापर्याप्तत्वस्यावधारणादित्यर्थः। मिथोव्यभिचारिद्वयापर्याप्तत्वं च स्वाश्रयव्यापकावृत्ति यद्यत्स्वं तदन्यत्वम्। व्यापकत्वं भेदगर्भम्। सामानाधिकरण्यसम्बन्धेन प्रतियोगिद्वयविशिष्टो योऽत्यन्ताभावस्तत्प्रतियोगितानवच्छेदकत्वं वा। शालित्वादिजातिं विशिष्य निवेश्य तदव्यापकतद्व्यभिचारिजातित्वादेस्तत्सामानाधिकरण्याभावादिनियमकल्पनयापि शालित्वादिसङ्कीर्णकुर्वद्रूपत्वनिराकरणसम्भवात्तादृशनियमानपि दर्शयति। विशेषत इति। व्याप्यदल एव तत्सामानाधिकरण्यं प्रवेश्य नियमप्रविष्टव्यभिचारस्याभावे व्यापकत्वावधारणाद्व्याप्यादिशि जातित्वमप्रवेश्य व्यापकाभावप्रतियोगिशरीरे तन्निवेश्य नियमकल्पनयापि समीहितनिर्वाहाच्च तान्नि-

दीधितिः।

मेका जातिः। न च संस्थानविशेष(१)वृत्त्येव घटत्वं, परम्परासम्बन्धेन च(२) रूपादि(३)सामानाधिकरण्यबुद्धिः(४),तादृशसंस्थानवत्त्वमुपाधिर्वा घटत्वमिति वाच्यम्। तत्राप्यन्यतरकर्मजत्वादिना साङ्कर्येण एकजात्यसम्भवात्। गुणगतजातौ (तु)(५) न साङ्कर्यमिति तु निर्बीजम्। अत्राहुः। सुवर्णत्वादिव्याप्यं नानैव घटत्वम्, घटपदमपि नानार्थमेव, अनुगतव्यवहारस्तु संस्थानवैजात्याग्रहेणैकजातीयसंस्थानग्रहनिबन्धनः, सर्वजनीनानुगतप्रतीतिसिद्धायास्तादृशजातेर्व्याप्यं भिन्नमेवान्यतरकर्मजत्वादिकम्, बाधकबलेन जन्यतावच्छेदकभेदेऽप्यदोषात्, अन्यतरकर्मजत्वादिजात्यनङ्गीकाराद्वा(६)। अपरे तु(७) प्रतिनियतपरस्परविरुद्ध-

दीधितिटिप्पणी।

षत्वे। साक्षात्सम्बन्धेन बुद्ध्युपपादनायाह। उपाधिर्वेति। तत्रापीति। संस्थानस्यावयवसंयोगात्मकत्वादिति भावः। प्राचीनभाषां दूरीकरोति। गुणगतेति। संस्थानेति। संस्थाने वैजात्याग्रहनिबन्धनं यदेकजातीयसंस्थानवत्त्वज्ञानं तन्निबन्धन इत्यर्थः। सर्वजनीनेति। तथा च एकजातीयसंस्थानवत्त्वमेव वास्तवमस्तीति भावः। यद्वा अनेन ग्रन्थेन संस्थानवृत्त्येव घटत्वमिति विवक्षितं, जातिसङ्करोद्धाराय पुनरिदमुक्तम्,अन्यतरकर्मजत्वादीति। न च कर्मजत्वादिमा-

---

यमद्वयमपि दर्शितम्। तत्समानशीलनियमानामिति। तज्जातिसमानाधिकरणतदभावसमानाधिकरणजातेस्तज्जातिव्यापकत्वमित्यादिनियमानामित्यर्थः। यत्र सङ्करेण जातिद्वयमेव न सिद्ध्यति, यथा भूतत्वविभुत्वादिके, तत्रोक्तसामान्यनियम एव मूलम्।–गदाधरः।

(१) संस्थान—पाठः। अयमेव गदाधरसम्मतः।

(२) सम्बन्धेन—कलि० मु० पु० पा०। (३) रूपादिना--पा० २ पु०।

(४) घटत्वे रूपादिसामानाधिकरण्यबुद्धिरित्यर्थः। (५) जातौ च—पाठः।

(६) एवमिति। (पृष्ठे९४ पङ्क्तौ२) सङ्करस्य जातित्वबाधकत्व इत्यर्थः। कथं घटत्वमेका जातिः, घटपदप्रवृत्तिनिमित्तजातेः कथमैक्यमित्यर्थः, मृत्तिकात्वादिना सङ्करादिति भावः। न च मार्द एव घटे घटत्वम्, अन्यत्र च घटव्यवहारस्तु तज्जातीयसंस्थानवत्त्वाद्भ्रमेण एवेति वाच्यम्। विनिगमकविरहात्। संस्थानवृत्त्येवेति। घटारम्भकविलक्षणावयवसंयोगवृत्त्येवेत्यर्थः, एवकारेण द्रव्यवृत्तित्वव्यवच्छेदः।

(७) अयं पाठष्टिप्पणीकृन्मतः। द्वा। परे तु—पाठः। अयं गदाधरसम्मतः।

नन्वेवं कथं नीलो महान् घटश्चलतीत्याकारा घटत्वे रूपपरिमाणचलनादिसामानाधिकरण्यप्रतीतिरित्यत आह। परम्परासम्बन्धेनेति। घटे तादृशजातेः स्वाश्रयसमवायिसमवेतत्वरूपपरम्परासम्बन्धसत्त्वेनेत्यर्थः। तादृशपरम्परायाः सम्बन्धत्वमसहमानमाह। तादृशेति। जातिविशेषवदित्यर्थः। संस्थानवत्त्वम्, संस्थानसमानाधिकरणद्रव्यत्वम्। अन्यतरकर्मत्वादिना क्रियाहेतुत्वे मानाभावादाह, आदीति, कर्मसामान्यजन्यतावच्छेदकपरिग्राहकम्, कपालिकाकपालसंयोगजकपालद्वयसंयोगादपि घटोत्पत्त्या तत्संयोगे कर्मजन्यतावच्छेदकजातिविरहेण घटत्वस्य च व्यवहारानुरोधात् स्वीकरणीयत्वेन तयोः सङ्करो बोध्यः। न च संयोगजः संयोगो न द्रव्यारम्भकः, अपि तु कर्मज एव, परमाणुद्वये संयोगजसंयोगासम्भवेन कर्मजतत्संयोगस्यैव द्व्यणुकारम्भकतया विपरीतकल्पनाया असम्भवादिति वाच्यम्। यत्र कपालिकासंयुक्तकपालिकायां कपालिकान्तरसंयोगात् कपालान्तरोत्पत्तिस्तत्र कपालयोः कर्मजन्यसंयोगासम्भवेन तत्र घटानुभवस्य दुरपह्नवत्वेन संयोगजसंयोगस्यापि द्रव्यारम्भकताया दुर्वारत्वात्। ननु गुणगतजातौ सङ्करो न बाधकः, अपि तु द्रव्यगतजातावेवेति संस्थानवृत्तिघटत्वस्य कर्मजत्वादिना सङ्करेऽपि न जातित्वानुपपत्तिरित्यत आह। गुणेति। साङ्कर्यमिति। बाधकमिति शेषः। इति त्विति। एतादृशविशेषस्त्वित्यर्थः। शङ्करमिश्रमतानुसारेण सिद्धान्तं सङ्गमयति। अत्राहुरिति। नानैव घटत्वम्, घटपदप्रवृत्तिनिमित्तं भिन्नभिन्नमेवेत्यर्थः, तथा च सुवर्णत्वादिना न सङ्करः, समानाधिकरणजात्योर्व्याप्यव्यापकभावादिति भावः। एवं सति घटपदस्य नानार्थत्वापत्तिरित्यत्रेष्टापत्तिमाह। घटपदमपीति। ननु घटपदस्य नानार्थत्वे मार्दपाषाणादिघटेषु इमौ घटौ एते घटा इत्याद्येकघटपदेन व्यवहारानुपपत्तेः, मार्दपाषाणादिनिष्ठद्वित्वाद्यवच्छिन्ने एकजात्यवच्छिन्नाभेदस्य ततः प्रतीतेः, तस्य च बाधादित्यत आह। अनुगतेति। संस्थानवैजात्याग्रहेण एकजातीयसंस्थानग्रहनिबन्धन इति। संस्थानव्यक्तीनां भेदेऽपि द्वित्वावच्छिन्न एकजातीयसंस्थानवदभेदसत्त्वेन तदभेदपर एव तादृशो व्यवहारः, यत्र एकः कर्मजसंयोगारभ्योऽपरश्च संयोगजसंयोगारभ्यस्तत्र संस्थानगतजात्योः सङ्करभयेन भेदेऽपि संस्थानवैजात्याग्रहात् संस्थानयोरेकजातीयत्वभ्रमेणाप्रमाणरूप एव तादृशो व्यवहार इत्यर्थः, मार्दपाषाणादिघटेष्वयं घटोऽयं घट इति व्यवहारस्य च नानुपपत्तिप्रसक्तिः, घटपदस्य नानार्थतयैव तदुपपत्तेः। वस्तुतोऽयं घटोऽयं घट इति व्यवहारस्य भिन्नधर्मपरत्वे अयं घटोऽयमपि पट इत्यपि व्यवहारः स्यादित्याशङ्क्यानुगतेत्यादिना समाहितम्। संस्थानगतघटत्वाभ्युपगमेन समाध्यन्तरमाह। सर्वजनीनेति। प्रतीतीत्युपलक्षणम्, व्यवहारस्याप्यनुगतघटत्वसाधकत्वं बोध्यम्। भिन्नमेवेति। घटानारम्भकान्यतरकर्मादिजन्यसंयोगादिवृत्तितज्जन्यतावच्छेदकजातितोऽन्यदेवेत्यर्थः, एतच्च व्याप्यत्वनिर्वाहकतयोक्तम्। भिन्नत्वकल्पनाबीजमाह। बाधकबलेनेति। घटपदप्रवृत्तिनिमित्तजातिस्तारत्वादेरिवानुगतानतिप्रसक्तरूपाभावेनानुगतप्रत्ययानुरोधादेकत्वस्यावश्यकतया प्रसक्तजातिसङ्कररूपबाधकबलेनेत्यर्थः। ननु कर्मादिजन्यतावच्छेदकजातेरननुगमे कथं तज्जन्यतावच्छेदकत्वमत आह। जन्यतावच्छेदकभेदेऽपीति। अदोषादिति। कार्यकारणभावबाधकव्यभिचारादिदोषविरहादित्यर्थः, अवच्छेदकभेदे कार्यकारणभावभेदेन गौरवस्य गत्यन्तरविरहेणादोषत्वादिति भावः। कर्मजन्यतावच्छेदकजातिमनभ्युपगम्य जातिसङ्करमुद्धरति। अन्यतरेति। न चान्यतरकर्मत्वादिना विशेषरूपेण कर्मणो हेतुत्वस्य निर्युक्तिकत्वे कर्मसामान्यहेतुताया आवश्यकत्वात् तज्जन्यतावच्छेदकजातेरावश्यकतेति तया सह घटत्वस्य सङ्करो दुर्वार एवेति वाच्यम्। जातिस्वीकारेऽप्युत्तरदेशे व्यभिचारेण स्वा-

दीधितिः ।

संस्थानादि(१)व्यङ्ग्यानां मिथोविरुद्धसामग्रीप्रयोज्यानां(२) जातीनां व्यञ्जकसामग्रीसङ्करासम्भवेन(३) सङ्करो नेष्यते, न पुनः प्रमाणे सत्यपि परासाम्, अत एवानुद्भूतरूपादिवादिनां शुक्लपीतशीतोष्णादिसाधारणं प्रत्यक्षत्वप्रयोजकमेक(४)मुद्भूतत्वम्, अनुद्भूतत्वं च(५) न जातिः, मानाभावात्, शब्दसुखादिव्याप्ट-

दीधितिटिप्पणी ।

त्वाय सङ्कर इति वाच्यम् । तादृशजातेः कर्मजत्वव्याप्यत्वात् । जातिसङ्करं दूषयति । अपरे त्विति । परासाम् जातीनाम् । अनुद्भूतत्वस्य जातित्वमङ्गीकृत्य तादृशजातीनामभावकूट एव प्रत्यक्षत्वप्रयोजकः, न तूद्भूतत्वं जातिरिति ये वदन्ति तेषां मतं दूषयति । अत एवेति । मानाभावादिति । उद्भूतत्ववत् कारणतावच्छेदकत्वाद्यभावात् । नन्वस्म-

---

व्यवहितोत्तरत्वस्वसामानाधिकरण्योभयसम्बन्धेन क्रियाविशिष्टत्वं कार्यतावच्छेदके निवेश्य उत्तरदेशस्य कार्यतावच्छेदकविशिष्टकार्यानधिकरणत्वेन स्वाव्यवहितप्राक्क्षणावच्छिन्नक्रियाविशिष्टसमवायस्य कार्यतावच्छेदकसम्बन्धत्वमुपगम्य वा व्यभिचारवारणस्यावश्यकतया तत एव संयोगजसंयोगेपि व्यभिचारवारणसम्भवात् कर्मसामान्यजन्यतावच्छेदकजातेरप्रामाणिकता, एवमवयवगगनादिसंयोगस्य सामानाधिकरण्यसम्बन्धेनावयविगगनादिसंयोगहेतोस्तादृशसम्बन्धेनासम्बन्धिनि गगनादावुत्पत्तेर्व्यभिचारस्य वारणायादरणीयेन प्रकारेणैव क्रियाजन्यसंयोगे व्यभिचारवारणसम्भवात्संयोगजन्यतावच्छेदकजातेरप्यप्रामाणिकतेत्याशयात् । अथैवं मृत्तिकादिघटनिष्ठचक्रादिजन्यतायां संस्थानविशेषवन्मृत्तिकात्वादिकमेवावच्छेदकं वाच्यम्, तथा च लाघवान्मृत्तिकात्वादिव्याप्यजातिविशेषाणामेव तत्कार्यतावच्छेदकतया कल्पनमुचितमिति पूर्वमतमेव सम्यगिति वाच्यम् । मृत्तिकात्वादिव्याप्यजातिविशेषाणामुक्तयुक्त्या प्रामाणिकत्वेपि घटपदस्य नानार्थतापत्त्या गौरवेण प्रत्यक्षसिद्धसर्वजातीयघटसंस्थानानुगमकजातिविशेषावच्छिन्नसंस्थानस्य घटपदशक्यतावच्छेदकत्वेन तत्तज्जातीनां घटत्वानात्मकतया पूर्वमतस्यासम्यक्त्वात् । वस्तुतस्तु घटनिष्ठजातीनां प्रमाणान्तरशून्यत्वे दण्डादीनां घटहेतुत्वमेवाप्रामाणिकम्, कुतस्तज्जन्यतावच्छेदकतया द्रव्यगतजातिसिद्धिः । न चैवं घटार्थिनो दण्डादिगोचरप्रवृत्त्यनुपपत्तिः, अवयवक्रियाविशेषद्वारा घटजनकविलक्षणसंयोगं प्रति दण्डादीनां हेतुतयैव दण्डादौ घटार्थिप्रवृत्तेरुपपत्तेः, इष्टफलप्रयोजकगोचरप्रवृत्तौ फलप्रयोजकताज्ञानसहकृता प्रयोज्यफलगोचरेच्छा साक्षादेव हेतुः, आन्तरालिकफलसाधनताज्ञानसहकृततत्फलेच्छाद्वारा वेत्यन्यदेतत् ।—गदाधरः ।

(१) संस्थान—पाठः । (२) ना च—पुण० पु० पा० ।

(३) अयमेव गदाधरसम्मतः । सङ्करमन्तरेण—पाठः ।

(४) प्रयोजक—कलि० मु० पु० पा० । (५) अनुद्भूतत्वं तु—पाठः ।

दीधितिः ।

यस्तु अनुद्भूतव्यवहारोऽप्रत्यक्षत्वनिमित्तकः, अत एव च(१) मन्दं सुखमपेक्ष्यानुगतो विभिन्नजातीये(षु तेषु ते)षूत्कृष्ट(२)त्वव्यवहारः, अननुभूते(३) सुखे मानाभावेन सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदक(४)त्वायोगात्, इत्थं च त्रसरेणु(५)महत्त्व(त्व)मपेक्ष्य गगनादिमहत्त्वपर्यन्तमुत्कर्षो गगनादिमहत्त्वमपेक्ष्य परमाणुपरिमाणपर्यन्तमपकर्षश्चै(कै)क(६) एवेति मा-

दीधितिटिप्पणी ।

न्मते अनुद्भूतत्वादिजातिर्यत्र तत्रानुद्भूतव्यवहारः, भवन्मते उद्भूतत्वाभावनिबन्धनात् तद्व्यवहारस्य शब्दादौ प्रसङ्गः स्यात्, तत्र भवताप्युद्भूतत्वं न मन्यते, तत्र शब्दत्वसुखत्वयोरेव प्रत्यक्षजनकतावच्छेदकत्वे तादृशजात्यकल्पनादतः, शब्दसुखादीति । अत एव च सङ्करेपि जात्यङ्गीकारादेव च । विभिन्नेति । तथा च मिथोविभिन्नजातीयेष्वनुगतव्यवहारः सङ्कीर्णजातिनिबन्धन इति भावः । तेषु सुखेषु । नन्वत्र सजातीयसाक्षादित्यादिनोपाधिनैव तथा व्यवहारो भविष्यतीत्यत आह । अननुभूत इति । यद्यननुभूतं सुखं

---

(१) अयं पाठष्टिप्पणीकृन्मतः । अत एव—इति सर्वत्र पाठः ।

(२) षूत्कट—पुण० पु० पा० । अयमेव गदाधरसम्मतः ।

(३) अयं पाठष्टिप्पणीकृतां गदाधरस्य च सम्मतः । अनुद्भूते—पुण० पु० पा० ।

(४) प्रतिबन्धक—पाठः । (५) इत्थं च परमाणु—पा० २ पु० ।

(६) एकदेशिना सङ्कीर्णजातिमभ्युपगच्छता मतमाह । परे त्विति (पृष्ठे ९९ पङ्क्तौ १२)। विरुद्धसंस्थानव्यङ्ग्यानां तुरगत्वविहगत्वादीनां विरुद्धसामग्रीप्रयोज्यानां नीलत्वपीतत्वादीनां सङ्करो नेष्यते, अत्र यथासङ्ख्यं हेतुद्वयमाह । व्यञ्जकसामग्रीसङ्करासम्भवेनेति । व्यञ्जकयोः सामग्र्योश्च सङ्करासम्भवेनेत्यर्थः । व्यञ्जकासङ्करे प्रमाणाभावेन जातिद्वयसामानाधिकरण्याप्रसिद्ध्या प्रयोजकसामग्रीविरोधस्य च प्रयोज्यैकाधिकरण्यबाधकत्वात् सङ्करासम्भव इत्यवधेयम् । प्रमाणे सत्यपीति । सङ्करस्य प्रमाणसिद्धत्वे सत्यपीत्यर्थः । परासाम्, जातीनां सङ्करो नेष्यत इत्यनुषज्यते, उक्तनियमानामीदृशप्रमाणेन बाधादिति भावः । अत एव, प्रमाणे सति सङ्कीर्णजात्यभ्युपगमादेव । अनुद्भूतरूपानुपगमे चाक्षुषस्पार्शने प्रति रूपत्वस्पर्शत्वाभ्यामेव हेतुतया नोद्भूतत्वं प्रयोजकमत उक्तम्, अनुद्भूतरूपवादिनामिति । शुक्लपीतेति । शुक्लपीतशीतोष्णादिसाधारणमिति पाठान्तरे शुक्लपीतादिसाधारणमुद्भूतत्वं चाक्षुषत्वे शीतोष्णादिस्पर्शसाधारणमुद्भूतत्वं स्पार्शनत्वे प्रयोजकमित्यर्थः, न तु रूपस्पर्शसाधारणमेकमेवोद्भूतत्वं मूर्तप्रत्यक्षतायां प्रयोजकमित्यर्थः, तथा सति उद्भूतरूपसत्त्वेन प्रभायाः स्पार्शनापत्तेः । न च प्रभाया रूपमेव प्रत्यक्षं

न तु प्रभेति तद्रूपे मूर्तप्रत्यक्षप्रयोजकमुद्भूतत्वं नैयायिकैर्नोपेयमिति वाच्यम् । प्रभाया अचाक्षुषत्वे तद्गतसंयोगविभागचलनानामचाक्षुषत्वप्रसङ्गेन तन्मतस्यातितुच्छत्वात् । अथैवं प्रत्यक्षे महत्त्वहेतुता न स्यात्, परमाणुरूपादावुद्भूतत्वस्य सङ्कीर्णजातिमङ्गीकुर्वतामनभ्युपगमसम्भवेन परमाण्वादिप्रत्यक्षापत्तेरयोगात् । न चावयविन उद्भूतरूपादौ अवयवोद्भूतरूपादिहेतुता, अन्यथोद्भूतरूपाद्युत्पत्तिनियमासम्भवात्, स्थूलद्रव्येषूद्भूतरूपाद्युत्पत्तये तदारम्भकपरमाणावुद्भूतरूपाभ्युपगम आवश्यक इति वाच्यम् । उद्भूतरूपवद्द्रव्याद्यारम्भैकैरेवाणुभिरनुद्भूतरूपवद्वर्जनकपालस्थवद्द्व्याद्यारम्भादवयवोद्भूतरूपस्यावयविनि तदुत्पादनियामकत्वासम्भवादन्यस्यैव तन्नियामकताया आवश्यकत्वात्, तत्र तत्र विभिन्नपरमाणुकल्पने गौरवात् । अस्तु वा प्रत्यक्षत्वप्रयोजकादन्य एव तद्व्यापकः परमाणुरूपसाधारणोद्भवस्तत्प्रयोजक इति चेत्, परमाणुद्व्यणुकानभ्युपगन्तॄणामिव तदुपगमेऽपि महत्त्वकारणता नाभ्युपगन्तव्यैव । वस्तुतो जातिसङ्करस्यादोषत्वे रूपनिष्ठोद्भवो महत्त्वनिष्ठोद्भवो वा चाक्षुषत्वप्रयोजकतया कल्प्यते इत्यत्र विनिगमनाविरहान्महत्त्वस्यापि तत्कारणता दुर्वारैव । जातिसङ्करस्य दोषत्वेऽपि एकत्वोद्भव एव प्रत्यक्षत्वप्रयोजकः, महत्त्वे उत्कर्षापकर्षवत् एकत्वे अवान्तरजात्यन्तरासत्त्वेन सङ्करानवकाशादिति केचित् । चिन्तामणिकृता जातिसङ्करभयेन उद्भूतत्वमुपेक्ष्य नीलत्वादिव्याप्या भिन्नभिन्ना अनुद्भूतत्वजातयः स्वीकृताः, तदवच्छिन्नभेदकूटरूपोद्भव एव प्रत्यक्षताप्रयोजक इत्युपगतम्, तन्मतं निराकरोति । अनुद्भूतत्वमिति । मानाभावादिति । एकस्योद्भवस्य प्रत्यक्षताप्रयोजकत्वसम्भवे तावतैवोपपत्तेरिति भावः । उद्भूतत्वाभावस्यानुद्भूतत्वव्यवहारप्रयोजकत्वे शब्दसुखादावपि तद्व्यवहारप्रसङ्गात्तद्व्यावृत्तमनुद्भूतव्यवहारनियामकमाह । शब्दसुखादीति । अप्रत्यक्षत्वनिमित्तक इति । उद्भवस्य प्रत्यक्षत्वरूपत्वादिति भावः । अत एव, जातिसङ्करस्यादोषत्वादेव । मन्दम्, अपकृष्टम् । अपेक्ष्य, अवधित्वेन विषयीकृत्य । अस्य अनुगत इत्यस्य च उत्कटव्यवहार इत्यनेन सम्बन्धः । अनुगत इत्यनेन सङ्करपरीहाराय नानात्वेन स्वीकृताभिरुत्कर्षजातिभिरुत्कटव्यवहारानुपपत्तिर्दर्शिता । विभिन्नजातीयेष्विति । मधुररसास्वादमधुरशब्दश्रवणादिरूपविभिन्नजातीयहेतुसमुत्थेष्वित्यादिः । एतावता तत्तज्जातीयकारणप्रयोज्योत्कटानुत्कटसुखसाधारणजातिभिः सहोत्कटत्वस्य सङ्करो दर्शितः । ननूत्कटत्वरूपजातीनामननुगमेऽपि शब्दगतकत्वादिव्याप्यनानातारत्वादीनामिव सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकसुखवृत्तिजातित्वेन तासामनुगमसम्भवादनुगतव्यवहारोपपत्तिरित्यत आह । अननुभूतसुख इति । मानाभावेनेति । सुखसत्त्वेऽवश्यं तत्साक्षात्काराभ्युपगमादिति शेषः । सजातीयेति । सुखनिष्ठोत्कटत्वस्य सुखसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वासम्भवादित्यर्थः । यथा तारशब्दे गृह्यमाणे मन्दशब्दो न गृह्यते, तथा उत्कटसुखे गृह्यमाणे मन्दसुखं न गृह्यत इति न, अपि तु उभयसत्त्वे समूहालम्बनसाक्षात्कार एवेत्युत्कटसुखस्य मन्दसुखसाक्षात्काराप्रतिबन्धकत्वादिति भावः । एवञ्चेदं सुखमस्मादुत्कटमितिव्यवहारानुरोधात्पञ्चम्यर्थः सावधिकत्वं जातावपि स्वीक्रियत एव, अयमस्मात्तार इत्यादौ तु सजातीयविषयकसाक्षात्कारत्वाद्यनुगमकरूपप्रविष्टविषयित्वान्वयि प्रतियोगित्वमेव पञ्चम्यर्थ इति तारत्वादिजातीनां न सावधिकत्वमिति ध्येयम् । इत्थञ्चेति । जातिसङ्करस्यादोषत्वेनेत्यर्थः । एकैक एवेति । जातिसङ्करस्य दोषत्वे एकहस्तादिपरिमाणगतजातिविशेषैर्ह्रस्वत्वदीर्घत्वादिभिः सङ्करेण तद्रूपानुपपत्तेरिति भावः ।- गदाधरः ।

प्रकारान्तराभावात। व्यक्तिभेदेन सङ्ग्रहप्रतिक्षेपावपि न विरुद्धाविति(१) चेत, विलीनमिदानीं तदतज्जातीयत्वाविरोधेन, परिदृश्यमानकतिपय(२)व्यक्तिप्रतिक्षेपेपि

दीधितिः।

हुः(३)। व्यक्तिभेदे(ने)ति। व्यक्तिविशेषवृत्तित्वावच्छिन्न(४)सङ्ग्राहकत्वव्यक्तिविशेषवृत्तित्वावच्छिन्नप्रतिक्षेपकत्वे(५) इत्यर्थः। तदतज्जातीयेति(६)। तज्जातितत्प्रतिक्षेपकजातिमत्त्वे। मिथोव्यभिचारिजात्योः समावेशे बाधकम्, परिदृश्यमानेति(७)॥

दीधितिटिप्पणी।

स्यात तदेव तत्साक्षात्कारप्रतिबन्धकत्वेनेदं स्यादित्यर्थः। एकस्यैव सामान्यस्य सङ्ग्राहकत्वं प्रतिक्षेपकत्वं च कथं व्यक्तिभेद इत्यतोवच्छेदकभेदपरतया उपपादयन्नाह। व्यक्तिविशेषेति। यथाश्रुते अतज्जातीयपदेन तज्जातीयभेदस्यैव लाभात्, स चासङ्गतः, साङ्कर्येपि तद्व्यक्तेस्तज्जातीयभेदाभावादत आह। तदतादिति। यद्वा तज्जातितद्भिन्नजातिमत्त्वं न विरुद्धम्, एकस्यैव तद्घटस्य घटत्वपृथिवीत्वोभयजातिमत्त्वादत आह। तदतादिति। विलीनमित्यादिमूलेन सामान्यत

(१) सङ्ग्रहप्रतिक्षेपावविरुद्धाविति-पाठः। (२) दृश्यमान—पाठः।

(३) यद्यपि सङ्कीर्णजातिस्वीकारे शिंशपात्वादिलिङ्गकवृक्षत्वाद्यनुमाने विपक्षबाधकविरहेण व्यभिचारशङ्कानिवृत्त्यसम्भवाद्भ्रान्तपुरुषीयतदनुमानविलोपप्रसङ्गस्य तथा च गतं स्वभावहेतुनेत्यादिना मूले वक्ष्यमाणस्य दुर्वारतैव, तथापि अप्रामाणिकव्यभिचारिजातिकल्पने गौरवज्ञानस्यैव तत्कल्पनापरिपन्थिनो जागरूकतया तादृशस्थले सङ्कीर्णजातिनिरासः सुकरः, यादृशस्थले तु तादृशजातेः प्रामाणिकत्वं तत्र सतोपि गौरवज्ञानस्य प्रामाणिकपदार्थगोचरत्वेनाकिञ्चित्करतया सङ्कीर्णजातिः स्वीकरणीयेति तात्पर्यम्। अत एव न पुनः प्रमाणे सत्यपि परासामित्यादि स्वयमप्युक्तम्। मिथःसमाविष्टजात्योः सामान्यत एव मिथोऽव्यभिचारानियमो नाभ्युपेयते, विशेषतस्तु वृक्षत्वशिंशपात्वादीनां तादृशनियमः स्वीक्रियत एव, उद्भूतत्वरूपत्वादिजातीनां तु न, व्यभिचारिजातिकल्पनापरिपन्थिनो गौरवज्ञानस्य प्रामाणिकतदन्यपदार्थगोचरत्वाभ्यामेव तादृशनियमसाधकबाधकत्वादिति निगर्वः। (४) वच्छिन्न—पा० २ पु०।

(५) प्रतिक्षेपकत्वेन—पाठः। (६) तदतज्जातीति—पुण० पु० पा०।

(७) अव्यापकस्याविरोधिनश्च धर्मस्य धर्मिभेदः कथं व्यापकत्वविरोधित्वोपपादक इत्यतः स्वरूपेण सङ्ग्राहकत्वाद्यनिरूपकस्यापि विशेषणविशेषावच्छिन्नस्य तन्निरूपकत्वमविरुद्धमित्यर्थ-

मिथः क्वचित् तुरगविहग(१)योरपि सम्भेदसम्भवात् ।

दीधितिटिप्पणी ।

उभयत्र दोषदानेपि विशिष्य तद्दानाय परिदृश्यमानेति मूलम् ॥

कल्पलता ।

नोभयमपी(२)ति । न विरोधो न वा व्याप्य-व्यापकभाव इत्यर्थः । व्यक्तिभेदेनेति । कस्यांश्चि-द्व्यक्तौ क्षेत्रपतितायां शालित्वकुर्वद्रूपत्वयोः समा-वेशेपि क्वचिदसमावेशः स्यादित्यर्थः । विलीन-मिति । परस्परात्यन्ताभावसमानाधिकरणयोरपि जात्योः सामानाधिकरण्ये जातिप्रतिनियमो न स्या-दित्यर्थः । एतदेवाह । परिदृश्येति ॥

यश्च यस्य जातिविशेषः(३), स चेत् तं व्य-

दीधितिः ।

समाविष्टजात्योर्मिथोव्यभिचारे बाधकम्(४), यश्चे-

दीधितिटिप्पणी ।

विशेषपदेनैकदेशवृत्तिरुच्यते, न तु व्याप्यं, शालित्वस्य कुर्वद्रू-पत्वव्याप्यत्वास्वीकारात्, अत एकदेशवृत्तित्वं वाच्यं, तच्च तत्क-तिपयवृत्तित्वम्, न च घटत्वं द्रव्यत्वकतिपयवृत्तिरतो यत्पदस्य

कतां व्यक्तिभेदेनेत्यादेः स्पष्टयति । व्यक्तीति । एवं सति तुरगत्वविहगत्वादीनामविशेषितानामेव सर्वमतसिद्धो विरोधो विलीयेत, तेषां सामानाधिकरण्येपि उक्तदिशा सङ्ग्रहप्रतिक्षेपोपपत्तेरि-त्याह । विलीनमिति । तदतज्जातीयतापदेन तज्जातितदन्यजात्योर्विवक्षणे तयोरविरोधाद-सङ्गतिरतस्तत्पदं व्याचष्टे । तदतदिति । जातिसङ्कररूपबाधकस्योक्तनियमानां मध्ये द्विती-यनियमोपपादकतया परिदृश्यमानेत्यादिमूलं प्रथमनियमोपपादकतया च यश्चेत्यादिमूलं व्याचष्टे, मिथ इत्यादि । —गदाधरः ।

(१) तुरङ्गमविहङ्गम—पुण० पु० पा० ।

(२) नोभयामि-पुण० पु० पा० ।

(३) अयं पाठष्टिप्पणीकृन्मतः । यस्य विशेषः—पुण० पु० पा० ।

(४) व्यभिचारे च बाधकम्—पाठः । व्यभिचारे—पा० २ पु० ।

भिचरेत्, व्यभिचरेदपि शिंशपा पादपम्, अविशेषात्, तथा च गतं स्वभावहेतुना। विपर्यये बाधकं विशेष इति चेन्न, तस्येहापि सत्त्वात(१), तदभावे स्वभाव-

दीधितिः।

त्यादि(२)। यस्य यज्जातीयस्य। विशेषः एकदेशवृत्तिः। तम् तज्जातीयम्, तां जातिमिति यावत्। शिंशपा शिंशपात्वम्। स्वभावहेतुना तादात्म्यहेतुना। विपर्यय इति। वृक्षस्वभावा वृक्षसामग्र्यन्तर्गतसामग्रीका च शिंशपा यदि वृक्षमतिपतेत् तत्सामग्रीमतिपत्य(३) वा जायेत, तदा आत्मा(४)नमेवातिप-तेत् स्वसामग्रीमेवातिपत्य(५) जायेतेति बाधकम्। तस्येति। अङ्कुरकुर्वद्रूपस्वभावस्तत्सामग्र्यन्तर्गतसामग्रीकश्च शालिरङ्कुर-कुर्वद्रूपं च शालिस्वभावं तत्सामग्र्यन्तर्गतसामग्रीकं च यदि

दीधितिटिप्पणी।

जात्याश्रयपरत्वं, अत आह। यज्जातीयेति। यद्वा तं व्यभिचरेदि-त्यस्य तां जातिमित्यवश्यं व्याख्येयम्, तथा च यस्येत्यस्य व्यक्तिप-रत्वे तां जातिमिति तत्पदेन जातिपरामर्शो विरुध्यत इत्यत आह। यज्जातीयस्येति। विशेषपदेन व्याप्य उच्यते, तच्च न लगति, जाते-र्व्यक्तिव्याप्यत्वाभावादत आह। विशेष इति। एवञ्च जाति-पदस्य परनिपातो बोद्धव्यः, तथा च जातिविशेषः विशेषजा-तिरित्यर्थः, अन्यथानन्वयात्। न च पादपपदं कथं भावपरं न कृतमिति वाच्यम्। तमिति मूलस्य तज्जातीयमिति व्याख्यानेन व्यापकदिशि भावपरस्वासङ्गतेः। तां जातिमिति तु पर्यवसितार्थ-मात्रकथनम्, न तु शब्दार्थकथनम्। स्वभावहेतुना तादात्म्यसम्ब-न्धेन हेतुना, गतमित्यर्थः। शालिवदङ्कुरकुर्वद्रूप(६)मपि पक्षीकृत्या-पि तत् पायेत इति दर्शयति। अङ्कुरकुर्वद्रूपं चेति। शिंशपावृक्ष-

(१) सम्भवात्—पाठः। समानत्वात्—पाठः। (२) यश्चेति-पाठः।
(३) मतीत्य-पा० २ पु०। (४) तदा स्वात्मा-पुण० पु० पा०।
(५) मेव वातिपत्य-पुण० पु० पा०। (६) कुर्वद्रूपवत्त्व इत्यादर्शपुस्तके पाठः।

त्वानुपपत्तेः। उपपत्तौ वा किं बाधकानुसरणव्यसनेनेति(१)।

दीधितिः।

तदतिपतेत् तत्सामग्रीमतिपत्य वा जायेत, स्वात्मानमेवातिपतेत् स्वसामग्रीमेव चाति(२)पत्य जायेतेत्येवं(३)रूपस्य विपर्यये बाधकस्येत्यर्थः। तदभावे विपर्यये बाधकाभावे॥

दीधितिटिप्पणी।

योर्न परस्परपक्षत्वं सम्भवतीत्येकमात्रपक्षत्वमेव दर्शितम्। परस्परव्यभिचारिणोरेव द्वयस्य पक्षत्वसम्भवात्। अत्र च तत्सामग्र्यन्तर्गतत्वं तत्सामग्रीसमानाधिकरणाभावप्रतियोगित्वे सति तत्समानाधिकरणत्वरूपं बोध्यम्। साध्यमाह। यद्वीति। तत्पदेन(४) उभयपक्षीयसाध्यस्यैव परामर्शः, सत्त्वपर्यन्तस्याभावबोधनं निरर्थकमत आह। तदभाव इति॥

कल्पलता।

यश्चेति। शालित्वव्याप्यं कुर्वद्रूपत्वं यदि यवेपि स्यात्, तदा शिंशपात्वमपि वृक्षत्वं व्यभिचरेदित्यर्थः। किञ्चात इत्यत आह। तथा चेति। विपर्यय इति। यदि शिंशपा वृक्षं व्यभिचरेत् तदात्मानमपि(५) व्यभिचरेदितिविपक्षबाधकबलेन स्वभावहेतुः प्रवर्त्तितामित्यर्थः। तस्येहापीति। कुर्वद्रूपत्व(६)स्यापि शालित्वस्वभावत्वाद्विपक्ष(७)बाधकस्यास्य सत्त्वादित्यर्थः(८)। तदभावे विपक्षबाधकाभावे। उपपत्तौ वेति। वि-

(१) नुसरणेनेति—पाठः। (२) चाभि-पुण० पु० पा०। (३) जायेत, एवं-पाठः।
(४) तस्येहापि सत्त्वात्, तदभाव इत्यादिमूलस्थेन द्वितीयतत्पदेनेत्यर्थः।
(५) तदात्मानमेव—पाठः। (६) कुर्वद्रूप—कालि० मु० पु० पा०।
(७) शालिस्वभावत्वविपक्ष—पुण० पु० पा०।
(८) बाधकस्य तुल्यत्वादित्यर्थः—पाठः। बाधकसत्त्वादित्यर्थः—पुण० पु० पा०।

कल्पलता ।

पक्षबाधकाभावेपि स्वभावत्वो(१)पपत्तौ किं तदुपन्यासेनेत्यर्थः ॥

विशेषस्य विशेषं प्रति प्रयोजक(२)त्वाच्च । तथाहि(३), कार्यगतमङ्कुरत्वं प्रति बीजत्वस्याप्रयोजकत्वेऽबीजादपि तदु(४)त्पत्तिप्रसङ्गः ।

दीधितिः ।

अप्रयोजकत्वे अङ्कुरत्वावच्छिन्नकार्यताप्रतियोगिककारणतानवच्छेदकत्वे । अबीजादपीति । न च वैयधिकरण्यम्, इष्टापत्तिश्च, बीजभिन्न(५)धरण्यादेस्तदुत्पादादिति वाच्यम् । अङ्कुरत्वं यदि जातित्वे जन्यतावच्छेदकत्वे वा सति बीजमात्रवृत्तिधर्मावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं न स्यात्, बीजाजन्यवृत्ति(६)स्यात् बीजासमवहितसामग्रीजन्यवृत्तिर्वा(७) स्यादित्यत्र तात्पर्यात् । अङ्कुरत्वं यदि बीजमात्रवृत्तिधर्मावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं न स्यात्, अङ्कुरमात्रवृत्तिजातिर्न स्यादित्यत्र तात्पर्यमित्यन्ये ॥

दीधितिटिप्पणी ।

परमते जात्यनङ्गीकारात् अतद्व्यावृत्तेरेव जन्यतावच्छेदकत्वाङ्गीकारादाह । जन्यतेति । अजन्यवृत्तितयापि साध्यपर्यवसानेऽबीजादपीत्यादेर्न सिद्धिरत आह । बीजासमवहितेति । अबीजादपीत्यादेरपदार्थव्याख्यानमेव अन्येतु(८)मतेऽस्वरसः ॥

(१) स्वभावो—पुण० पु० पा० । (२) प्रति हेतु—पाठः ।
(३) तथा च—पाठः । (४) ऽबीजादु—पाठः । (५) बीजान्य-पाठः
(६) बीजजन्यान्यवृत्ति–कलि० मु० पु० पा० ।
(७) जन्यवृत्ति वा –पा० २ पु० ।
(८) अत्र तुकारश्चिन्त्यः, दीधितावभावात् । अन्येषामिति पाठः समीचीनः ।

कल्पलता ।

तथाहीति । अङ्कुरत्वावच्छिन्ने कार्ये बीजत्वावच्छिन्नमेव कारणम्, शाल्यङ्कुरत्वावच्छिन्ने (तु) शालिबीजत्वमित्यर्थः ॥

बीजस्य विशेषः कथमबीजे भविष्यतीति चेत्, तर्हि शालेर्विशेषः कथमशालौ स्यादित्यशाले(१)रङ्कुरानुत्पत्तिप्रसङ्गः ।

दीधितिः ।

बीजत्वेनाजनकत्वेपि बीजमात्रवृत्तिना कुर्व(२)द्रूपत्वेन जनकत्वादापादकासिद्धिमाशङ्कते । बीजस्येति । बीजस्य विशेषः बीजै(३)कदेशवृत्तिजातिः(४) । शाल्येकदेशवृत्तेः शालित्वव्यभिचारवद्वीजैकदेशवृत्तेरपि जातेर्बी(५)जत्वव्यभिचारित्व(६)सम्भवान्नाङ्कुरकुर्वद्रूपत्वस्य बीजमात्रवृत्तित्वमित्याशयेनाह । तर्हीति । अशालेः शालिभिन्नबीजात् ॥

दीधितिटिप्पणी ।

एवं बीजे तथात्वेपि कथं शालौ तथा स्यादिति यथाश्रुतदोषादन्यथा व्याख्यामाह । शाल्येकदेशेति ॥

कल्पलता ।

अशालेः यवादितः ॥

(१) अशालौ भविष्यतीत्यशाले-पाठः । अशालौ स्यादिति शाल-कलि० मु० पु० पा० । अशालौ भवेदित्यशाले—पा० २ पु० । (२) वृत्तिनाङ्कुरकुर्व-पुण० पु० पा० ।
(३) बीजस्यै-पुण० पु० पा० । (४) वृत्तिः-पा० २ पु० ।
(५) वृत्तेरपि बी-पुण० पु० पा० । (६) व्यभिचार-पुण० पु० पा० ।

अशालित्वदबीजेऽप्यसौ भवतु विशेषः(१), तथापि बीजत्वैकार्थसमवेत एवासावङ्कुरं प्रति प्रयोजक इति चेन्न, शालित्व(२)व्यभिचारे(३) शालित्वैकार्थसमवायवद्बीजत्वव्यभिचारे बीजत्वैकार्थसमवायेनापि नियन्तुमशक्यत्वात्, अविशेषात्।

दीधितिः।

यत्र कुर्वद्रूपत्वे वस्तुगत्या(४) बीजत्वैकार्थसमवायस्तत्प्रयोजकं किं वा तद्विशिष्टम्, आद्य आह। शालित्वेत्यादि। शालित्वैकार्थसमवायवदिति। तृतीयासमर्थाद्वतिः, शालित्वैकार्थसमवायेनेव(५)त्यर्थः। द्वितीये तु प्रत्यक्षासिद्धत्वाल्लाघवाद्विशिष्टस्य प्रयोजकत्वे विशेषणस्यापि तथात्वेनावश्यकत्वाद्विशेषणविशेष्यभावे(६) विनिगमकाभावाच्च शुद्धं बीजत्वमेव प्रयोजकमस्तु॥

दीधितिटिप्पणी।

यत्रेति। बीजत्वैकार्थसमवाय इत्युपलक्षणमित्यर्थः। नियन्तुमिति मूलम्, तथा चाबीजादपीत्यादिदोषः स्यादित्यर्थः। लाघवादिति शुद्धमित्यन्वयि॥

कल्पलता।

कुर्वद्रूपत्वं यथा शालित्वं व्यभिचरति, तथा बीजत्वमपि व्यभिचरतु(७), न चातिप्रसङ्गः, बीजत्वैकार्थसमवेतस्यैवाङ्कुरकुर्वद्रूपत्वस्याङ्कुरजनक(तावच्छे-

(१) जेऽप्यसौ विशेषो भवतु-पाठः। जे भवत्वसौ विशेषः-पुण० पु० पा०।
(२) शालित्वस्य-पुण० पु० पा०। (३) व्यभिचारो-पाठः।
(४) वस्तुगत्या-नास्ति क्वचित्। (५) समवायेने-कलि० मु० पु० पा०
(६) प्रयोजकत्वे विशेषणविशेष्यभावे-पा० २ पु०।
(७) व्यभिचरेत्-णपु० पु० पा०।

कल्पलता ।

दक)त्वमित्याह । अशालि(१)वदिति । यथाऽशालेरङ्कुरस्तथाऽबीजादपि भवन् केन वारणीयः । अत्र यदि बीजत्वं विशेषणं, तदा तस्य प्रयोजकत्वमेव स्यात्, उपलक्षणं चेत्, तदा (तु) न तन्त्र(२)मुपलक्ष्यतावच्छेदकरूपाभावा(३)दित्याह । शालित्वेति ॥

तस्माद्यो यथाभूतो यथाभूतमात्मनोन्वयव्यतिरेकावनुकारयति, तस्य तथाभूतस्यैव तथाभूते सामर्थ्यम् । तद्विशेषास्तु(४) कार्यविशेषं प्रयोजयन्ति शाल्यादिवदिति युक्तमुत्पश्यामः ।

दीधितिः ।

करणाकरणे(५) तु सहकारिसाकल्यवैकल्याभ्यामेवोपपन्ने, अन्यथा (सहकारि)समवहितबीजत्वेनापि जनकत्वस्य सुवचत्वादित्याशयवानुपसंहरति । तस्मादिति ।

कल्पलता ।

बीजत्वेन(६) कारणता अङ्कुरत्वेन च(७) कार्यतेत्यवश्यमभ्युपगन्तव्यमित्युपसंहरति । तस्मादिति । बीजे सत्यङ्कुरस्तदभावे तु नाङ्कुर इति बीजमङ्कुरत्वावच्छिन्नमेव कार्यं प्रत्यन्वयव्यतिरेकावनुकारयति दृष्टत्वादित्यर्थः ॥

(१) ह । स्वशालि-पुण० पु० पा० । (२) तदा न तत्तन्त्र-पाठः ।
(३) वच्छेदकैकरूपाभावा-पाठः । वच्छेदकैकस्याभावा-कलि० मु० पु० पा० ।
(४) तद्विशेषाः-पाठः ।
(५) कारणाकारणे-कलि० मु० पु० पा० ।
(६) बीजत्वेनैव—पुण० पु० पा० । (७) अङ्कुरत्वेनैव-पुण० पु० पा० ।

कस्य पुनः प्रमाणस्यायं व्यापारकलाप इति चेत्, तदुत्पत्तिनिश्चयहेतोः प्रत्यक्षानुपलम्भात्मकस्येति(१) ब्रूमः। अथ न्यायेन विना न ते परितोषः, शृणु तमपि तदा(२)। यदङ्कुरं(३) प्रत्यप्रयोजकं न तद्बीजजातीयं, यथा शिलाशकलम्, अङ्कुरं प्रत्यप्रयोजकं च कुशूलनिहितं(४) बीजमभ्युपेतं परैरिति

दीधितिः।

तदुत्पत्तिः, तस्मादुत्पत्तिः कार्यकारणभावः। प्रत्यक्षम् कारणान्वये कार्यस्य प्रत्यक्षम्, अनुपलम्भः(५) कारणव्यतिरेके कार्यव्यतिरेकस्योपलम्भः, तथा चान्वयव्यतिरेकग्रह(६)सध्रीचीनस्य प्रत्यक्षस्येत्यर्थः। परतीत्यैव परं प्रति सतर्क(७)न्यायप्रयोगमाह। यदङ्कुरमित्यादि। परैः सौगतैः।

दीधितिटिप्पणी।

मूले, व्यापारकलापः कारणत्वादिनिर्णयरूपः। तदुत्पत्तिपदेन कार्यकारणभाव उच्यते, तस्य च योगार्थमाह। तदुत्पत्तीति। तस्मात् कारणात्। एवं प्रत्यक्षानुपलम्भपदस्यापि योगार्थमाह। प्रत्यक्षमिति। अन्वयव्यतिरेकग्रहस्य प्रमाणत्वं नास्तीत्यतः प्रत्यक्षपदपूरणेनाह। तथा चेति। प्रत्यक्षरूपप्रमाणमेवास्तीति भावः। स्वमतीयन्यायो यदि, तदा कथं ह्यवयवप्रयोगोऽत आह। परतीत्येति। सतर्केति। विपर्यये किं बाधकमित्यादिना तर्कस्याप्यभिधानादिति भावः। परतीत्यानुमाने परपदेन नैय्यायिकबोधनादाह। परैरिति।

(१) नुपलम्भस्येति-पाठः। (२) तदा-नास्ति क्वचित्।
(३) यद्यथा यदङ्कुरं-पाठः। (४) कुशूलस्थं-पुण० पु० पा०।
(५) अनुपलम्भश्च-कलि० मु० पु० पा०।
(६) व्यतिरकज्ञाने-पाठः। (७) सतर्क-पुण० पु० पा०।

व्यापकानुपलब्धिः प्रसङ्गहेतुः ।

दीधितिः ।

व्यापकस्य बीजत्वव्यापक(१)स्याङ्कुरप्रयोजकत्वस्य अनुपलब्धिः अनुपलब्धिविषयोऽभावः। प्रसङ्गहेतुः प्रसङ्गस्य प्रसञ्जको वा हेतुः॥

दीधितिटिप्पणी ।

व्यापकं चात्र विपर्ययानुमाने बोध्यम्। ज्ञानाभावस्य हेतुत्वाकरणादाह । अनुपलब्धीति । षष्ठीतत्पुरुषे लक्षणापत्तेः कर्मधारयमाह । प्रसञ्जको वेति ॥

कल्पलता ।

परः पृच्छति । कस्येति । प्रमाणं विना हस्तसमाचरणमात्रं सर्व(२)मिदमिति भावः । अथमिति । बीजत्वमेवाङ्कुरं प्रति स्वरूपयोग्यतावच्छेदकं, न त्वङ्कुरे(३) कुर्वद्रूपत्वमिति प्रतिपादनार्थं यः पूर्वोक्तो व्यापारकलाप इत्यर्थः । उत्तरम्, तदुत्पत्तीति । (तत उत्पत्तिस्तदुत्पत्तिः) कार्यकारणभावः(४), स च प्रत्यक्षानुपलम्भाभ्यामन्वयव्यतिरेकाभ्यामवगम्यते(५), तथा च बीजे सत्यङ्कुरस्तं विना नाङ्कुर इति प्रत्यक्षादेवान्वयव्यतिरेक(६)ग्रहसहकारिणोनुमानाद्वा गृह्यत इति का तत्र कथन्तेत्यर्थः । ननु तथापि कथायां न्याय उपदर्शनीयो भवतीत्यत आह । अथेति । सौगतमतानुसारेणैव न्यायमुपदर्शयति । यदिति । बीजजातीयं नाङ्कुरं प्रति प्रयोजकमिति त्वयाभ्युपगम्यते, तदा त्वदभ्युपगमानुसारेण कुशूलस्थस्य बी-

(१) बीजत्व-कलि० मु० पु० पा० ।

(२) मात्र—पुण० पु० पा० । (३) त्वङ्कुर—पुण० पु० पा० ।

(४) कारणभावात्—पाठः ।

(५) रेकाभ्यामेव गम्यते—कलि० मु० पु० पा० । (६) रेकः ।—पाठः ।

कल्पलता ।

जस्य(१) बीजजातीयत्वं न स्यादित्यर्थः । यदि कुशूलस्थं बीजमङ्कुरं प्रति प्रयोजकं न स्या(द्बीजं न स्या)दित्यस्मद्दिशा तर्कोक्तिः । ननु कुशूलस्थस्याङ्कुराप्रयोजकत्वमापादकमेवासिद्धमित्यत आह । अभ्युपेतमिति । पराभ्युपगममात्रेणैव(२) तर्कप्रवृत्तेर्नापादकासिद्धि(३)स्तत्र दोष इत्यर्थः । परैः सौगतैः । प्रसङ्गात्मको(४) हेतुः प्रसङ्गहेतुः । व्यापकानुपलब्धिरिति । बीजत्वस्य व्यापकमङ्कुरप्रयोजकत्वं, त्वया च तथा नाभ्युपगम्यते इति त्वद्दिशा तदनुपलब्धिरित्यर्थः ॥

विपर्ययेऽपि किं बाधकमिति चेत्, अङ्कुरस्य जातिप्रतिनियमाकस्मिकत्वप्रसङ्ग इत्युक्तम् । बीजत्वं तस्य प्रत्यक्षसिद्धमशक्यापह्नवमिति चेत्, अस्तु तर्हि विपर्ययः, यद्बीजं तदङ्कुरं प्रति प्रयोजकं(५), यथा (ऽन्त्य)सामग्रीमध्यमध्यासीनं बीजम्, बीजं चेदं विवादास्पदमिति(६) स्वभावहेतुः ।

दीधितिः ।

आकस्मिकत्वम् निर्निमित्त(क)त्वम् । स्वभावहेतुः अनुमापको हेतुः । तादात्म्यहेतुरित्यन्ये ॥

दीधितिटिप्पणी ।

अनुमापकः पक्षधर्मताशालीत्यर्थः । तादात्म्यहेतुः तादात्म्यसम्बन्धेन हेतुः ॥

---

(१) बीजस्य—नास्ति क्वचित् । (२) भ्युपगममाश्रित्यैव—पुण० पु० पा० ।
(३) प्रवृत्तेर्नोत्पादकासिद्धि—पुण० पु० पा० । (४) प्रसङ्गात्मा—पुण० पु० पा० ।
(५) प्रति जनकं-पाठः । (६) विवादपदं-पुण० पु० पा० ।

कल्पलता ।

विपर्यय इति । अङ्कुराप्रयोजकमपि बीजं स्यादित्यत्र किं बाधकमित्यर्थः । तर्कमूलव्याप्तौ विपक्षबाधक(१)माह । अङ्कुरस्येति । बीजत्वेन चेदङ्कुरप्रयोजकता न स्यात् तदा कदाचिदबीजादप्यङ्कुरः स्यात्(२), तच्चानिष्टमित्यर्थः । ननु तर्कमात्रमतन्त्रमित्यत आह । अस्तु तर्हीति । बीजत्वमेव स्वभावहेतुः, तच्च(३) कुशूलस्थे(४) स्वरूपासिद्धं मा(५) स्यादिति प्रथमत एव परमङ्गीकारयति । बीजत्वं तस्येति(६) । कुशूलस्थं बीजमङ्कुरप्रयोजकं, बीजत्वात्, क्षेत्रपतितबीजवदित्यर्थः ॥

अङ्कुरस्य (हि) जातिप्रतिनियमो न तावन्निर्निमित्तः(७), सार्वत्रिकत्वप्रसङ्गात् । नाप्यन्यनिमि-

---

दीधितिः ।

उक्ते निर्निमित्त(क)त्वेऽनिष्टमाह । सार्वत्रिकत्वेति(८) । सार्वत्रिकत्वम् कार्यमात्रावृत्तित्वम् , तथा चाङ्कुरत्वं यदि किञ्चिद्रूपावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं न स्यात् कार्यमात्रवृत्तिजातिर्न स्यादित्यर्थः । नाप्यन्येति(९) ।

दीधितिटिप्पणी ।

उक्त इति । सत्त्वादेस्तथात्वेपि न सर्ववृत्तित्वरूपं, अत आह । कार्यमात्रेति । वैयधिकरण्यादाह । तथा चेति । इतरबाधसत्त्वेन ना-

(१) विपक्षे बाधक—कलि० मु० पु० पा० ।

(२) बीजत्वस्याव्यापकमङ्कुरप्रयोजकत्वं यदि स्यात् तदाऽबीजादप्यङ्कुरः स्यात्—कलि० मु० पु० पा० । (३) तस्य च—पुस्त० पु० पा० । (४) कुशूलस्थ—पुण० पु० पा० ।

(५) स्वरूपासिद्धिर्न—पुण० पु० पा० । स्वरूपासिद्धं—पाठः ।

(६) आर्थक्रमानुरोधेन पाठक्रममनादृत्येदं प्रतीकधारणम् । (७) निर्निमित्तकः-पाठः ।

(८) सार्वत्रिकेति-पा० १ पु० । (९) नाप्यन्येति-नास्ति क्वचित् ।

613

त्तः(१), तथाभूतस्य तस्याभावात् । सेयं निमित्तवत्ता विपक्षान्निवर्तमाना(२) स्वव्याप्यमादाय बीजप्रयोजकतायामेव विश्राम्यतीति प्रतिबन्धासिद्धिः ।

दीधितिः ।

तथा च सनिमित्तकत्वसाधकं कार्यमात्रवृत्तिजातित्वं क्लृप्तशालित्वादिबाधाक्लृप्त(३)कल्पनागौरवप्रतिसन्धानसहितं बीजत्वस्य निमित्तत्वं साधयतीति(४) सेयं निमित्तवत्ता विपक्षात् निर्निमित्तात् स्वव्याप्यम् कार्यमात्रवृत्तिजातित्वमादाय व्यावर्तमाना(५) अङ्कुरत्वे सिद्ध्यन्ती(६) परिशेषाद् बीजप्रयोजकतायामेव विश्राम्यति, अङ्कुरत्वस्य बीजप्रयोज्यत्वे सिध्यति बीजस्या(ऽङ्‌)कुरप्रयोजकत्वं सिध्यतीत्यर्थः । बीजं प्रयोजकं यस्येति बहुव्रीहिरित्यन्ये । बीजप्रयोज्यतायामिति पाठस्तु सुगम एव(७) ॥

दीधितिटिप्पणी ।

पीति नञो भावमाह । तथा चेति । क्लृप्त(शालित्वादि)बाधेति । प्राचीनमते सामान्यतोदृष्ट एव इतरबाधसहकारेण विशेषबोधको भवेदिति । साधयतीति । साधयति इति कृत्वा सेयं निमित्तवत्ता विश्राम्यतीति सम्बन्धः, तथा च पूर्वं तथा चेत्यादिना विश्रामहेतुकथनम् । ननु इतरबाधसत्त्वेन अङ्कुररूपनिमित्तवत्तासिद्धिरङ्कुरप्रयोज्यत्वसिद्धिरेव, न तु प्रयोजकताया अत आह । अङ्कुरत्वस्येति ॥

कल्पलता ।

उक्तमाकस्मिकत्वप्रसङ्गं प्रपञ्चयति । अङ्कुरस्य हीति । (निर्निमित्तत्वम् नियतजातीयकारणाप्रयो-

(१) स्यनिमित्तकः-पाठः ।
(२) विपक्षाद्व्यावर्तमाना-कलि० मु० पु० पा० ।
(३) शालित्वादिबाधात् क्लृप्त-कलि० मु० पु० पा० ।
(४) साधयति—पुण० पु० पा० ।
(५) मादाय निवर्तमाना-पाठः ।
(६) सिद्ध्यन्तीति-कलि० मु० पु० पा० ।
(७) सुगमः—पाठः ।

613

कल्पलता।

ज्यत्वम्।) सार्वत्रिकत्वम् अङ्कुरातिरिक्तवृत्तित्वम्। अङ्कुरत्वं यदि बीजत्वावच्छिन्नकारणताप्रतियोगिककार्यतावच्छेदकं न स्यादङ्कुरमात्रवृत्तिजातिर्न स्याद् द्रव्यत्वादिवदित्यर्थः। ननु कुर्वद्रूपत्वादिनिमित्तकमेव तत् स्यादित्यत आह। नापीति। तथाभूतस्येति। अङ्कुरमात्रनियामकस्येत्यर्थः। अभावादिति। तस्याप्रामाणिकत्वादित्यर्थः। विपत्त्यादिति। निर्निमित्तादित्यर्थः। यद्वा बीजाप्रयोज्यादित्यर्थः(१)। स्वव्याप्यं बीजप्रयोज्यतः(व्याप्यं कार्यमात्रवृत्तिजातित्व)मादाय बीजप्रयोज्यतायामङ्कुरस्य(२) विश्राम्यति। प्रयोजकतायामिति पाठे बहुव्रीहिः। प्रतिबन्धेति। यद्यद्बीजं तत्सर्वमङ्कुरप्रयोजकमितिव्याप्तिसिद्धिरित्यर्थः॥

दीधितिः।

यद्यपि चैतावतापि(३) बीजत्वस्य प्रयोजकत्वं न सिद्ध्यति(४), क्षितित्वादेरपि तथात्वसम्भवात्, तथाप्यङ्कुराणसाधारणरूपस्य प्रयोजकत्वसिद्ध्यैव(५) सिद्धमीहितम्, व्युदस्ते च बाधके अन्वयव्यतिरेकयोस्तुल्यतया(६) बीजत्वस्यापि प्रयोजकत्वं न दुर्लभमिति हृदयम्। प्रागुक्ते अबीजादङ्कुरोत्पत्ति-

दीधितिटिप्पणी।

तथापीति। क्षितित्वस्यापि जनकतावच्छेदकत्वेन तस्याफलोपाहितेपि वृत्तेर्नाक्षणिकत्वक्षतिरित्यर्थः। एतद्ग्रन्थेन बीजत्वप्रयोजकत्वलाभेन व्याख्यान्तरकाराणां मतमाह। प्रागुक्त इति। तथा चास्य

(१) बीजाप्रयोजनादित्यर्थः—पाठः। (२) प्रयोज्यतायां—पुण० पु० पा०।
(३) चैतावता—पा० २ पु०। (४) नायाति—पाठः।
(५) रूपस्य सिद्ध्यैव—पाठः। (६) स्तुल्यत्वात्—पाठः।

अथवा कृतमङ्कुरग्रहेण(१), बीजस्वभावत्वं क्वचित् कार्ये प्रयोजकं न वा। न चेत्, न तत्स्वभावं बीजम्, तेन रूपेण क्वचिदप्यनुपयोगात्। एवं च प्रत्यक्षसिद्धं बीजस्वभावत्वं नास्ति, सर्वप्रमाणागोचरस्तु विशेषोऽस्तीति विशुद्धा बुद्धिः। क्वचिदप्युपयोगे त्वेकस्य(२) तेन रूपेण सर्वेषाम विशेषः, ताद्रूप्यात, तथा च कथं

दीधितिः।

प्रसङ्गे तात्पर्यमित्यन्ये। इत्यनुशयेनैव वा, अथवेत्यादि(३)। परेषां जातिमात्रस्य जनकतावच्छेदकत्वनैयत्यमभिप्रेत्याह। बीजस्वभावत्वमित्यादि(४)। बीजत्वं किञ्चित्कार्यजनकतावच्छेदकं न वेति फलितार्थः। नेति पक्षे दूषणमाह। न तदिति। तत्रेष्टापत्तावाह। एवं चेत्यादि(५)। विशेषः कुर्वद्रूपत्वम्। प्रयोजकमिति पक्षं दूषयति, क्वचिदित्यादिना(६)। क्वचित् अङ्कुरादौ कार्ये एकस्य कुर्वद्रूपस्य बीजस्य तेन बीजत्वेन रूपेण उपयोगे जनकत्वे सर्वेषाम् अङ्कुराद्यकुर्वद्रूपाणामपि बीजानाम्

दीधितिटिप्पणी।

ग्रन्थस्य बीजत्वं यदि न प्रयोजकं तदाऽबीजादपि अङ्कुरोत्पत्तिप्रसङ्ग इत्यर्थे तात्पर्यमित्यर्थः, तथा च बीजत्वं प्रयोजकं स्यात्। अन्यदप्याह। इत्यनुशयेनेति। अनुशयात्(७) रुचिविरहात्। अजनकतावच्छेदकस्यापि जातेरङ्गीकारात् स्वमते न लगतीत्यत आह। परेषामिति। स्वभावत्वभागस्य वैयर्थ्यात् निष्कृष्टमाह। बीजत्वमि-

(१) किमङ्कुरग्रहेण-पाठः। (२) क्वचिदुपयोगेप्येकस्य-कलि० मु० पु० पा०।
(३) अथवेति—पाठः। (४) बीजस्वभावत्वमिति—पाठः।
(५) एवं चेति—पाठः। (६) क्वचिदिति—पाठः।
(७) अनुशयादिति दीधितिपाठमनुसृत्य व्याख्यातम्। अनुशयेनेति वाच्यम्।

किञ्चिदेव बीजं स्वकार्यं कुर्यात्, नापराणि । न च वस्तुमात्रं तत्कार्यम्, अबीजात् तदनुत्पत्तिप्रसङ्गात् । नापि बीजमात्रम्, अङ्कुरकारिणोऽपि तदुत्पत्तिप्रसङ्गात् ।

दीधितिः ।

अविशेषः(१) अङ्कुरादिकारणत्वेन न विशेषः(२), ताद्रूप्यात् अङ्कुरादिजनकतावच्छेदकबीजत्व(३)शालित्वात् । स्वकार्यम् अङ्कुरादि(४) । अपराणि अङ्कुराद्यकुर्वद्रूपाणि बीजानि कथं न कुर्युर्यदि समर्थस्यापि सहकारिविरहान्नाकरणम् । अथ वस्तुमात्रं बीजत्वावच्छिन्नकार्यम्, अस्माकं वस्तुमात्रस्यैव क्षणिकत्वेन कार्यत्वात्, न च वस्त्वकारि किञ्चिदपि बीजमित्याशङ्क्य(५) निराकुरुते(६), न चेत्यादिना(७) । अबीजात् बीजशून्यकारणकलापात् तस्य वस्तुनः अनुत्पत्तेः प्रसङ्गात्(८) । नापि बीजमात्रमिति(९) । परेषां पूर्वपूर्वबीजक्षणेनोत्तरोत्तरबीजक्षणजननात्(१०) । तदुत्पत्तीति । बीजोत्पत्तीत्यर्थः । प्राथमिकबी-

दीधितिटिप्पणी ।

ति । शेषं पूरयति । कथं न कुर्युरित्यादि । ननु वस्तुमात्रं कथं कार्यम्, अत आह । अस्माकमिति । यथाश्रुते अन्यतमत्वस्य कार्यताव-

(१) अङ्कुराकुर्वद्रूपाणाम् अविशेषः—पा० २ पु० । बीजत्वेन सर्वेषामविशेषे न विवादः, कुर्वद्रूपत्वेनाविशेषो निराकृत इत्यतः पूरयति । अङ्कुरादिकारणत्वेनेति । तृतीयार्थोऽभेदः, कुर्वद्रूपाद्विशेषो वैलक्षण्यम् अङ्कुराद्यकारणत्वम्, तदभावे तृतीयार्थाभेदान्वयो बोध्यः ।—गदाधरः ।

(२) अविशेषपदेऽभावप्राधान्ये नञ्तत्पुरुषासम्भवः, अव्ययीभावोपगमेऽविशेषमित्येवं स्यात्, अतो वादिनाम विवाद इत्यत्रैव अकारो नञ्समानार्थक इति सूचयितुं नञ्पदेन अशब्दार्थं कथयन् व्याचष्टे । नेति ।—गदाधरः ।

(३) बीजत्वादि—पाठः ।

(४) अङ्कुरादिः—पाठः ।

(५) मित्याशङ्क्य—पाठः ।

(६) निराकरोति—पाठः ।

(७) न चेति—पाठः ।

(८) तत्पदस्यानुत्पत्तिपदेनैव षष्ठीसमासो न तु प्रसङ्गान्तेनेति स्पष्टयितुमनुत्पत्तिप्रसङ्गादिव्यसमासेन लिखनम् ।—गदाधरः । अनुत्पत्तिप्रसङ्गात्—पुण० पु० पा० ।

(९) बीजमात्रवृत्ति—पाठः ।

(१०) बीजजननात्—पाठः ।

नाप्यङ्कुराद्यन्यतममात्रम्, प्रागपि तदुत्पत्तिप्रसङ्गात् । यदा यदुत्पन्नं सत् यत्कार्यानुकूलसहकारिमध्यमधिशेते तदा तदेव कार्यं प्रति तस्य प्रयोजकत्वमिति चेत्, तत् किमवान्तरजातिभेदमुपादाय, बीजस्वभावेनैव वा। आद्ये स एव जातिभेदस्तत्र प्रयोजकः(१), किमायातं बीजत्वस्य । द्वितीये तु समानशीलानामपि सहकारिवै-

दीधितिः ।

जानुत्पाद(२) बीजसन्तानानुपरमप्रसङ्गोपि द्रष्टव्यः(३)। अङ्कुराद्यन्यतममात्रम् कदाचिदङ्कुरः कदाचिद्बीजं कदाचिच्चानुभव इत्यर्थः । प्रागपीति । प्रागङ्कुरस्य पश्चाच्च बीजस्योत्पत्तिप्रसङ्गादित्यर्थः, बीजत्वेनाङ्कुरादि(४)जननसामर्थ्यादिति भावः । अवान्तरजातिभेदम् तत्तत्कार्यकुर्वद्रूपत्वम् । अथाङ्कुराद्यन्यतमत्वेन कार्यता, अङ्कुरादयस्तु व्यक्तिस्थानीया इति(५) मतम्,

दीधितिटिप्पणी ।

च्छेदकपरत्वे प्रागपीत्याद्यसङ्गतिः, कारणसत्त्वे कार्यतावच्छेदकावच्छिन्नयत्किञ्चिदुत्पादस्यैवोपगमात्, यावदापादकाभावादत आह । कदाचिदिति । एतत् यद्यपीत्याद्युक्तम् । ? वस्तुतस्तु मूलमित्थमपि योजयितुं पार्यते, अन्यतमत्वस्यावच्छेदकत्वेपि विशेषसामग्र्यन्तरमुच्यते न वा, अन्त्ये प्रागपीति । आद्ये यदेत्यादि । तथा च प्रत्येकमेव जन्यतावच्छेदकं त्रयमिति भावः । प्राक् कुशूलस्थतादशायाम्, अङ्कुरस्योत्पादप्रसङ्ग इत्यर्थः । अपिशब्दस्वरसादाह । पश्चादिति । पश्चात् अङ्कुरोत्पत्तिदशायाम्, बीजस्योत्पत्तिप्रसङ्गादित्यर्थः । अन्यतमत्वस्य कार्यतावच्छेदकत्वमभिप्रेत्य स्वातन्त्र्येण फक्किकामवतारयति । अथेति । व्यक्तिस्थानीया इति । यथा दण्डसत्त्वे तद्द्रव्य-

(१) जातिभेदप्रयोजकः—पाठः । (२) बीजानुत्पादे—पाठः ।
(३) प्रसङ्गोपि बोध्यः—पाठः । (४) बीजत्वेनाङ्कुर—पाठः ।
(५) इति तु—पा० २ पु० ।

कल्यादकरणमित्यायातम्, तत्तत्सहकारिसाहित्ये(१) सति तत्तत्कार्यं प्रति प्रयोजकस्य(२) बीजस्वभावस्य(३) सर्वसाधारणत्वादिति(४) ।

दीधितिः ।

नैतदपि, प्राथमिकबीजानुत्पत्तिप्रसङ्गात्, अङ्कुरत्वावच्छिन्नं प्रत्यपि प्रयोजक(त्व)स्य वक्तव्यत्वात्, अन्यतमत्वेन जन्यत्वे मानाभावाच्चेति ॥

दीधितिटिप्पणी ।

क्रियापादयितुं न शक्यते, तद्वदित्यर्थः । अङ्कुरत्वावच्छिन्नं प्रत्यपीति । तथा च त्वन्मते कार्यमात्रवृत्तेः किञ्चिन्निरूपितकार्यतावच्छेदकत्वनियमरक्षार्थं इतराभावाद्बीजत्वमेव जनकतावच्छेदकं वक्तव्यमिति भावः ॥

कल्पलता ।

कुतमङ्कुरेति(५) । अङ्कुरत्वावच्छिन्नं कार्यं प्रति बीजानां बीजत्वेनैव कारणतेति किं विशिष्य व्यवस्थापनग्रहेण, प्रकारान्तरेणापि परि(६)शेषादिना तथैव पर्यवस्यतीत्यर्थः(७) । बीजत्वेन क्वचित् कार्ये बीजं यदि प्रयोजकं न(८) भवेत् तदा तेन रूपेण तदसत् स्यादिति(९), तच्च(१०) कार्यं परिशेषादङ्कुररूपमेव सेत्स्यतीति प्रघट्टकार्थः । बीजस्वभावत्वमि-

(१) सहकारिसाकल्ये—पाठः । (२) तत्तत्कार्यप्रयोजकस्य—पाठः ।
(३) स्वाभाव्यस्य—पाठः । (४) साधारण्यात्—पाठः ।
(५) किमङ्कुरेति—पुस्त० पु० पा० । (६) प्रकारान्तरेणापि वि—पुस्त० पु० पा० ।
(७) पर्यवस्यतीति—पुस्त० पु० पा० । (८) यदि न प्रयोजकं—पाठः ।
(९) स्यादित्यर्थः—पुस्त० पु० पा० । (१०) तत्—पाठः । तस्य—पुस्त० पु० पा० ।

कल्पलता ।

ति(१)। बीजत्वं किञ्चित्कार्यं प्रति कारणतावच्छेदकं न वेति विकल्पार्थः। न तत्स्वभावमिति। तर्हि बीजत्वं जातिरेव न स्यादित्यर्थः। ननु बीजत्वं मास्तु, अङ्कुरकुर्वद्रूपत्वमेव तथा स्यादित्यत आह। एवं चेति। क्वचिदिति। बीजत्वेन रूपेण बीजानां किञ्चित्कार्यं प्रति जनकत्वाभ्युपगमे सर्वाण्येव(२) बीजानि तथा स्युः, बीजत्वा(३)विशेषादित्यर्थः। वस्तुमात्रमिति। कार्यमात्रमित्यर्थः। यद्वा सर्वं वस्तु क्षणिकमेवेति तदभिप्रायेणोक्तं वस्तुमात्रमिति। एवं सति बीजासमवधाने घटपटाद्यपि न स्यादित्याह। अबीजादिति। ननु बीजाद्बीजमेव कार्यमस्तु, सभागसन्तानस्यैव मया क्षणिक(४)त्ववादिनाभ्युपगमादित्यत आह। नापीति। तर्हि चरमादपि बीजाद्बीजमेवोत्पद्येत, नाङ्कुरः(५), अङ्कुरस्याप्युत्पादे वा समानदेशताविरोधः, बीजसन्तानानुपरमः, प्राथमिकबीजानुत्पत्तिश्चेति भावः। ननु बीजमङ्कुरो बीजानुभवश्च कार्याणि बीजत्वावच्छिन्नकारणाज्जायन्तामित्यत आह। नापीति। कार्यमिति शेषः। तर्ह्युत्पन्नमात्रादपि बीजादेतानि कार्याणि स्युरित्याह। प्रागपीति। सहकारिसमवधानादिति शेषः(६)। सहकारिसमवधानं शङ्कते। यदेति। अवान्तरेति। अङ्कुरकुर्वद्रूपत्वादीत्यर्थः। आद्य इति।

(१) प्रघट्टकार्थः। स्वभावत्वमिति—पाठः। (२) सर्वाण्यपि—पुण० पु० पा०।
(३) बीजत्व—पुण० पु० पा०। (४) समान—कालि० मु० पु० पा०।
(५) न त्वङ्कुरः—पाठः। (६) सहकारिसमावेशादित्यर्थः—पुण० पु० पा०।

कल्पलता ।

बीजत्वेन बीजानि क्वचित् कार्ये प्रयोजकानीति(१) प्रस्तुते जात्यन्तरमतन्त्रमनुपलम्भबाधितं चेति भावः। द्वितीय इति । एवं सत्यङ्कुरमपि प्रति बीजत्वेनैव कारणत्वमायातमिति सिद्धं नः समाहितमित्यर्थः । अङ्कुरं प्रति बीजं बीजत्वेनैव(२) निमित्तकारण(३)मित्यभिप्रायेणापि प्रकृतसिद्धौ यद्यपि बीजस्येत्यादिशङ्का कैश्चित्कृतानादेया(४)। समानशीलानामिति । बीजत्वेनैव(५) कारणानामित्यर्थः ॥

अत्रापि प्रयोगः । यद्येन रूपेणार्थक्रियासु नोपयुज्यते न तत् तद्रूपम्, यथा बीजं कुञ्जरत्वेन किञ्चिदप्यकुर्वन्न कुञ्जरस्वरूपम्, तथा च शाल्यादयः सामग्रीप्रविष्टा बीजत्वेनार्थक्रियासु नोपयुज्यन्त इति व्या-

दीधितिः ।

येन रूपेणेति । रूपमिह परेषां जातिमात्रम् । सामग्रीति ।

---

(१) कार्यप्रयोजकानीति—पुण० पु० पा० ।

(२) बीजत्वेनैव बीजं—पुण० पु० पा० । (३) निमित्त—पुण० पु० पा० ।

(४) भगीरथठक्कुरकृता शङ्कानादेयेत्यर्थः । अत्रैवं भगीरथठक्कुरेणाशङ्क्य समाहितम्—'यद्यपि बीजस्यान्त्यावयवित्वान्नाङ्कुरजनकत्वम्, तदवयवानां च न बीजत्वम्, घटत्ववत्तस्याप्यवयवावयव्यवृत्तित्वात्, तथापि बीजपदं लक्षणया तदवयवपरम्' इति । इयमाशङ्कैव नोपपद्यते, बीजस्यैव परमतेऽङ्कुरकारणत्वोपगमात्तन्मतानुसारेणैवोक्तग्रन्थसङ्गतेः, स्वमतेऽपि बीजस्याङ्कुरनिमित्तकारणत्वाभ्युपगमेनैवोपपत्तेरुपादानत्वव्यवस्थापनस्यानावश्यकत्वादिति शङ्करमिश्राणामाशयः । दीधितिकृन्मते तु बीजत्वेनाङ्कुरं प्रति कारणत्वाभिधानं परमतानुसारेणैव, स्वमते तु पीलुपाकरीत्यभ्युपगमे बीजारम्भकद्व्यणुकपर्यन्तविनाश एव परमाणावङ्कुररूपादिसजातीयरूपाद्युत्पत्त्या तादृशपरमाणुभ्यो द्व्यणुकादिक्रमेणाङ्कुरोत्पत्त्या बीजारम्भकस्थूलावयवानामङ्कुराजनकत्वात् परमाणुषु च द्रव्यत्वव्याप्यव्याप्यजात्यनभ्युपगमात् रूपविशेषादिमद्द्रव्यसामान्यादेवाङ्कुरोत्पादाभ्युपगमस्यावश्यकतया बीजावयवत्वेन हेतुत्वमप्रामाणिकमेवेति बोध्यम् । स्पष्टं चेदं ४३ पृष्ठे ११ पङ्क्तौ । (५) बीजत्वेन च—कलि० मु० पु० पा० ।

पकानुपलब्धिः प्रसङ्गहेतुः, तद्रूपताया अर्थक्रियां प्रति योग्यतया व्याप्तत्वात्, अन्यथातिप्रसङ्गात् ।

दीधितिः ।

यत्किञ्चित्कार्यसामग्रीप्रविष्टाः, कुशूलस्थादय इति यावत् । नोपयुज्यन्ते, परमते । अतिप्रसङ्गात् बीजादेरपि कुञ्जरत्वादिप्रसङ्गात् ॥

दीधितिटिप्पणी ।

ननु कारणतानवच्छेदकातद्व्यावृत्तौ व्यभिचार इत्यत आह । रूपमिहेति । कुशूलस्थादय इति । न च कथं सङ्कोचः कृतः, तेन कुर्वद्रूपशालेरपि बीजत्वेनोपयोगास्वीकारादिति वाच्यम् । विपर्ययानुमाने मूले कुशूलस्थादय इति लिखनात् तस्यैव पक्षत्वं कृतम्, अत्रापि तथा कृतं, प्रसङ्गविपर्यययोरेकपक्षकत्वनियमात् । नोपयुज्यन्त इत्यनन्तरं पूरणमाह । परमत इति ॥

कल्पलता ।

यद्येनेति । यज्जात्यवच्छेदेन यस्य किञ्चित्कार्यं प्रति न कारणता तत् तज्जातीयं (च) न भवति, यथा बीजं न कुञ्जरत्वव(१)दित्यर्थः । त्वया च क्षेत्रपतितानामपि शाल्यादीनां बीजत्वेनाङ्कुरं प्रति कारणता, नाभ्युपगम्यत इति ते बीजजातीया न भवेयुः । यद्यपि गुणानां गुणत्वेन न किञ्चित् प्रति कारणता न च ते न गुणजातीयाः, तथापि परमताभिप्रायेणायं प्रयोगः । व्यापकेति । तज्जात्यवच्छेदेनार्थक्रियाकारित्वं(२) तज्जातीयत्वव्यापकम्, तस्यानुपलब्धिः तद्विपरीतोपलब्धिस्त्वदभ्युपगमेनेत्यर्थः । प्रसङ्गमूलभूतां व्याप्तिमाह । तद्रूपताया इति । अन्यथेति । अन्यथा बीजमपि कुञ्जरजातीयं स्यादित्यर्थः ॥

(१) यथा न बीजं कुञ्जरत्वजातिम—कलि० मु० पु० पा० ।

(२) व्यापकेति । जात्यवच्छेदेनार्थक्रियाकारित्वं—पुण० पु० पा० ।

तद्रूपत्वमेतस्य(१) प्रत्यक्षसिद्धत्वाद(२)शक्यापह्नवमिति चेत्, अस्तु तर्हि विपर्ययः, यद्यद्रूपं तत् तेन रूपेणार्थ(३)क्रियासूपयुज्यते, यथा स्वभावेन सामग्रीनिवेशिनो भावाः, बीजजातीयाश्चैते(४) कुशूलस्थादय इति स्वभावहेतुः, तद्रूपत्वमात्रानुबन्धित्वाद्योग्यतायाः, ततश्चास्ति किञ्चित् कार्यं यत्र बीजत्वेन बीजमुपयुज्यत इति ।

दीधितिः ।

स्वभावेनेति । स्वीयो भावो धर्मो(५) जातिभेदः, परेषां कुर्वद्रूपत्वम्, अस्माकं तु बीजत्वादिकम्, सामान्यतश्च दृष्टान्तता ॥

कल्पलता ।

ननु कुशूलस्थस्यापि बीजजातीयत्वमनुभवसिद्धत्वादशक्यापह्नवमित्याह । तद्रूपत्वमिति । कुशूलस्थं बीजं बीजत्वेनैवार्थक्रियाप्रयोजकम्, बीजत्वात्, यन्नैवं तन्नैवं यथा कुञ्जर इति व्यतिरेकी । त्वयापि कुर्वद्रूपत्वजातेरङ्कुरप्रयोजकतायामेवं प्रयोक्तव्यमित्याह । यथा स्वभावेनेति । कुर्वद्रूपत्वेनेत्यर्थः । तथाहि, सामग्रीमध्यगतं बीजमङ्कुरकुर्वद्रूपत्वजातीयम्, अङ्कुरप्रयोजकत्वात्, यन्नैवं तन्नैवं यथा शिलाशकलमिति भावः । स्वानुमाने(६) उपनयावयवमाह । बीजजातीयाश्चैत इति(७) । आदिपदात् कृषीवलनीयमानबीज-

(१) तद्रूपत्वमस्य—पाठः । (२) सिद्धम—पाठः । (३) तेनार्थ—पाठः ।
(४) बीजरूपाश्चैते—पाठः । (५) स्वीया भावाः धर्माः—पाठः ।
(६) भावः । अनुमाने—कलि० मु० पु० पा० ।
(७) बीजजातीयं चैतादिति—पुण० पु० पा० ।

सङ्ग्रहः। यद्वा यद्रूपमिति सामान्यव्याप्तावेव, तन्मते कुर्वद्रूपत्वं(१) दृष्टान्तोन्वयेनैव। उपदर्शितव्याप्तौ बीजमाह। तद्रूपत्वेति॥

बीजानुभव एवासाधारणं कार्यम्, यत्र बीजत्वं प्रयोजकम्, तच्च सर्वस्मादेव बीजाद्भवतीति किमनुपपन्नमिति चेन्न। यौगिकतदनुभवस्य तदन्तरेणाप्युपपत्तेः। लौकिक इति चेत्, सत्यमेतत(२), न त्विदमवश्यं सर्वस्माद्बीजाद्भवति, इन्द्रियादिप्रत्यासत्तेरसदातनत्वात्, असार्वत्रिकत्वाच्च, ततश्च योग्यमपि सहकार्यसन्निधानान्न(३) करोतीत्यर्थसिद्धम्।

दीधितिः।

अनुभवः साक्षात्कारः। इन्द्रियेति। प्रत्यासत्तेरित्यस्मन्मते॥ परमते तथोत्पादविशेषस्य॥

दीधितिटिप्पणी।

परमते प्रत्यासत्तेर्न हेतुत्वं, तात्कालिककुर्वद्रूपेन्द्रियमात्रादेव प्रत्यक्षसम्भवात्, अत आह। प्रत्यासत्तेरिति। तथोत्पादेति। कुर्वद्रूपतयोत्पादेत्यर्थः॥

कल्पलता।

तदेवं सामान्यतः सिद्धौ बीजत्वेनाङ्कुरं प्रति प्रयोजकत्वसाधनाय परिशेषमुपक्रममाणः शङ्कते। बीजानुभव एवेति। अनुभवः निर्विकल्पकम्। यो-

(१) कुर्वद्रूपत्व— कलि० मु० पु० पा०।

(२) इति चेन्न। सत्यमेतत्—कलि० मु० पु० पा०।

(३) सन्निधेर्न—पुण० पु० पा०।

कल्पलता।

गिनिर्विकल्पकं न विषयजन्यमित्याह। यौगिकेति। लौकिकं तु निर्विकल्पकं न सर्वकार्यमिति(१) शङ्कोत्तराभ्यामाह(२)। लौकिक इति। ननु यद्बीजमिन्द्रियप्रत्यासन्नं तन्निर्विकल्पकं जनयत्येवेत्यत आह। ततश्चेति। तावतापि स्थैर्यसिद्धिरिति भावः॥

कार्यान्तरमेवातीन्द्रियं सर्वबीजाव्यभिचारि भविष्यतीति चेत्, तन्न तावदुपादेयम्, अमूर्तस्य मूर्तानुपादेयत्वात्, परिदृश्यमानमूर्तघटिततया(३) मूर्तान्तरस्य तद्देशस्यानुपपत्तेः। नापि सहकार्यं, मिथः सहकारिणा-

दीधितिः।

उपादेयमप्यमूर्तं मूर्तं वा। आद्ये, अमूर्तस्येति। एतच्च परमतेन, तेषां रूपाद्यतिरिक्तस्य द्रव्यस्याभावाद्रूपादेरेव मूर्तत्वात्। अन्त्ये(४), परिदृश्येति। परिदृश्यमानम् परेषामुत्तरोत्तरबीजम्। सहकार्यम् उपादानसाहित्येन यत् क्रियते। मिथ

दीधितिटिप्पणी।

यथाश्रुतस्य सहकार्यपदस्य सहकारिविधया नोत्पद्यते इत्यर्थकतया पूर्वेण सहाभेदः, उपादेयमपीतरकरणेन सहकारिभूतेनात्मनोत्पाद्यत अत आह। सहकार्यमिति। तथा चात्माभिन्नं यत्र यदुपादानं तत्साहित्येन बीजेन क्रियत इत्यर्थः। मिथ इति मूलम्, यदभावप्रयुक्तः कार्याभावः स एव सहकारी, तथा च सहकारिणामुपादानानां व्यभिचारोऽनुपपन्नः, सहकारिलक्षणासङ्गतेः। ननु

(१) न सर्वबीजकार्यमिति—पाठः। (२) शङ्कोत्तराभ्यामिति—पुण० पु० पा०।
(३) मूर्तप्रतिहततया—पाठः। (४) अन्ते—पाठः।

मव्यभिचारानुपपत्तेः(१) ।

दीधितिः ।

इति । तथा चोपादानसहकारिणोर्विरहेपि सहकार्युपादानसत्त्वे कार्यस्योत्पादे व्यभिचारात् तयोरकारणत्वम्(२), अनुत्पादे च सिद्धं समर्थस्यापि सहकारिविरहादकरणमिति । न च ध्वंस एव साधारणं कार्यमिति(३), कार्यातिरिक्तस्य तस्य तवालीकत्वात्, कार्यस्य च विवेचितत्वादिति भावः ॥

दीधितिटिप्पणी ।

परस्परं व्यभिचारे को दोषोऽत आह । तथा चेति । उपादानेति । यथासङ्ख्यमन्वयि, उपादानविरहे सहकारिसत्त्वे सहकारिविरहे चोपादानसत्त्वे इत्यर्थः । साधारणम् सर्वबीजसाधारणम् । विवेचितत्वादिति । अङ्कुरत्वेन बीजत्वेनेत्यादि प्रत्येकं कार्यतयोक्ते अन्यतमत्वादिना उक्तौ दत्तदोषत्वादित्यर्थः इति ॥

कल्पलता ।

सर्वबीजाव्यभिचारि(४) सर्वबीजजन्यम् उपादेयम् समवेतम् । तन्मते दोषमाह । अमूर्तस्येति । द्रव्यस्येति स्वमते(५) विशेष्यम् । परिदृश्यमानो (मूर्तो)ऽङ्कुरः, तथा चाङ्कुरेण तस्य कार्यस्य समानदेशत्वं प्रसज्येतेत्यर्थः । ननु तदतीन्द्रियकार्यं प्रति बीजत्वावच्छिन्नं निमित्तकारणमेव स्यादित्यत आह । नापीति । सहकार्यम् सहकारिसमवहितबीजानिमित्तकमित्यर्थः । स्यादेवं यदि बीजेषु सकलेषु(६) सहकारिसमवधान(७)ध्रौव्यं भवेत्, तथा च यदेव बीजं

---

(१) नुपपत्तिरिति—पुण० पु० पा० ।
(२) रकरणत्वम्—पाठः ।
(३) साधारणम्—पाठः ।
(४) व्याभिचारी—कलि० मु० पु० पा० ।
(५) द्रव्यस्येति भासकं—पाठः ।
(६) बीजस्य—कलि० मु० पु० पा० ।
(७) समवधानं—कलि० मु० पु० पा० ।

कल्पलता ।

तदसमवहितं तस्यैव तत् कार्यं न भवेदित्याह । मिथ इति । अव्यभिचारानुपपत्तेः । (कार्याव्यभिचारानुपपत्तेः) । न हि सर्वेषां(१) सहकारिणामेकं किञ्चित् सार्वत्रिकं(२) कार्यमिति नियमोऽस्तीत्यर्थः ॥

अपि चैवं सति प्रयोजकस्वभावो नान्वयव्यतिरेकगोचरः, तद्गोचरस्तु न प्रयोजकः, दृश्यं च(३) कार्यजातमदृश्येनैव स्वभावेन क्रियते, दृश्येन त्वदृश्यमेवेति, सोऽयं यो ध्रुवाणीत्यस्य विषयः ।

दीधितिटिप्पणी ।

अथावक्लृप्त(४)कार्यतदुपादानवदुपादानाविनाभावो(५)पि सहकारिणः कल्पयिष्यते तत्राह । अपि चेति ।

'यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते(६) ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ॥' इति ॥

दीधितिटिप्पणी ।

विना धृत्वैव यो ध्रुवाणीति व्याचष्टे । य इति ॥

कल्पलता ।

अपि चैवमिति । यदि बीजत्वावच्छेदेनैवा(७)तीन्द्रियं कार्यं, यदि च कुर्वद्रूपत्वमतीन्द्रियमङ्कुरकारणतावच्छेदकं न तु बीजत्वमित्यर्थः । कारणतावच्छेदकस्य बीजत्वस्य कार्यतावच्छेदकस्याङ्कुरत्वादेः(८)

(१) सर्वेषामेव—पुण० पु० पा० । (२) सार्वदिकं—कलि० मु० पु० पा० ।
(३) दृश्यं—पाठः । (४) अथ क्लृप्त—पाठः ।
(५) विनाभावे—पाठः । (६) यो तु सेवते—पाठः ।
(७) वच्छेदेना—पुण० पु० पा० ।
(८) ङ्कुरत्वस्य—पुण० पु० पा० ।

कल्पलता ।

अत्यक्षमित्युक्तमेव ध्रुवत्वम्, तथा च

'यो ध्रुवाणि परित्यज्य अध्रुवाणि च सेवते(१) ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥'

इति सर्वप्रकारिका(२)ऽनुपपत्तिरित्यर्थः ॥

अथवा व्यतिरेकेण प्रयोगः । विवादाध्यासितं बीजं सहकारिवैकल्यप्रयुक्ताङ्कुरादिकार्यवैकल्यं, तदुत्पत्तिनिश्चयविषयीभूतबीजजातीयत्वात्, यत् पुनः सह-

दीधितिः ।

विवादाध्यासितमिति स्वरूपकथनम्, स्थैर्यपक्षे फलोपहितस्यापि प्राक्कार्यवैकल्यात् । अङ्कुरादीत्यादिपदेन सामान्यव्याप्तिः सूचिता । एवं च हेतावपि बीजादीति बोध्यम् । विशेषव्याप्त्यादरे तु आदिपदमनुपादेयम्, हेतौ च तदुत्पत्तिरङ्कुरनिरूपिता वक्तव्या । वैकल्पिकं च भूतान्तर्बीजपदयोरुपादानम् ।(३) तदुत्पत्तीति । यद्यपि परेषां सहकारिविरहितं

दीधितिटिप्पणी ।

सामान्यहेतौ वैयर्थ्यमाशङ्क्याह । सामान्येति । सामान्यमुखीत्यर्थः । वैयर्थ्यादेतदुद्गमाह । वैकल्पिकं चेति । ननु भूतान्तहेतुः कुशूलस्थे न सम्भवति, एकहेतुश्चेत् व्यभिचारीत्याशङ्कते । यद्यपीति । तथा चायमर्थः(४), तदुत्पत्तिनि-

---

(१) णि निषेवते- पुण० पु० पा० ।

(२) सर्वप्रकारा—पुण० पु० पा० ।

(३) रुपादानम् । कार्यवैकल्यं कार्योपधायकत्वाभावः । क्षणिकत्वपक्षे कारणमात्रस्यैव कार्यकालावृत्तित्वेन यावत्सत्त्वमेव कार्याभाववत्त्वात्, शिलादौ सहकारिवैकल्येपि कार्यवैकल्यात् स्वरूपयोग्यत्वविरहप्रयुक्तमेतदिति भावः—पुण० पु० पा० ।

(४) तथा चायसमर्थः—इत्यादर्शपुस्तके २ पु० म पाठः ।

कारिवैकल्यप्रयुक्ताङ्कुरादिकार्यवैकल्यं न भवति न तदेवम्भूतबीजजातीयं, यथा शिलाशकलमिति ।

दीधितिः ।

न(१) तदुत्पत्तिनिश्चयविषयः, कारणतावच्छेदकरूपेण तत्साजात्यं चासिद्धं, रूपान्तरेण त्वतिप्रसक्तं(२), तथापि तदुत्पत्त्या तन्निश्चायकाव(३)न्वयव्यतिरेकावुपलक्षितौ । नियतान्वयव्यतिरेकितावच्छेदकरूपवत्त्वं तु फलितार्थः । यथेति (। शिलादौ सहकारिसाकल्येपि कार्यवैकल्यात् स्वरूपयोग्यत्वविरहप्रयुक्तमेव तदिति भावः) ॥

दीधितिटिप्पणी ।

अविषयीभूतो यत इत्यर्थेन शङ्क्यते, तैः कुशूलस्थे तदनङ्गीकारात् । अथ योऽन्वयव्यतिरेकविषयस्तज्जातीयत्वं वक्तव्यमिति चेत, कया जात्या साजात्यम । न तावत्कारणतावच्छेदकेन, तैः कुशूलस्थे तदनङ्गीकारात्, जात्यन्तरेण घटादेरप्यस्तीति भावः । फलितार्थ इति । तैर्बीजत्वस्यान्वयव्यतिरेकविषयतावच्छेदकत्वस्वीकारात्(४) । ननु शिलादौ कार्यवैकल्यमुभयसिद्धम्, तच्च कथं सहकारिवैकल्यप्रत्युक्तं न भवतीत्यत आह । सहकारिसाकल्येति ॥

कल्पलता ।

सोऽयं वादी प्रघट्टकार्थी(५) वा प्रथमप्रघट्टकार्थमेव सिंहावलोकितन्यायेन व्यतिरेकमुखेन प्रयोगमारोप्य दर्शयति । अथवेति । पूर्वतन(६)प्रयोगापेक्षयैव विकल्पः । विवादाध्यासितांमति(७) क्षेत्रपतितबीजे(८) भागबाधवारणार्थम्, सामर्थ्यासामर्थ्याभ्यां कुशूलस्थस्य विवादाध्यासितत्वात् । सहकारी-

(१) विरहितं—पाठः। (२) त्वव्यभिचारि—पाठः। (३) तन्निश्चयभावा—पाठः।
(४) वच्छेदकत्वाङ्गीकारात्—पा० २ पु०। (५) प्रघट्टकार्थो—पुण० पु० पा०।
(६) पूर्व-पाठः। पूर्वतर—पुण० पु० पा०। (७) बीज—कलि० मु० पु० प्रा०।

कल्पलता ।

ति । सहकारिवैकल्यप्रयुक्तमङ्कुरादि(रूप)कार्यवैकल्यं यस्येति बहुव्रीहिः, प्रयुक्तं पारिपालितं तदुत्तर(१)-कालसम्बन्धी(२)कृतं कार्यवैकल्यं कार्यप्रागभावः, दण्डादीनामपि निमित्तकारणानां कथञ्चित् कार्य-प्रागभावनिरूपणात् । साध्येऽङ्कुरपदप्रक्षेपात् साधने-ऽपि बीजजातीयत्वादित्युक्तम् । सामान्यव्याप्तौ तु नोभयत्रापि विशेषोपादानम् । तदुत्पत्तिनिश्चयः कार्य-कारणभावनिश्चयः । पुनःपदं च स्फुटार्थम् ॥

न च किमुक्तसाध्यव्यावृत्तेरुक्तसाधनव्यावृत्तिरुदा-हृतात् किं वा परम्परयापि तथाविध(३)प्रसवसामर्थ्य(४)-विरहादिति(५) व्यतिरेकसन्देह इति वाच्यम् ।

दीधितिः ।

उदाहृतात् शिलाशकलात् । किं वेति । तथा चोक्तसाध्या-सत्त्वेपि साक्षात्परम्परया वा अङ्कुरप्रसवसमर्थे बीजत्वसत्त्वं न विरुध्येत(६) इति हेतोर्व्यतिरेकस्य(७) विपक्षव्यावृत्तत्वस्य

दीधितिटिप्पणी ।

तथा चेति । उक्तहेत्वभावे उक्तसाध्याभावप्रयुक्तत्वं यदि स्या-त्तदा प्रयोजकसत्त्वे प्रयुक्तसत्त्वस्यावश्यकतया हेतुरव्यभिचारी स्यात् । यदि च न प्रयुक्तत्वं, तदा तत्सत्त्वे तदनावश्यकतया व्य-भिचारसन्देहः स्यादित्यर्थः । विपक्षे बाधकाभावात् । इति कृत्वा ?॥

(१) त उत्तर--पुरा० पु० पा० । (२) सम्बद्धं—पुरा० पु० पा० ।

(३) तथाभूत—पाठः । तथाविधकार्य-पुरा० पु० पा० ।

(४) सामर्थ्यस्य—पाठः ।

(५) तथा च साध्यव्यतिरेको न साधनव्यतिरेकप्रयोजक इति न साधनस्य साध्यव्याप्यत्व-मिति भावः । विरहात्साधनव्यावृत्तिरित्यन्वयः ।

(६) अङ्कुरप्रसवसमर्थबीजत्वं विरुध्यते—पा० २ पु० ।

(७) हेतौ व्यतिरेकस्य—पाठः ।

प्रागेव शङ्काबीजस्य निराकृतत्वादिति(१)।

दीधितिः।

सन्देह इति। प्रागेव बीजत्वस्याङ्कुरप्रयोजकत्वव्यवस्थापनेनेति(२)॥

कल्पलता।

उदाहृतादिति। शिलाशकलादित्यर्थः। बीजं परम्परयापि कुर्वद्रूपं बीजं जनयति, न तु शिलाशकलं, तथा च व्यतिरेकसन्देहः व्यतिरेकव्याप्तिसन्देह इत्यर्थः, अन्यथासिद्धेरिति भावः॥

स्यादेतत्। माभूत् सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मसंसर्गः(३), अस्तु बीजत्वमेव प्रयोजकं, भवतु

दीधितिः।

स्यादेतत्, बीजत्वमतद्व्यावृत्तिरूपं व्यावृत्तित्वादेवासत्, न चासतः सता स्वलक्षणेन समं सम्बन्धः सम्भवति, न च कारणेनासम्बद्धं कारणतावच्छेदकं नाम(४)। अथैवं कुर्वद्रूपत्वमपि तादृशं कथं कारणतावच्छेदकं, कुशस्थानुरोधात् कल्पनीयमङ्कुरत्वादेरप्यलीकत्वात्, तत्तद्व्यक्ति(५)विश्रान्ते च कार्यकारणभावे लोकयात्राविलोपप्रसङ्ग(६)श्चेति चेत्सत्यम्, स्वकारणसामर्थ्याति-

दीधितिटिप्पणी।

तादृशम् अतद्व्यावृत्तिरूपम्, तन्मते अनेकवृत्तिधर्ममात्रस्यैवातद्व्यावृत्तित्वात्। ननु तत्तद्व्यक्तिसमवेतमेव कुर्वद्रूपत्वमत आह। तत्तदिति। स्वकारणसामर्थ्येति। बीजात्पन्नबीजेन हि कथं बीजमेव जन्यते न

(१) निराकृतत्वात्—पाठः। (२) व्यवस्थापनेन भाति—कलि० मु० पु० पा०।

(३) धर्माध्यासः—पाठः। (४) सम्बद्धकारणतावच्छेदकं वा -पाठः।

(५) सत्तद्व्यक्ति-पाठः। तत्तत्कार्य-पुण० पु० पा०।

(६) एकस्मिन् बीजे यत्किञ्चिदङ्कुरजनकत्वं गृहीत्वा पश्चाद्बीजान्तरादपि प्राङ्कुरोत्पत्तिमवलोकयतो बीजत्वावच्छिन्नस्याङ्कुरत्वावच्छिन्नजनकत्वग्रहो भवति, तादृशग्रहाधीना च बीजसामान्येऽङ्कुरार्थिनः प्रवृत्तिर्भवतीति सर्वसिद्धम्, तथाविधप्रवृत्तिरूपाया लोकयात्राया विलोपप्रसङ्ग इत्यर्थः।

च(१) सहकारिसमवधाने सति(२) कर्तृस्वभावत्वं भावस्य, तथा च तदसन्निधानेऽकरणमप्युपपद्यताम्, तथापि तज्जातीयमात्र एवेयं व्यवस्था, न त्वेकस्यां व्यक्तौ, करणाकरणलक्षण(३)विरुद्धधर्मसंसर्गस्य प्रत्यक्षसिद्धतया तत्र दुर्वारत्वादिति चेन्न,(४)विरोधस्वरूपानवधारणात्(५)।

दीधितिः।

श्यासादितस्वभावविशेष एवोत्पद्यमानः क्षणिको भाव(६)स्तत्तत्कार्यं(७) कुर्वाणः कुर्वद्रूप इत्यभिधीयते, क्षणिकत्वं च भावानां करणाकरणत्व(८)लक्षणविरुद्धधर्माध्यासात्, लौकिकस्तु व्यवहारोऽनादिविकल्पवासनावशात् कल्पितैरेवानुगतरूपैः कार्यकारणभावस्यापि(९) कल्पनादिति चेन्मैवम्, तादृशविरुद्धधर्माध्यासस्य निरसनीयत्वात्, अपाकरणीयत्वाच्च विधिरूपतया प्रतिभासमानेषु सामान्यादिषु बाधकानामिति। इयम् सहकारिणां लाभे करणमलाभे चाकरणमिति व्यवस्था॥

दीधितिटिप्पणी।

घटादिरतः स्वकारणेति। स्वकारणेन बीजेन बीज एव जनितोऽनः स्वयमपि तथेत्यर्थः। क्षणिकत्वसिद्धैव तव सर्वाभिमतं स्यात्(१०), तदेव तु नास्तीत्याह। मैवमिति। अपाकरणीयत्वाच्चेति परान्वयि। बाधकानाम् अतद्व्यावृत्तित्वसाधकरूपाणाम्। इदमः पूर्वोक्तद्वयपरामर्शेन द्विवचननपुंसकतापत्तिः, अतस्तदर्थमित्यन्तर्भावेणाह। इयमिति॥

(१) भवतु वा—इति शङ्करमिश्रसम्मतः पाठः। (२) समवधाने—पाठः।
(३) करणाकरण—पाठः। (४) चेन्नैवम्-पुण० पु० पा०।
(५) पानवबोधात्—पाटः। पापरिज्ञानात्—पुण० पु० पा०।
(६) क्षणिकोऽभाव-कलि० मु० पु० पा०। (७) स्तत्कार्यं-पाठः।
(८) करणाकरण-पाठः। (९) कार्यकारणरूपस्यापि-पाठः। कार्यकारणभावस्य-पाठः।
(१०) वासीभिमसम्प्रहे—इत्यादर्शपुस्तके पाठः।

कल्पलता ।

वक्ष्यमाणप्रघट्टकार्थादुक्तप्रघट्टकत्रयस्यार्थं विवेक्तुं तत्त्रयार्थानुवादपूर्वकं प्रघट्टकान्तरमवतारयति । स्यादेतदिति । माभूदिति । कुशूलस्थस्यापि बीजत्वेन सामर्थ्यस्यैव साधनादिति भावः । अस्त्विति । तथा च कुशूलस्थस्यापि सामर्थ्यमेवेति भावः । कुर्वद्रूपत्वाकुर्वद्रूपत्वलक्षणविरुद्धधर्माध्यासोऽपि नास्तीति (वा) भावः । भवतु वेति । तथा च क्षेपकारित्वाक्षेपकारित्वलक्षणोऽपि न विरुद्धधर्माध्यास इति भावः । क्रमोऽत्र न विवक्षितः, तथा च(१) पूर्वसाधितार्थानु(२)वादमात्रमेतदिति व्युत्क्रमाभिधानदोषो नात्र । कर्तृस्वभावत्वम् जनकस्वभावत्वम् । तथापीति । बीजत्वजात्यवच्छिन्नं किञ्चिज्जनयति, (किञ्चिन्न जनयति,) तत्र सहकारिलाभालाभौ तन्त्रमास्ताम्(३), न त्वेकैकव्यक्तिः कदाचिज्जनिका कदाचिदजनिकेति व्यवस्था सहकारिलाभालाभतन्त्रेत्यर्थः । यद्यपि पूर्वमपि व्यक्तिमेवादाय सामर्थ्यासामर्थ्यादिकं चिन्तितं, क्षणभङ्गानुकूलत्वात्, तथापि व्यक्तेरेकस्याः फलोपधानानुपधानलक्षणविरुद्धधर्माध्यासः प्रत्यक्ष(४)स्यादुरपह्नव इ(५)त्यभिप्रायेण शङ्कैत्यपौनरुक्त्यम् ॥

(१) विवक्षितः, किं तु—पुण० पु० पा० ।

(२) साधितार्थवि—पुण० पु० पा० ।

(३) तन्त्रं च मास्ताम्—पाठः । तन्त्रम्—कालि० मु० पु० पा० ।

(४) प्रत्यक्षसिद्ध—पुण० पु० पा० । (५) दुरपन्हवते-पुण० पु० पा० ।

स खलु धर्मयोः परस्पराभावरूपत्वं वा स्यात्, नित्यत्वानित्यत्ववत्, धर्मिणि तदापादकत्वं वा, शीतोष्णत्ववत्, तद्वत्ता वा, दण्डित्वकुण्डलित्ववत्(१)।

दीधितिः।

सः विरोधः। इह नित्यत्वानित्यत्वे ध्वंसाप्रतियोगित्वप्रतियोगित्वे। तस्य परस्परविरहस्यापादकत्वं तद्व्याप्यतया। तद्वत्ता परस्परभेदवत्ता, अभावत्वेन भेदस्याप्यभावपदस्मारितत्वेन तदापरामर्शसम्भवात्। तद्वत्ता परस्परं परस्परात्यन्ताभाववत्ता, दण्डित्वे न कुण्डलित्वं कुण्डलित्वे न दण्डित्वमित्यन्ये॥

दीधितिटिप्पणी।

स इत्यनेनाव्यवहितोक्तस्वरूपशब्दपरामर्शे नपुंसकता स्यादतः स इति। ध्वंसाप्रतियोगित्वविशिष्टप्रागभावाप्रतियोगित्वरूपनित्यत्वस्य निवेशे एतदभावो ध्वंसप्रतियोगित्वं प्रागभावप्रतियोगित्वं च, तथा च धर्मयोरिति द्विवचनमसङ्गतम्, एवं परस्परविरहरूपत्वमित्यप्यसङ्गतम्, ध्वंसप्रतियोगित्वत्वाद्यवच्छिन्नाभावानात्मकत्वान्नित्यत्वस्येत्यत आह। इहेति। प्रागभावप्रतियोगित्वं तु न निवेशितम्, प्रागभावस्य सर्वासम्मतत्वात्। भेदस्य पूर्वानुक्तत्वेन परामर्शासम्भवादाह। अभावत्वेनेति। करणेऽकरणात्यन्ताभावासत्त्वात् प्रकृतासङ्गतिरन्य इत्यत्रास्वरसः॥

कल्पलता।

स खल्विति। धर्मयोः करणाकरणयोः परस्परविरहरूपत्वमित्यर्थः। नित्यत्वानित्यत्ववदिति। यद्यपि ध्वंसावच्छिन्नसत्त्वमनित्यत्वम्(२), न तु नित्यत्वाभाव एव, तथापि नञर्थसम्बन्धासम्बन्धमात्रविवक्षयैवैतद्द्रष्टव्यम्। तदापादकत्वमिति। परस्परावि-

---

(१) कुण्डलित्ववदिति—पुण० पु० पा०। (२) वच्छिन्नसत्ताऽनित्यत्वम्—पाठः।

कल्पलता ।

रहापादकत्वम् । तच्च परस्परविरहव्याप्यतया निर्वहति, यथा शैत्यं जले औष्ण्याभावमाक्षिपति, औष्ण्यं च तेजसि शैत्याभावमित्यर्थः । (तद्वत्ता वेति ।) धर्मयोः परस्परभेदमात्रं वा विरोध इत्यर्थः ॥

न प्रथमः, निर्विशेषणस्यासिद्धेः(१), यावत्सत्त्वं कि-

दीधितिः ।

निर्विशेषणस्य कार्यविशेषानियन्त्रितस्याकरणस्य, वस्तुनि क्षणभङ्गवादिनां, असिद्धेः विरोधस्य अ(२)सिद्धत्वात् , यावत्सत्त्वं, किञ्चित्करणात् किञ्चित्करणाभ्युपगमात्, अस्माकं तु तत्सिद्धावपि कालभेदादेव न विरोध इति भावः । यत्त्वस्माकमपि यावत्सत्त्वं संयोगादि(३)जननसम्भवादिति। तदसत् । कदाचिदवयविनस्तथात्वसम्भावनायामपि गुणकर्मणोर्नित्यमात्रस्य च तदसम्भवात् । प्रक्रान्तत्वाद्बीजमात्रमधिकृत्येदमित्यपि कश्चित् ।

दीधितिटिप्पणी ।

व्याख्यानमपि करोति । निर्विशेषणस्येति । कार्यविशेषेति । सामान्यतोऽकरणमात्रस्येत्यर्थः । स्वमतेऽसिद्धिरेवेत्यतः, क्षणेति । असिद्धेः अप्रसिद्धेः। स्वमतेऽनुक्तौ न्यूनता स्यादत आह । अस्माकमिति । तत्सिद्धावपि निर्विशेषणाकरणप्रसिद्धावपि । नित्यमात्रस्येति । महाप्रलयावच्छेदेन नित्यस्य जनकत्वासम्भवात् । बीजमात्रेत्यादौ हेतुः, प्रक्रान्तत्वादिति । तथा चास्माकं मतेपि बीजे सदैव परमाण्वादिसंयोगजननसम्भवान्निर्विशेषणाकरणस्य बीजेऽप्रसिद्धेरिति भावः । मूले सविशेषणेत्यस्य कार्यविशेषितस्येत्यर्थकतया विरोधसिद्धावपीत्यसङ्गतम्, कालामिश्रितस्य तस्यैकधर्मिण्यङ्गीकारादतः

---

(१) असिद्धत्वात—कलि० मु० पु० पा० । (२) विरोधस्य अप्र पा०२ पु० ।
(३) यावत्संयोगादि-पाठः ।

श्चित्करणात् । सविशेषणस्य तु(१) विरोधसिद्धाव-
प्यध्यासानुपपत्तेः । यदा यदकरणं हि तदा तत्करण-
स्याभावो न त्वन्यदा तत्करणस्य, न चैतयो(२)रेकध-

दीधितिः ।

तत्कार्यकरणस्य तदभावस्य च परस्परविरहरूपत्वेऽपि स्वरूपतो न विरोधः, एकस्मिन् कालेऽङ्कुरकरणाकरणयोः समर्थबीजक्षण-शिलाशकलात्मकदेशभेदेनेव एकस्मिन् धर्मिणि कालभेदेन वृत्ते-रनुभवसिद्धतया दुरपह्नवत्वात्, किन्त्वेककालावच्छेदेन, न चैक-कालावच्छिन्नं तदुभयमेकत्राभ्युपगच्छाम इत्याह, सविशेषणस्ये-त्यादिना । सविशेषणस्य कार्यविशेषविशेषितस्य एककालाव-च्छेदेन विरोधसिद्धावपि अध्यासस्य एकधर्मि(३)समावेशस्या-नुपपत्तेः, अनभ्युपगमात् । यदा हि यत्र यत्कार्याकरणं तदा तत्कार्यकरणस्य तत्राभावः तद्धर्मिवृत्तित्वाभावः, न त्वन्यदा तत्कार्यकरणस्य तद्धर्मिवृत्तित्वाभावः, न चैतयोरेककालावच्छि-

दीधितिटिप्पणी ।

कालमिश्रणेन भावं पूरयति । तत्कार्यकरणस्येत्यादि । मूले, अध्या-सेति । एतादृशाविरुद्धधर्माध्यासस्य त्वन्मतेऽप्यनुपपत्तेरित्यर्थः । उप-वर्णितभावार्थस्यैव किञ्चित्पूरणेन पदतो लाभं दर्शयति । सविशेष-णस्येति । इदमध्यासस्येत्यनेनाप्यन्वयि । अनुपपत्तौ हेतुः, अनभ्यु-पगमात् । यदा हीति(४)मूले यदेत्यस्यानुयोगिनि दाने यदा यत्र यद्-करणं तदा तत्र तत्करणस्याभाव इत्यर्थकतायां साध्याविशेषः । अथ प्रतियोगिनि यदेत्यस्य दानम्, तथा च यत्र यत्कालीन-करणस्याभावः तत्र तत्कालीनकरणस्याभावः, यत्तदर्थयोर्भेदादेव साध्यभेद इति चेत्, तदा न त्वन्यदेत्यसङ्गतम्, तत्रान्यकालीन-तत्करणाभावस्यासम्भवात्, करणसामान्याभावकाल एव तत्स-

(१) सविशेषणस्य च—पाठः । (२) न चानयोः—पाठः ।
(३) एकत्र—पाठः । (४) यदा हि यदकरणमिति मूलपाठाभिप्रायेणेदम् ।

र्भिसमावेशमातिष्ठामहे ।

दीधितिः ।

अतत्कार्यकरणाकरणयोरिति(१) ॥

दीधितिटिप्पणी ।

म्भवात्, एवं प्रकृतासिद्धिश्च, करणप्रतिक्षेपकत्वालब्धेः, संयोगतदभावन्यायेनापि सम्भवात्, अतो वृत्तित्वाभावकथनपरतयाह । यदेत्यादि । इतिः वाक्यसमाप्तौ । अन्यथा(२) न चैतयोरित्यस्यागृह्यव्याख्याऽसङ्गतेः ॥

कल्पलता ।

निर्विशेषणस्येति । अकरणत्वमात्रस्य बीजव्यक्तावसिद्धेः । तदेवाह । यावदिति । अन्ततः संयोगादेरपि(३) जननादित्यर्थः । सविशेषणस्येति । यदा तदेतिविशेषणसहितस्येत्यर्थः । तदेवाह । यदेति । अनयोर्विरोधसम्भवेऽप्यध्यासो नास्तीत्याह । न चेति । न हि यद्बीजं यदेवाङ्कुरं करोति तदेव न करोतीत्यभ्युपगच्छाम इत्यर्थः ॥

न द्वितीयः, भावाभावव्यतिरिक्तयोः करणाकरण-

दीधितिः ।

भावाभावेति । अभेदे आक्षेप्याक्षेपकभावानुपपत्तेरिति

दीधितिटिप्पणी ।

असिद्धेः को दोष आगत इत्याह । अभेदेति । सहकारिपर्यन्तस्य

(१) करणाकरणयोः–पाठः । परन्तु टिप्पणीकृतामनभिमतः, तत्र इतिशब्दस्यापि व्याख्यानदर्शनात् ।

(२) अन्यथा, इतिशब्दस्य मूलस्थप्रतीकधारणार्थकत्वे, न चैतयोरित्यस्यागृह्यव्याख्याऽसङ्गतेः, इतिशब्दघटितप्रतीकमघृत्वैव न चैतयोरितिमूलोपरि क्रियमाणाया न चैतयोरित्यादिकाया दीधितिव्याख्याया असङ्गत्यापत्तेरित्यर्थः । (३) संयोगादीनामपि-पुण० पु० पा० ।

योरसिद्धेः, व्यापारापरव्यपदेशसहकारिभावाभावौ हि करणाकरणे कार्यभावाभावौ वेति(१)। अतिरेकसिद्धावपि स्वकाल एव स्वाभावप्रतिक्षेपवत् अकरणाभावमाक्षिपेत् करणं न त्वन्यदा। न हि यो यदा नास्ति स तदा स्वाभावं प्रति क्षेप्तुमर्ह(ती)ति, विरोध्यभावं वा आक्षेप्तुम्(२)। तथा(३) सति न कदापि तन्न स्यात् न वा(४) कदापि तद्विरोधी भवेदिति ना-

दीधीतिः।

भावः। व्यापारापरव्यपदेशः सहकारी(५) चरमो व्यापारः। हि यस्मात्। एतावेतौ वा परस्परविरहरूपावेव करणाकरणे। करणाभावातिरिक्ताकरणाभ्युपगमेपि दोषमाह। अतिरेकेति। अन्यदा स्वानधिकरणकाले। प्रति क्षेप्तुम् प्रतिक्षेपात्मीभवितुम्(६) अभावाभावस्य प्रतियोगिरूपत्वात्। विरोध्यभावम् विरोधिनोऽभावम्। तथा सतीति। स्वासत्त्वकालेऽपि स्वाभावप्रतिक्षेपे तदापि तदभावो न स्यात्, स एव स्यात्, स्वासत्त्वकालेऽपि च स्वविरोधिनोऽभावाक्षेपे तदानीमपि तद्विरोधी न स्या-

दीधितिटिप्पणी।

विग्रहवाक्यप्रदर्शनपूर्वकमर्थमाह। व्यापारेति। एतत्पङ्क्त्यर्थमाह। हीति। यस्मात् सहकारिभावाभावौ कार्यभावाभावौ वा करणाकरणे अतः कारणाद्भावाभावव्यतिरिक्तयोरेतयोरसिद्धिरित्यर्थः। प्रतिक्षेपात्मीभवितुमिति। न चैवं स्वाभावमित्यस्य कर्मतानुपपत्तिः, तदा प्रतीत्यस्य कर्मप्रवचनीयार्थकत्वात्। सङ्क्षिप्य पङ्क्तिद्वयस्यार्थमाह। तथा सतीति। तत्पदेन यच्छब्दोपन्यस्तस्यैव विषयीकर्तुमुचितत्वादाह। स एवेति। ननु स्वाधिकरणे तदभावस्याक्षेपे स्वा-

(१) वा—पाठः। (२) विरोध्यभावं चाक्षेप्तुम्—पाठः।

(३) तथा च—पाठः। (४) न च—पुण० पु० पा०। (५) व्यपदेशस्सहकारी—पा०पु०२।

(६) प्रतिक्षेपार्थीभवितुम्—पाठः। प्रतिक्षेपात्मीभवितुमित्यर्थः—पुण० पु० पा०।

सतो विद्यते भावो नाभावो विद्यते सत(१) इत्याया-
तम्, न वा विरोधः(२)।

दीधितिः।

दित्यर्थः। न वेति(३)। स्वासत्त्वकालेऽपि विरोधिनोऽभावाक्षेपे तुल्यन्यायतया स्वानाधिकरणदेशेऽपि तथात्वे सर्वदा सर्वत्र तस्यासत्त्वेन विरोध एव न सिद्ध्येदित्यर्थः (४)॥

दीधितिटिप्पणी।

नधिकरणे तस्य सत्त्वेन विरोधोस्त्येवात आह। स्वेति। तुल्यन्यायतयेति। स्वावृत्तिकाल इव स्वावृत्तिदेशेपि प्रतिक्षेपस्यौचित्यान्न्यायस्य तुल्यत्वम्। तस्य विरोधिनः॥

कल्पलता।

भावाभावेति। परस्परविरहव्याप्यत्वं वि(रो)धिरूपयोः सम्भवत्यपि, प्रकृते करणाकरणयोर्न तादृशत्वमित्यर्थः। व्यापारापरेति। अन्त्यतन्तु(५)संयोगादिचरमसामग्रीनिवेशित(६)सहकारिभावाभावौ फलोपधानानुपधाने वा करणाकरणे(७) परस्परविरहात्मनी एव, न तु परस्परविरहव्याप्ये इत्यर्थः। अभ्युपगम्याह। अतिरेकेति। यथा घटः स्वावच्छिन्न एव काले स्वाभावं प्रतिक्षिपति न तु स्वानवच्छिन्नेऽपि काले, तथा करणमपि स्वावच्छिन्न एव काले स्वविरोधिनोऽकरणस्याभावमाक्षिपेत्, न तु स्वानवच्छिन्नेऽपि काले, न हि नैल्यं स्वाकालेऽपि रक्तत्वाभावमा-

(१) नासतो विद्यते भाव—पुण० पु० पा०। (२) न चाविरोधः—पाठः।
(३) न चेति-पा० २ पु०। (४) विरोध एव न स्यादित्यर्थः—पाठः।
(५) अन्त्यतन्त्र-कलि० मु० पु० पा०। (६) निवेश-पुण० पु० पा०।
(७) कारणाकारणे—कलि० मु० पु० पा०।

कल्पलता ।

क्षिपति, तथा सत्यामश्यामो घटः पाके सत्यपि रक्तो न स्यादित्यर्थः । दृष्टान्तमुपपादयति । न हीति । प्रति क्षेप्तुमर्हति प्रतिक्षेपात्मा भवति । दार्ष्टान्तिकमाह । विरोधीति । उभयत्र विपक्षे दण्डमाह । तथा सतीति । स्वानवच्छिन्नेऽपि काले यदि स्वाभावं प्रतिक्षिपेत् तदा यदा न स्यात् तदैव स्यादित्यापातं, यदा स्वयं न स्यात् तदा तद्विरोध्यपि न स्यादिति स्वयमेव स्यादिति विचित्रो विरोध इत्यर्थः । ततः किमित्यत आह । नासत इति । तथा च क्षणिकत्वसाधने प्रवृत्तस्य तव नित्यत्वमेव भावानां पर्यवसितमिति भावः । न वेति । स्वाभावकाले स्वविरोधिकाले ॥

नन्वेवं सति परिमाणभेदोऽपि कालभेदेन न विरुध्येत, तत्राप्येवं वक्तुं सुकरत्वात् । न । बाधकबलेन तत्र कालभेदस्य विवक्षितत्वात्, तथाहि, नारब्धद्रव्यै-

दीधितिः ।

आरब्धद्रव्यैः आरब्धद्रव्यवद्भिः । एकदेति फलतः समान-

दीधितिटिप्पणी ।

अल्पपरिमाणचैत्रादेः कालभेदेन बहुपरिमाणोपलम्भस्थले फक्किका मूले, नन्वेवमिति । आरब्धद्रव्यैरपि द्रव्यनाशानन्तरं द्रव्यान्तरारम्भाभ्युपगमादसङ्गतिरतः, आरब्धद्रव्यवद्भिरिति । मतुप् वर्तमानत्वे । अन्यथा समवायेनोक्तौ आरब्धपदवैयर्थ्यापत्तेः । विरोध एककालीन(२)समानदेशत्वस्यैककालीनत्वनिबन्धनमत आह । फलत

---

(१) विरुद्ध्येते—कलि० मु० पु० पा० ।

(२) एककालीनत्वं—इत्यादर्शपुस्तके पाठः ।

रेव द्रव्यावयवैर्द्रव्यान्तरमारभ्यते, मूर्त्तत्वसमानदेशत्वयोरेकदा विरोधात्, तथा चारम्भपक्षे पूर्वद्रव्यनिवृत्तिः, अनिवृत्तावनारम्भ इति(१), तत्र निवृत्तावाश्रयभेदादेव

दीधितिः ।

देशत्वविशेषणम्, तथा च एककालावच्छेदेन मूर्त्तान्तरेण सममेकधर्मिसमवेतत्वमर्थः । न चैकतन्तुकपटे अंशुसंयोगानामेवासमवायिकारणत्वात् कार्यैकार्थसमवेतस्यैव संयोगस्य द्रव्यासमवायिकारणत्वात् पटस्याप्यंशुदेशत्वमिति वाच्यम् । तन्तुत्वेन पटसमवायिकारणत्वादंशूनां तथात्वायोगात्, वेमाद्यभिघातेन महातन्तुविनाश एव खण्डतन्तुभ्यः पटोत्पादात्, अन्यथा तु पटसंस्थानसारूप्याद्भ्रान्त एव पट(२)प्रत्ययः। अवयवान्तरावच्छेदेनावयविसंयोगोऽवयवे न विरुध्यते, शिरसि शरीरसंयुक्तः पाणिरिति प्रत्ययात्, तथा चांश्वन्तरावच्छेदेन तन्तुसंयोगोऽसमवायी,समवायी तन्तुरेव पटस्येत्यपि केचित्(३)। अनारम्भ इति । पूर्वद्रव्यसत्त्व एव द्रव्यान्तरोत्पत्तौ युगपत्तादृशद्रव्यद्वयोपलम्भा-

दीधितिटिप्पणी ।

इति । पटस्यांशुदेशत्वे हेतुः, कार्यैकार्थेति । तथा चांशुतन्त्वोर्मूर्तयोः कथं समानदेशत्वमिति भावः । तन्तुत्वेनेति । अत्र व्यभिचारापन्नानामंशूनां न तथात्वमिति भावः । नन्वेवं कथमेकतन्तोः पट इत्यत आह । वेमेति । अन्यथा यदि वेमाभिघातेन महातन्तोरनाशः स्यात् । एकतन्तुकं पटमङ्गीकृत्य तन्तुत्वेन कारणताया अपि रक्षकस्य मतमाह । अवयवान्तरेति । अनेन च समवायिकारणमात्रावृत्तेरपि संयोगस्य समवायित्वमङ्गीक्रियत इति भावः । अनिवृत्तावप्यारम्भे स्वयमपि दोषान्तरं ददाति । पूर्वद्रव्यसत्त्व इत्यादि ।

(१) रम्भः -पाठः । (२) पट—कलि० मु० पु० पा० । (३) त्यपि काश्चित्-पाठः ।

परिमाणभेदः, अनिवृत्तौ संयोगिद्रव्यान्तरानुपचये क्क परिमाणभेदोपलम्भो(१) यो विरोधमात्रहेतुः, तदुपचये तु(२) क्क परिमाणान्तरोत्पत्तिः, आश्रयानुपपत्तेः(३), अत एव स्थौल्यातिशयप्रत्ययोऽपि(४) तत्र भ्रान्तः, तस्मात् कालभेदेनापि न परिमाणभेद एकस्मिन् धर्मिण्युपसंहर्तुं शक्यत इत्यादि पदार्थचिन्ताचतुरैः सह विवेचनीयम्(५)।

दीधितिः।

पत्तिः, उत्तरद्रव्य एव परिमाणान्तरोत्पत्तौ कैकधर्मिसमावेशः, पूर्वद्रव्य एव च परिमाणान्तरोत्पत्तौ द्रव्यान्तरोत्पादाभ्युपगमवैयर्थ्यमित्यपि द्रष्टव्यम्। एतेनारभ्यारम्भकवादानुसरणमपि प्रत्युक्तम्। आश्रयानुपपत्तेरिति। न चावस्थितद्रव्य एव संयोगिद्रव्योपचयात् पूर्वपरिमाणनाशः परिमाणान्तरोत्पादश्च स्यादिति वाच्यम्। परिमाणस्याश्रयनाशैकनाश्यत्वात्, अवयवमात्रसंयोगविशेष(६)बहुत्वादेरेवाश्रयविपरिमाणोत्पादकत्वाच्च। अन्यथा धरण्यादिपतितमृत्पिण्डादेरवयवान्तरसंयुक्तावयवस्य च पूर्वपरि-

दीधितिटिप्पणी।

संयोगिद्रव्यान्तरानुपचय इति मूलम्, एतन्मते इतरसंयोगिद्रव्योपचये सति सङ्कर्षणात् पूर्वद्रव्यासमवायिकारणसंयोगनाशोऽवश्यं भवति, नियमबलात्, पूर्वद्रव्यानिवृत्तिस्थले उपचय एव न भवतीत्यर्थः। आश्रयानुपपत्तेरिति मूलम्, तथा च तदर्थमाश्रयान्तरमवश्यं कल्पनीयमिति भावः। तन्नियममनङ्गीकृत्य स्वयं दूषयति। न चेति। आश्रयनाशैकेति। अन्यथा नानाकार्यकारणभावकल्पना स्यादिति भावः। अन्यथा द्रव्योपचये परिमाणनाशे। सर्वत्रैवाह। अवयवान्तरेति। अवयवान्तरेण संयुक्तस्यावयवस्य

(१) लम्भेपि—पाठः। (३) आश्रयानुत्पत्तेः—कालि० मु० पु०. पुण० पु० पा०।
(२) तदुपचयेऽपि च—पाठः। (४) तिशयोपि—पाठः। (५) सह चिन्तनीयम्—पाठः।
(६) अवयवसंयोग-पा० ३ पु०।

THE KUPPUSWAMY SASTRI
RESEARCH

दीधितिः ।

माणनाशः प्रकृष्टतरपरिमाणान्तरोत्पादश्च स्यादिति भावः ॥

दीधितिटिप्पणी ।

परिमाणनाशादिः स्यादित्यर्थः, आरम्भकतया संयोगित्वरूपोपचयस्यावश्यकत्वात् ॥

कल्पलता ।

एवं सति दीर्घत्वह्रस्वत्वे अपि परिमाणे कालभेदेन विरुद्धे न स्याताम्, तथा च कालादिप्रत्यभिज्ञापि प्रमैव स्यादित्याह । नन्वेवमिति । एवमिति (१)। स्वकाल एव स्वविरोधिपरिमाणं प्रतिक्षिपेत् न तु स्वाकालेऽपीति वक्तुं सुकरत्वादित्यर्थः । तन्न(२), भिन्नकालयोरपि परिमाणयोरेकत्र धर्मिणि विरोधस्य प्रमाणसिद्धत्वादित्याह । नेति । तत्र परिमाणभेदो द्रव्यनाशे सत्येव भवेन्न तु पूर्वद्रव्ये सतीति तथाहीत्यादिना विवेचनीयमित्यन्तेनोपपादयति । तथाहीति । अविनष्ट एव पूर्वद्रव्ये यदि तदवयवेषु द्रव्यान्तरमुत्पद्येत तदा मूर्तयोः समानदेशत्वमापद्येतेत्याह(३) । नारब्धेति । ननु घटादौ चक्षुरालोकयोर्मूर्तयोरेकदेशवृत्तित्वं स्वीकृतमेवेति चेन्न । तत्र चालनीन्यायेनोभयवृत्त्यभ्युपगमात्, निबिडावयवमूर्तद्वयाभिप्रायेण(४) वा विरोधस्योक्तत्वात् । ननु तथाप्येकतन्तुकपटे तन्तूनां पटस्य चांशुवृत्तित्वमेव स्यात्, तथा च कथं न तत्र मूर्तद्वयसमानदेशताविरोध इति चेन्न । तत्र पट एव नोत्पद्यते, किं तु संस्थानविशेषाधीनः

---

(१) नन्वेवमिति—कालि० मु० पु० पा० । (२) तन्न—कालि० मु० पु० पा० ।
(३) आपद्येतेत्यर्थः-पाठः । (४) न निरवयमूर्तद्रव्याभिप्रायेण—पाठः ।

कल्पलता ।

पटव्यवहार इत्यभ्युपगमात् । (यद्वा) अंशुतन्तुसंयोगस्तत्र पटा(१)समवायिकारणम् । न च तत्रैवांशौ पटवृत्तित्वामिति (तथापि) तन्तुना समानदेशत्वमेवेति वाच्यम् । अन्यूनदेशयोरेव तथाभ्युपगमात् । अनिवृत्ताविति । पूर्वद्रव्यं यदि न निवर्तते तदा समवायि(२)कारणान्तरानुप्रवेशोऽपि नास्तीति कथं दीर्घत्वोपलम्भ इत्यर्थः । ननु स्थूलप्रत्ययो दृश्यते, संयोगिद्रव्यान्तरानुप्रवेशं विना कथं स्यादित्यत आह । तदुपचये(ऽपी)ति । द्रव्यान्तरं चेन्नोत्पद्यते तदा तत्र स्थौल्यप्रत्ययो धान्यादिराशाविव भ्रान्त इत्यर्थः । तर्हि य एव कृश आसीत् स एवेदानीं स्थूल इति प्रत्यभिज्ञा कथमत आह । अत एवेति । पदार्थचिन्ताचतुरैः वैशेषिकैः ॥

अस्तु तर्हीहापि बाधकं बलम्, प्रसङ्गतद्विपर्य-

दीधितिः ।

प्रसङ्गेति । ताभ्यामकारिणोऽसामर्थ्यसाधकाभ्यां कार्यकारिभेदसिद्धिपर्यवसिताभ्यामर्थतः करणाकरणयोः स्वरूपेणैव विरो-

दीधितिटिप्पणी ।

मूले प्रसङ्गविपर्ययोरसाधकत्वेनोपन्यस्तत्वात् तन्नु साक्षात्तयोर्न सम्भवीत्यतः पर्यवसानेनाह । ताभ्यामिति । भेदसिद्धीति । अकारित्वेन फलोपधानरूपकारित्वात्यन्ताभावेनासामर्थ्यसिद्धेरेव कारिभेदसिद्धिः, असामर्थ्यस्य कारिभेदव्यापकत्वादिति भावः । भेदलाभेपि न विरोधसिद्धिरत आह । अर्थत इति । स्वरूपेण

---

(१) तथा—पुण० पु० पा० ।

(२) तदात्मसमवायि—पुण० पु० पा० ।

यर्योरुक्तत्वादिति चेन्न। तयोः सामर्थ्यासामर्थ्यविषयत्वात्, तत्र च उक्तत्वात्। स्तां वा, न तथापि ताभ्यां

दीधितिः।

धस्य सिद्धे(१)रिति भावः। यद्यपि ताभ्यामेव भेदसिद्धौ कृतमनुना विरोधेन तदुपजीविना, तथापि तावेव न सम्भवत इत्याह। तयोरिति। प्रसङ्गे सामर्थ्यस्य हेतुतया विपर्यये चासामर्थ्यस्य साध्यतया विषयत्वम्, सामर्थ्यप्रसञ्जनीयं करणं वेह(२) सामर्थ्यम्, तत्र च सामर्थ्यं हीत्यादिना दूषणस्योक्तत्वात्। ननु योग्यतावच्छेदकं रूपमेव सामर्थ्यमभिधित्सितम्, तत्र च न साध्यावैशिष्ट्यादेर्दोषस्यावकाश इत्यत आह। स्तां वेति।

दीधितिटिप्पणी।

भेदप्रतियोगितावच्छेदकयोर्विरोधस्यार्थत एव लब्धत्वादित्यर्थः। तदुपजीविना प्रसङ्गविपर्ययोपजीविना। यद्यपीत्यादि। कार्यकारिणोर्भेदसिद्धिरेव तस्योद्देश्या सामर्थ्यानुल्लेखेनैव प्रसङ्गविपर्ययतः संलब्धा, तथा च अग्रे तत इत्यादिना भेदसिद्धिस्ततो विरोधसिद्धिर्विरोधासिद्ध्या च पुनर्भेदसिद्धिरिति शिरोवेष्टनन्यायेनेदं व्यर्थम, तथा च यद्यप्येतावतैवेदंमतदूषणे प्रसङ्गविपर्ययदूषणानुसरणमफलम्, तथापि तददूषणे ताभ्यामपि तन्मतासिद्धिः स्यादतस्तावपि न सम्भवत इति समुदायार्थः। सामर्थ्यासामर्थ्यविषयत्वं यथासङ्ख्येन सङ्गमयति, प्रसङ्ग इत्यादिना। प्रसङ्गे सामर्थ्यस्य विषयत्वमेव न, तत्र कारित्वस्यैव साध्यत्वात्, अत आह। हेतुतयेति। हेतुतया विषयस्यापीदृशभाषया लिखनमविरुद्धमिति भावः। तद्विषयत्वलिखनं साध्य एव दृश्यते प्राचाम्(३), न तु हेतौ, इत्यरुचेराह। सामर्थ्यप्रसञ्जनीयमिति। इदं च लक्षणानियामकसम्बन्धप्रदर्शनम्, तथा चाद्यसामर्थ्यपदेन प्रसञ्जनीयसाध्यं कारित्वमेवोक्तमिति भावः। तयोरित्यादिना मूलेनानुवादः कृतः,

(१) सिद्धि-पुण० पु० पा०। (२) करणं वेह—कलि० मु० पु० पा०।
(३) दृश्यते—पा० २ पु०।

शक्त्यशक्त्योरविवक्षित(त्वात्)कालभेद एव विरोधः साध्यते, तथोपसंहर्तुमशक्यत्वात्। यदा तदेत्युपेक्ष्य यत्

दीधितिः।

शक्त्यशक्त्योः करणाकरणयोः, न विवक्षितः व्याप्तिघटकः, कालभेदः साधको यस्य सोऽविवक्षितकालभेद इत्यग्रिमग्रन्थस्वरसेन नेयम्। तथा व्याप्तौ कालभेदानुप्रवेशमन्तरेण। उपसंहर्तुमशक्यत्वात्, कुशूलस्थे सामर्थ्येन करणप्रसञ्जन इष्टापत्तिः(१), उत्तरकालं तत्रैव करणाभ्युपगमात्, विपर्यये च हेत्वसिद्धिः(२), व्यापकविरोधिन एवाभावस्य व्याप्याभावसाधकत्वात्, अन्यथातिप्रसङ्गात्(३), करणस्य च सर्वथैवाकरणं विरुद्धम्(४), अन्यथा तवापि सामग्रीनिवेशिनो बीजस्य देशान्तरे अकरणादसामर्थ्यापत्तेः, न चेह तथा(५), तस्यैव सहकारिसमवधाने करणस्य प्रत्यक्षसिद्धत्वात्, तत्प्रामाण्यसन्देहेऽपि हेतोः सन्दि-

दीधितिटिप्पणी।

तथा च तौ सामर्थ्यासामर्थ्यविषयावेवोच्येते, अत एव दूषणमुक्तमित्यर्थः। पूर्वोक्तदोषमुद्धरति। नन्विति। ननु व्याप्तिघटकत्वेनेति कुतः प्राप्तमत आह। अग्रिमेति। तथा च कालनियमाविवक्षायामिति ग्रन्थेन कालस्य व्याप्तिघटकताप्रदर्शकेनात्रापि तथैवाविवक्षितत्वं लभ्यते, अन्यथाऽग्रिमग्रन्थेनानुवादासम्भवात्। तथाशब्दार्थ(कथन)-मन्तरेणपर्यन्तम्। विरोधः कथं कुत्रापि स्थले उपसंहर्तुं न पार्यत इत्यत आह। कुशूलस्थ इति। व्यापकेति। प्रतियोगिविरोधिनो व्यापकाभावस्य व्याप्याभावसाधकत्वादित्यर्थः। ननु प्रतियोगिविरोध्यभाव एव(६) कथं नास्तीत्यत आह। करणस्य चेति। तथोपसंहर्तुमित्या-

(१) इष्टापत्तेः-पुण० पु० पा०। (२) हेत्वसिद्धेः-पुण० पु० पा०।

(३) अतिप्रसङ्गादिति। द्रव्यत्वव्यापकसंयोगाभावादिना द्रव्यत्वाभावानुमानापत्तेरित्यर्थः।

(४) अकरणमिति। करणसामान्याभाव इत्यर्थः, प्रतियोगिविरोधीति यावत्।

(५) इह, कुशूलस्थबीजे। तथा, सर्वथैवाङ्कुराकरणम्।

(६) भाव:—पा० २ पु०।

समर्थं तत्करोत्येवेत्युपसंहर्तुं शक्यमिति(१) चेन्न। कालनि-यमाविवक्षायां यत् समर्थं तत्करोत्येव कदाचिदिति(२)

दीधितिः।

ग्धासिद्धत्वात्(३), मूलशैथिल्याच्चे(४)ति भावः। यदेति। कालभेदमुपेक्ष्यापि एवकारार्थान्तर्भावेन व्याप्तेरादरे इष्टापत्त्यादेरभावादुपसंहारः शक्य एवेति भावः(५)। करोत्येवेत्यत्र यावत्सत्त्वमिति विवक्षितं न वा(६)। नाद्यः, व्याप्त्यसिद्धेः, अङ्कुरकारिणोऽपि बीजस्य प्राक् तदकरणस्य प्रत्यक्षसिद्धत्वात्। एतेनायोग(७)व्यवच्छेदेन नियमो(८)ऽपि निरस्तः। द्वितीये त्वाह। कालेति। एवं च जातनष्टस्य स्वरूपायोग्यत्वप्रसङ्गा-

दीधितिटिप्पणी।

दिना दत्तदोषात् कालमुपेक्ष्य करणत्वोक्ति(९)सम्भव एव नेत्यत उक्तिसम्भवमेव करोति। कालेति। तथा चैतद्ग्रादिनोऽयमभिप्रायः, स्वातन्त्र्येण कालभेदो न प्रवेशनीयः, तत्प्रवेशकार्यं तु एवकार एव करिष्यति, तस्य तदर्थकत्वादित्यभिमानः। एवकारस्य कालभेदादिवाचकत्वं नास्ति, किन्तु क्रियासङ्गतस्यात्यन्तायोगव्यवच्छेदार्थकत्वम्, तथा च तद्दोषतादवस्थ्यमित्यभिप्रायेण कालनियमेत्यादि मूलम्। न्यूनत्वादाह। विवक्षितं न वेत्यादि। जातनष्टस्य सर्वथा

(१) शक्यत इति–पुण० पु० पा०। (२) तत्करोत्येवेति कदाचित्–कलि० मु० पु० पा०।

(३) तत्प्रामाण्येत्यादि। तस्य, प्रत्यक्षस्य। प्रामाण्यसन्देहेऽपि, तेन विषयेऽपि सन्देहात्, हेतोः, सर्वथाऽकरणस्य।

(४) ननु देशभेदावच्छेदेन सामग्रीमध्यानिवेशिनि भावे करणाभावो निवेशनीयः, तस्य तद्देशासम्बन्धेन तद्वृत्तिकरणाभावस्य तद्देशानवच्छिन्नत्वात्, तथा च करणाभावमात्रं करणविरोधि, अस्तु वा देशानवच्छिन्नत्वस्यापि प्रवेशः, तत्राह। मूलेति। प्रत्यभिज्ञयाऽभेदभानात् क्षणिकतायाश्चासिद्धेरिति भावः।

(५) एवेत्यर्थः—पुण० पु० पा०।

(६) न वा—कलि० मु० पु० पा०। (७) एतेनान्ययोग—पुण० पु० पा०।

(८) यत्समर्थं तत्कारित्वाभावाधिकरणं न भवतीति नियमाकारः, अत्रापि प्रत्यक्षविरोधादिरेव दोषः पूर्वोक्तोऽनुसन्धेय इति भावः।

(९) करणत्वायुक्ति---पा० २ पु०। करणत्वयुक्ति—इत्यादर्शपुस्तके पाठः।

स्यात्,तथा च सम्भवविधेरत्यन्तायोगो विरुद्धः, न त्वयो-
गः, नीलं सरोजं भवत्येवेतिवत् ।

दीधितिः ।

वशिष्यते, वक्ष्यते(१) च तत्र । यद्यदा यत्समर्थं(२) तत् तदा तत्(३) करोतीति स्यात् । न स्यात् । समर्थस्यापि सहकारिविरहेणाकरण(त्व)स्योपपत्तौ मूलशैथिल्यादित्युक्तत्वात् । केचित्तु(४) करणाकरणविषयावेव प्रसङ्गविपर्ययौ स्यातामत आह । सतां वेति । करणेनाकरणाभावप्रसञ्जने स्वरूपतोऽकरणेन करणाभावसाधने च प्रकारतोऽप्यवैशिष्ट्यात् कालभेदेनोभयोपपत्तेर्मूलशैथिल्याच्चोपसंहर्तुमशक्यत्वम्, यदा यत्कारि तदा न तदकारी(५)त्यादिप्रसङ्गविपर्यययोश्चापादकासिद्धिसिद्धसाधने चेति भावः । यत्स-

दीधितिटिप्पणी ।

कार्याजनकस्य, अन्यथा न्यूनता स्यात् । अवशिष्यत इति । तत्र कदाचिदित्याद्यभावात् । स्वयमाशङ्कते । यदिति । केचित्तु करणाकरणेति । तथा चैतन्मते तयोः सामर्थ्यासामर्थ्यविषयत्वं, न तु करणाकरणविषयकत्वमिति मूलार्थः । करणाकरणेति(६),तथा च करणाकरणविषयौ, नोक्तातिरिक्तौ तौ कर्त्तव्यावित्यर्थः । उपसंहर्त्तुमित्यस्य व्याख्यानमाह । करणेनेति । साध्याविशेषवारणायेत्यादिः । करणेनाकरणाभावप्रसञ्जने स्वरूपतः साध्यावैशिष्ट्यात्, अभावाभावस्य भावस्वरूपत्वात्, अकरणेन करणाभावरूपविपर्ययानुमाने प्रकारतोपि साध्यावैशिष्ट्यमस्तीत्यर्थः । अपिना स्वरूपस्यापि समुच्चयः(७) । ननु यदेत्यादिरूपयोर्मूलशैथिल्यादिदोषो नास्तीत्यत आह । यदेति । तथा च प्रसङ्गे कुशूलस्थबीजस्य पक्षतायां तदाऽङ्कुरकारित्वस्य मयाप्यनङ्गीकारादित्यर्थः ॥

(१) प्रत्यक्षसिद्धबीजत्वेनैकस्य कल्पनमित्यादि वक्ष्यते ।—गुणानन्दः ।

(२) यत्सम्बद्धं—कलि० मु० पु० पा० । (३) तत् तदा—कलि० मु० पु० पा० ।

(४) शङ्करमिश्रस्येदं मतम् । (५) तत् कारी—कलि० मु० पु० पा० ।

(६) इदं च केचित्तुपक्षीयव्याख्यानविशेषदर्शनाय पुनःप्रतीकधारणम् ।

(७) समुच्चीयते—पा० २ पु० ।

दीधितिः ।

मर्थमिति यत्कारी(१)सर्थ इत्याहुः । अत्र करणाकरणविरोधमुपजीव्य प्रवृत्तयोस्तयोः कथं तत्साधकत्वाशङ्के(२)ति चिन्तनीयम् ॥

कल्पलता ।

अस्त्विति(३) । यदीदं द्रव्यं दीर्घं स्यात् ह्रस्वं न स्यादितिवत् यदि बीजं कारि स्यादकारि न स्यात्, अकारि चैतत्, तस्मान्न कारीति प्रसङ्गतद्विपर्ययौ स्यातामिहापीत्यर्थः । कारित्वाकारित्वे यदि सामर्थ्यासामर्थ्ये एव, तत्र प्रसङ्गतद्विपर्ययौ पूर्वमेव निरस्तावित्याह । नेति । (तत्रेति ।) ननु सामर्थ्यासामर्थ्ये प्रति प्रसङ्गतद्विपर्ययौ नोच्येते येन पूर्वनिरस्तत्वं स्यात्, किं तर्हि, कारित्वाकारित्वे (प्रति, ते) च ताभ्यामन्ये एवेत्यत आह । स्तां वेति । शक्त्यशक्त्योरिति । कारित्वाकारित्वयोरित्यर्थः । तथेति । कालभेदमनन्तर्भाव्य सामान्यतस्तयोरेक(त्र)धर्मिण्युपसंहाराभावात् । एतदेव शङ्कापूर्वकं(४) दर्शयति । यदा तदेति । उभयोरेककालत्वं तिरस्कृत्येत्यर्थः । यत्समर्थमिति । तथा च प्रसङ्गे इष्टापत्तिरित्यर्थः । तदेव स्फुटयति । सम्भवेति । समर्थस्य करणं सम्भवतीत्यत्यन्तायोगव्यवच्छेदस्याभिमतत्वादेवेत्यर्थः । अत्र कार्यविशेषाङ्कुराद्युपधानं (न) विवक्षितम्, अन्यथैकस्यां व्यक्तौ तथाभ्युपगमेऽपसिद्धान्तापत्तेः । यत् समर्थमिति(५) यज्जातीयं समर्थं तज्जातीयं करोत्येवेति वा विवक्षितम् ॥

---

(१) यत्र यत्कारी—पुण० पु० पा० । (२) करणाकरणयोर्विरोधसाधकत्वाशङ्केत्यर्थः ।
(३) अस्तीति—पुण० पु० पा० । (४) शङ्कापूर्वं—पुण० पु० पा० ।
(५) यत्समर्थमित्यादिमूलेनेत्यर्थः ।

ननु यदसमर्थं प्रथममासीत् तस्य सामर्थ्यं पश्चादपि कुत आगतम्(१), प्रथमं समर्थस्य वा पश्चात् (२) कुत्र गतम् । नैतदेवम् । तत्तत्सहकारिमतस्तत्तत्कारकत्वं(३) हि सामर्थ्यम् , अतद्वतस्तदन्यवतो वा तदकर्तृत्वमसामर्थ्यम् । इदं चौत्पत्तिक(४)मस्य रूपम्, ते च सहकारिणः स्वोपसर्पणकारणवशाद्भिन्नकाला इत्यर्थात् कार्याणामपि भिन्नकालतेति ।

दीधितिः ।

सामर्थ्यप्रयुक्तं करणम् , सामर्थ्यं च जनकतावच्छेदकं रूपमित्याशयेना(५)शङ्कते, नन्वित्यादि(ना) । कुत्र गतमिति । सामर्थ्यमित्यनुषज्यते, तथा च तस्योपगमापगमविरहाद्यावत्सत्त्वमकरणं करणं वा प्राप्तमिति भावः । जनकतावच्छेदकरूपवत्त्वं करणप्रयोजकमिति सत्यम्, परं तु सहकारिसाकल्यविशिष्टमित्याशयेनाह । नैतदिति । तदन्यवतः तद्विरोधि(६)मतः ॥

दीधितिटिप्पणी ।

इदं चेति मूलम्, तथा च इदमेतस्य स्वभावरूपमित्यर्थः ॥

कल्पलता ।

ननु प्रथममसमर्थमपि क्रमेण समर्थं भवति, प्रथमं (वा) यत् समर्थं तदपि क्रमेणासमर्थमिति किंनिबन्धनमित्याह । नन्विति । सामर्थ्यं यदि योग्यत्वं वि-

---

(१) तस्य पश्चादपि सामर्थ्यं कुत आयातम्—पुण० पु० पा० । (२) पश्चादपि—पाठः ।
(३) तत्तत्करणं—पाठः । (४) इदं चौत्पत्तिक—कलि० मु० पु० पा० ।
(५) शयेन—कलि० मु० पु० पा० । (६) तच्च प्रतिबन्धकं कारणाभावश्च ।

कल्पलता ।

वक्षित्वा प्रोच्यते(१), तदा सर्वदैव तत् समर्थमेव(२)। अथ कारित्वं विवक्षितं, तदा तदुभयं सहकारिलाभालाभतन्त्रमित्यसकृदावेदित(त्व)मित्यत आह(३)। तस्मादिति । अतद्वत(४) इति । सहकारिविनाकृतस्येत्यर्थः । तदन्यवतो वेति । एककार्यसहकारिसत्त्वे(ऽपि) बलवत्कार्यान्तरसहकारिमतः(५), यथानुमितिसामग्रीतः प्रत्यक्षसामग्री बलवतीत्यर्थः । तदकर्तृत्वम् तदजनकत्वम् । औत्पत्तिकमिति । एतत्स्वभाव एव भावो जायत इत्यर्थः । ननु तर्हि सहकारिसमवहित एव भावो जायतां तत्तत्कार्याणि प्रती(६)त्यत आह । ते चेति । सहकारिणः स्वकारणाधीनसन्निधयो न भावस्वरूपान्तर्गता(७)स्तेषां चानियतकालोपसर्पणत्वात् कार्याणामिव(८) कालानियम इत्यर्थः । उपसर्पणम् सन्निधानम् ॥

दीधितिः ।

स्यादेतत् । अस्तु सहकारिसम्पत्तिः कार्योत्पत्तिनियामिका, तथापि यथैकदेशस्थो विषयादिर्देशान्तरे सहकारिसम्पत्तौ तत्र ज्ञानादिकं जनयति, तथैककालस्थो भावः स्वनाशोत्तरकाले(९) तत्सहकारि(१०)सम्पत्तौ तत्कार्यं(११) जनयेत् , अवश्यं चैतत्

दीधितिटिप्पणी ।

स्यादेतदिति समुदायवाक्ये । पूर्वोक्तस्वकालस्थस्यैव सहका-

(१) विवक्षित्वा पृच्छ्यते-पुण० पु० पा० ।

(२) समर्थमिव-पुण० पु० पा० । (३) मित्याह-पुण० पु० पा० ।

(४) अत-कालि० मु० पु० पा० । (५) सहकारतः-कालि० मु० पु० पा० ।

(६) प्रभवती-पुण० पु० पा० । (७) स्वरूपान्तर्भूता-पुण० पु० पा० ।

(८) कार्याणामपि-कालि० मु० पु० पा० ।

(९) स्वानुत्पत्तिकाले तु पूर्वकालवृत्तित्वाभावादेवाप्रसङ्ग इति भावः ।

(१०) तत्तत्सहकारि-पुण० पु० पा० । (११) तत्तत्कार्यं-पुण० पु० पा० ।

तथाप्येककालस्थ एव भावो जातनष्टस्तदा तदा(१) तत्कार्यं(२) करोतु, उत्पन्नमात्रस्य तत्स्वभावत्वात्, एकदेशस्थवदिति चेत्, सेयमेककालस्थता स्वरूपापेक्षया सहकारिसान्निध्या(३)पेक्षया वा। आद्ये न किञ्चिदनुपपन्नम्, नित्यानामप्येवंरूपत्वात्, वर्तमानैकस्वभावत्वात् (सर्व-)(४) भावानाम्, तदेव तु क्वचित् सावधि क्वचिन्निरवधीति विशेषः। सावधित्वेऽपि व्यापारफलप्रवाहप्रकर्षाप्रक-

---

दीधितिः।

त्वयाभ्युपगन्तव्यम्, कथमन्यथा चिरध्वस्तस्य यागानुभवादेः स्वर्गस्मरणादिजनकत्वमिति शङ्कते। तथापीति। एककालस्थ इति कोऽर्थः, किं स्वाधिकरणकालस्थ इति, किं वा (तत्त)त्कार्यानुगुणतत्तत्सहकारिसाकल्याधिकरणकालस्थ इतीत्याह। सेयमिति। न किञ्चिदिति। स्वकालस्थस्यैव सहकारिसाकल्ये कार्यजनकताया अस्माभिरुपगमात्। तदेव वर्तमानत्वमेव(५)। क्वचित् सावधि कार्योत्पद्यमानतापूर्वकालमात्रावधि(६), क्वचिन्निरवधि कार्योत्पद्यमानताकालस्थायि। ननु कार्याव्यवहितपूर्वकालेऽसतोपि यागादेः कार्यजनकत्वे कदाचिदेव कार्यं जायते नान्यदेत्यत्र किं नियामकमत आह। सावधित्वेऽपीति। व्यापारेति। व्यापारस्य फलप्रकर्षाप्रकर्षाभ्याम् फलानुगुणसहकारिला-

(१) जातनष्टस्तदा—पाठः। (२) तदा कार्यं-पुण० पु० पा०।

(३) सहकारिसन्निधाना-पाठः।

(४) ( ) मूलेऽप्येतच्चिन्हाङ्कितो ग्रन्थः पुणातामकरसम्मतो न भवतीति सर्वत्र ज्ञेयम्।

(५) वर्तमानत्वम्-पुण० पु० पा०।

(६) कार्योत्पद्यमानता, कार्याव्यवहितपूर्वकालः, तत्पूर्वकालमात्रावधि कार्याव्यवहितपूर्वकाले न वर्तते, ततः पूर्वमेव वर्त्तते इति तदर्थः।

र्षाभ्यां(१)विशेषः । द्वितीयस्तु स्यादपि यदि तेषां यौगपद्यं भवेत्, क्रमिणस्तु सहकारिण इत्युक्तम्। सहकारिसहितः स्वभावेन(२) करोतीति वक्तरि (तु) जातनष्ट एव करोत्वित्युत्तरप्रसङ्गो निरर्गलशैशवस्येत्यलमनेन ।

दीधितिः ।

भालाभाभ्याम्, विशेषः कार्योत्पादानुत्पादरूपः। व्यापाररूपस्य फलस्य सहकारिलाभालाभाभ्यामित्यर्थ इत्यन्ये(३)। तदयमर्थः, साक्षात्कार्यजनकत्वे स्वस्य व्यापारद्वारा जनकत्वे च व्यापारस्य सहकारिसाकल्यं तन्त्रम्(४), न चेदं निरन्वय(५)ध्वस्तस्यास्ति, नियतान्वयव्यतिरेकशालिन एव च समवधानस्य नियामकत्वान्नातिप्रसङ्ग इति । सहकारिसहित इत्यस्याग्रे स्वतो(६) व्यापारतो वेत्यादिः। जातनष्टः निरन्वयध्वस्तः(७) ॥

दीधितिटिप्पणी ।

रिसाकल्य इत्यादेर्यागे व्यभिचारादाह । तदयमर्थ इति । निरन्वयः निर्व्यापारः । न्यूनत्वादाह । सहकारीत्यादि ॥

कल्पलता ।

ननु यथा स्वानवच्छिन्नेऽपि देशे आत्मनि(८) इ-

(१) प्रकर्षापकर्षाभ्यां—कलि० मु० पु० पा० । प्रकर्षनिकर्षाभ्यां—पुण० पु० पा० ।
(२) सहितस्वभावेन—पुण० पु० पा० ।
(३) अरुचिबीजं तु व्यापारस्य फलत्वोपवर्णनवैयर्थ्यम् ।
(४) तन्त्रम्, प्रयोजकम्, फलोत्पाद इति शेषः ।
(५) निर्णय—कलि० मु० पु० पा० । (६) इत्यस्य स्वतो—पुण० पु० पा० ।
(७) निर्णयध्वस्तः—कलि० मु० पु० पा० । (८) देशे स्वात्मनि—कलि० मु० पु० पा० ।

कल्पलता ।

न्द्रियादि ज्ञानसुखादिकं(१) यथा वा मृदङ्गाद्याकाशे शब्दं जनयति, तथा स्वा(२)नवच्छिन्नेऽपि काले क्षणिको(३) भावः कार्याणि जनयतु, न ह्येकं(४) वस्तु क्षणद्वयसम्बद्धं भवितुमर्हतीत्याह । तथापीति । जातनष्टः क्षणिकः । एककालस्थ इति, स्वसम्बन्धिकालस्थ इति विवक्षायामिष्टापत्तिः, स्थैर्येपि(५) भावानां स्वावच्छिन्न एव (काले) स्थितेरित्याह । स्वरूपापेक्षयेति । क्वचित्सावधी(कृ)त्यनित्यभावानां, क्वचिन्निरवधीति नित्यभावानाम् । नन्वेवं यागाद्यपि स्वानवच्छिन्ने(६) काले स्वर्गादि न जनयेदित्यत आह । सावधित्वेऽपीति । यागादीनामपि व्यापाररूपं यत्फल(७)मपूर्वादि तस्य प्रकर्षः(८) परिपाक(९)स्तद(धीनश्च स्वर्गादिफल)सम्बन्ध इति नोक्तदोष इत्यर्थः । तर्हि यागवद्बीजाद्यपि स्वानवच्छिन्ने काले कार्यजनकं स्यादत आह । अप्रकर्षेति(१०) । तेषां न तादृशो व्यापार इत्यर्थः । ननु य एव सहकारिकालः स एव बीजादेरपि काल इति कथं कार्याणि जातनष्ट एव न करोतीत्यत आह । द्वितीयस्त्विति । किंच(११) तथाप्येककालस्थ एव भाव इत्यादि त्वदभिधानमपि मां प्रत्यसम्बद्धमित्याह । सहकारीति ॥

---

(१) ज्ञानं सुखादिकं-कलि० मु० पु० पा० । (२) तथार्था-पुण० पु० पा० ।
(३) क्षणिकोपि-पुण० पु० पा० । (४) ह्येवं-पुण० पु० पा० ।
(५) स्थैर्येभि-पुण० पु० पा० । (६) नवच्छिन्नेपि-पुण० पु० पा० ।
(७) व्यापाररूप-कलि० मु० पु० पा० । (८) प्रकर्षश्च-कलि० मु० पु० पा० ।
(९) परीपाक-पुण० पु० पा० । (१०) अपकर्षेति-कलि० मु० पु० पा० ।
(११) द्वितीयस्त्विति । कथञ्चित्-पुण० पु० पा० ।

तस्मात् कार्यस्य स एव कालः, कारणस्य तु स चान्यश्चेति सम्बन्धिकालापेक्षया पूर्वकालताव्यवहारः(१)।

दीधितिः।

कार्यकारणयोरेककालत्वेऽपि पूर्वापर(भाव)व्यवहारं व्यवस्थापयति(२)। तस्मादिति। स एव सहकारिसमवधानोत्तर एव। सम्बन्धीति। सम्बन्धिनोः कार्यतत्प्रागभावयोर्यौ कालौ तदपेक्षया, तद्वृत्तित्वप्रतिसन्धानेन(३) कारणकार्ययोः पौर्वापर्यव्यवहार इत्यर्थः(४)॥

दीधितिटिप्पणी।

ननु सेयमेककालस्थतेत्यादिना कार्यकारणयोरेककालस्थताऽङ्गीकृता, एवञ्च कथं पूर्वापरव्यवहार इत्याशयेनावतारयति। कार्यकारणयोरिति। सहकारिसमवहितेन(५) करोतीत्यत्रोत्तरकाल इत्यस्यार्थतो गम्यतया पूर्वोपस्थितत्वादाह। स एवेति। सम्बन्धिनोरिति। उभयकालवृत्तित्वेनास्य पौर्वापर्यमिति(६) भावः॥

कल्पलता।

नन्वेतावता कार्यकारणयोर्यौगपद्ये(७) कारणस्य पूर्वकाल(ता)विरहात् कारणतैव न स्यादित्यत आह। तस्मादिति। स एव सामग्र्यव्यवहितोत्तर एव। कारणस्येति। किञ्चित् कारणं तन्त्वादि सामग्र्यनन्तरमप्यनुवर्तते, किञ्चित्तु(८) व्यापारं जनयित्वा कार्यात् पूर्वमेव नश्यती(९)त्यनियम एवेत्यर्थः। सम्बन्धीति। य-

(१) पेक्षया पूर्वापरकालताव्यवहारः—पुण० पु० पा०। पेक्षया व्यवहारः-पाठः।

(२) पूर्वापरव्यवहारनियामकं व्युत्पादयतीत्यर्थः।

(३) व्यवहारे विषयस्याहेतुत्वादाह। तद्वृत्तित्वप्रतिसन्धानेनेति।

(४) इति—पुण० पु० पा०। (५) समवहितस्वभावेन-इति तु युक्तः पाठः स्यात्।

(६) पौर्वमिति—इत्यादर्शपुस्तके पाठः।

(७) कार्यकारणयौगपद्ये-पुण० पु० पा०। (८) केचित्तु—पुण० पु० पा०।

(९) पूर्वमेव विनश्यन्ती-पुण० पु० पा०।

कल्पलता ।

स्मिन् काले यत् सम्बध्यते स एव तस्य काल इत्यर्थः । प्रथमप्रकरणार्थप्रपञ्चोऽयम् ॥

अपि च यदा तदेति(१) स्थाने यत्र तत्रेति प्रक्षिप्य तयोरेव प्रसङ्गतद्विपर्यययोः को दोषः ।

दीधितिटिप्पणी ।

मूले यदा तदेत्युपेक्ष्येति विशेषणबाहुल्यभयादुक्तम्, वस्तुत एतत्सत्त्वेपि प्रकृतस्य क्षणिकबीजनानात्वस्य निर्वाहात् ॥

कल्पलता ।

परस्मै यद्विरोधदानाय, तमिदानी(२)माह । अपि चेति । क्षेत्रपतितं बीजं यदि तस्मिन्नेव काले कुशूलेऽप्यङ्कुरजननसमर्थं स्यात् तदा(३)ङ्कुरं जनयेत्, न तु जनयति, तस्मान्न तदा तत्समर्थ(४)मिति क्षणिकमपि सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मसंसर्गेण भिन्नं स्यादिति प्रघट्टकार्थः ॥

न कश्चिदिति चेत्, तर्हि देशाद्वैतं वा कारणभेदो वा

दीधितिः ।

तर्हीत्यादि । बीजादेरेकस्मिन् देश इव देशान्तरेऽप्यङ्कुरादिजननसामर्थ्ये तत्राप्यङ्कुरादिजननात् सर्वेषां देशानां सर्वकार्यवत्त्वरूपमद्वैतमापद्येत, तथा च कार्याणां भिन्नकालाशेषदेश(५)वृत्तित्वे-

दीधितिटिप्पणी ।

सामर्थ्ये, स्वीक्रियमाणे । अभेदरूपमद्वैतं बाधितमत आह । सर्व-

(१) तदेत्यस्य-पुण० पु० पा० । तदेत्युपेक्ष्य(तत्थाने) इति टिप्पणीकृन्मतः पाठः ।
(२) तादिदानी-पुण० पु० पा० । (३) तत्रा-पुण० पु० पा० ।
(४) तत्र समर्थ-पुण० पु० पा० । (५) देशारोप—कलि० मु० पु० पा० ।

आपद्येत । आपद्यताम्, तदादाय योगाचारनयनगरं प्रवे-

दीधितिः ।

ऽनादित्वमेव(१) पर्यवस्येदिति साधु क्षणिकत्वम्, असामर्थ्ये तु सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्मसंसर्गाद्बीजादिव्यक्ते(२)र्भेद आपद्येत, तथा च तस्या अपि(३) पूर्ववदेव पुनर्भेदापत्तौ बीजादिशून्यत्वमेवा(४)पद्येतेति भावः । भावार्थे(५) कृतनिर्भर आशङ्कते । आपद्यतामिति । आपद्यतां बाह्यशून्यत्वम् । योगाचारः विज्ञानवादी । तन्नयानुसरणं हि हेतुफलभावमुपेत्य अपोह्य वा । आद्ये

दीधितिटिप्पणी ।

कार्यवत्त्वेति । साध्विति सोपालम्भम् । असामर्थ्ये अङ्गीक्रियमाणे तु । बीजादिशून्यत्वमिति । न च कथमेतावता शून्यत्वम्, एकदा बहुतरबीजभेदस्यैवागमनादिति वाच्यम् । एवमेकस्य जगतीत्यादिना मूलकारणे यद्वाच्यं तदेवानेन कथितम्, तच्च मूले नैवोक्तम् । किंचित्तु एकस्यैवैतत्कालवृत्तित्वपूर्वकालवृत्तित्वरूपविरुद्धधर्मवत्त्वाद्बीजत्वमेव न स्यादित्यर्थः । न च तत्र भेदोऽङ्गीकर्तव्यः, तथापि तद्दोषात् । आपद्यतामित्यत्र देशाद्वैतं वक्तुं न पार्यते, विज्ञानवादिमतेऽपि विभिन्ने विज्ञाने सर्वकार्यवत्त्वरूपाद्वैतानङ्गीकारात्, अतः कारणभेदो वेत्येतत्परतया सङ्क्रमयति । भावार्थ इति । बीजादिरूपबाह्यशून्यत्वस्य योगाचारमतस्य पूर्वं शब्दानुक-

(१) आपत्तावनिष्टान्तरमाह । अनादित्वमेवेति । अनादित्वमित्युपलक्षणम्, अनन्तत्वमित्यपि महाप्रलयानभ्युपगमे बोध्यम् । (२) अङ्कुरकारिबीजादिव्यक्तेरित्यर्थः । (३) भिन्नत्वेन सिद्धाया अपि ।

(४) बीजादेः शून्यत्वमेव, अङ्कुराद्यर्थक्रियाऽकारित्वमेव, तथा चार्थक्रियाकारित्वरूपसत्त्वहेतोः क्षणिकत्वसाधनस्य पक्षेऽसिद्धिरिति भावः ।

(५) बाह्यशून्यत्व इत्यर्थः । यद्यपि विज्ञाननयप्रवेशेऽपि विज्ञानस्य कालान्तरे देशान्तरे च सामर्थ्यमसामर्थ्यं वेत्यादिप्रसङ्गतद्विपर्ययाभ्यामापद्यत एव कालाद्वैतं देशाद्वैतं च, तथापि तद्देशजनकत्वाजनकत्वादिप्रसङ्गतद्विपर्ययाणां कार्यकारणभावोपजीवकत्वम्, विज्ञाननये तु परेण परस्यावेदनात् स्वमात्रमग्नमूर्तिकतया इदमस्य कार्यमिदमस्य कारणमिति ग्राह्यभेदोल्लेखसाध्यो न कार्यकारणभावनिश्चयो न वा वस्तुतः स सम्भवी, तस्यापि ज्ञानविशेषत्वात्, न च तदेवापाद्यम्, ज्ञानाद्वैतपक्षे एकज्ञानविषयीकृतानां देशानामप्यभेदेनेष्टापत्तेः । नन्वेवमर्थक्रियाकारित्वरूपं सत्त्वमपि तन्नये विज्ञानस्य न स्यात् । न स्यादेव । प्रामाणिकत्वरूपस्यैव सत्त्वस्य तैरुपगमात्, स्वप्रकाशतया च तस्य विज्ञानेषूपपत्तेरिति ध्येयम् ।

क्ष्याम इति चेन्न । हेतुफलभाववादं(१) वैरिणमनपोद्य तत्र प्रवेष्टुमशक्यत्वात् । तदपवादे वा सत्त्वाख्यसाधनशस्त्रसंन्यासिनस्तव बहिर्वादसङ्ग्रामभूमावपि कुतो भयम् ।

दीधितिः ।

एकस्मिन् ज्ञानात्मनि काले देशे वा(२) ज्ञानजननसमर्थस्य विज्ञानस्य ज्ञानात्मकेषु देशान्तरेषु कालान्तरेषु च तत्सामर्थ्ये तेषु(३) सर्वेषु तज्ज्ञानोत्पत्तिप्रसङ्गः, असामर्थ्ये तु विरुद्धधर्मसंसर्गेणैकस्यापि(४) भेदापत्तौ पूर्वोक्तन्यायेन शून्यत्वमेव स्यादिति क्व विज्ञानवादः । द्वितीये तु सामर्थ्यासामर्थ्ययो(५)र्विरुद्ध(धर्म)योरसिद्ध्या भेदासिद्धावसिद्धव्याप्तिकतया अर्थक्रियाऽकारित्वरूपतया वा सत्त्वस्य(६) क्षणिकत्वसाधनस्य परित्यागे बाह्यास्थिराभ्युपगमेऽप्यविरोधाद्यर्थं तन्मतानुसरणमित्याह । हेतुफलेति ।

दीधितिटिप्पणी ।

त्वादाह । भावार्थ इति । तथा चेत्यादिना एतस्यैव भावार्थतयोक्तत्वात् । शून्यत्वमेव विज्ञानशून्यत्वमेव । द्वितीये अपोद्येति पक्षे । अर्थक्रियेति । नञ्प्रश्लेषेणार्थाक्रयाऽकारित्वरूपतयैवेत्यर्थः । तन्मते सत्ता द्विविधा, एका सत् सदित्यनुगतव्यहारस्य जनिकाऽपरा च जनकत्वरूपा । अन्त्यायाश्च तेन हेतूकरणात्, तथा च व्याप्त्यसिद्धिनिबन्धनं हेतुतावच्छेदकावच्छिन्नहेतोरभावनिबन्धनं वा क्षणिकत्वसाधकं सत्त्वं नास्तीत्यर्थः । इतरव्याख्यानं च वाकारासम्बद्धमित्युपेक्षितम् । अविरोधात् भवता समं(७) नैयायिकस्य विरोधाभावात् । आपद्यता-

(१) वाद-कलि० मु० पु० पा० । (२) ज्ञानात्मनि देशे काले वा—पुण० पु० पा० ।

(३) तत्सामर्थ्येषु-कलि० मु० पु० पा० । (४) एकस्यापि, क्षणिकत्वेनाभिमतविज्ञानस्यापि ।

(५) प्रामाणिकत्वरूपसत्त्वस्य हेतुत्वाभिप्रायेणाह । सामर्थ्यासामर्थ्ययोरिति । तथा च सत्त्वाख्यसाधनपदं सत्त्वाख्यव्याप्तिग्रहोपायाविरुद्धधर्माध्यासपरम् । अर्थक्रियाकारित्वरूपसत्त्वस्य हेतुत्वपक्षे त्वाह । अर्थक्रियेत्यादि ।—गुणानन्दः ।

(६) अर्थक्रियाकारित्वरूपतया वाह्यत्वस्य-कलि० मु० पु० पा० । अर्थक्रियाकारित्वरूपसत्त्वस्य—पुण० पु० पा० । (७) भवता मम—पा० २ पु० ।

दीधितिः।

केचित्तु विज्ञानवादिनये सर्वेषामेव कार्याणां ज्ञानाभिन्नदेशत्वं देशानां च ज्ञानत्वेनाभिन्नत्व(१)मिष्यत एवेत्याह। आपद्यतामिति। तन्नये परेण परस्यावेदनादेकेन कार्यकारणा(२)भिमतज्ञानद्वयाग्रहणान्न कार्यकारणभावसिद्धिरित्याह, हेतुफलेतीत्याहुः(३)॥

दीधितिटिप्पणी।

मित्यनेन देशाद्वैतपक्ष एवापाद्यत इति व्याख्यातॄणां मतमाह। केचित्त्विति। विज्ञानवादिनये अभिन्नकार्यवस्त्वरूपं वा देशाद्वैतं परस्पराभेदो वा, उभयमपीष्यत एवेत्यर्थः। ननु कथं तत्र हेतुफलभावो वैरी, एकविज्ञानेनान्यविज्ञानजननसम्भवादतः, तन्नय इत्यादि। तन्मते एकेन विज्ञानेन स्वभिन्नाग्रहणात् कार्यकारणभावग्रहासम्भवात्, उभयग्रहण एव तद्ग्रहणात्, तथा च तदापाद्येत्यसङ्गतमिति भावः। अत्र च ज्ञानत्वेनैक्ये प्रमेयत्वादिनाप्यैक्यसम्भवात् आद्यवादिनयेपि देशाद्वैतापादनं कर्तुं पार्यत इति व्यर्थं योगाचारानुसरणमित्यस्वरसः॥

कल्पलता।

अत्र प्रसङ्गे दोषाभिधाने कालगर्भप्रसङ्गेऽपि(४) दोषः स्यादित्यभिप्रायेणाह। न कश्चिदिति। ननु बीजदेशादन्यो देशो(५) यदि भवेत्, तदा तत्र तत्राजनननिबन्धनमसामर्थ्य(६)मापद्येत, तथा च सर्व(त्र) देशे समर्थमेव बीजमिति नास्माकं विरुद्धधर्माध्यास इत्यत आह। तर्हीति। यद्येक एव देशो भवेत् तदैवं सम्भाव्ये-

---

(१) ज्ञानत्वेनाभिन्नत्वं—कलि० मु० पु० पा०।

(२) कार्यकरणा—कलि० मु० पु० पा०।

(३) आहुरित्यरुचिबीजं तु तज्ज्ञानवस्त्वापादने तत्रेष्टापत्त्यसम्भवेन हेतुफलेत्यादिदोषान्तराभिधानमनुपयोगि। एवमेकस्य जगतीत्यादिविरोधः।—गुणानन्दः।

(४) प्रसङ्गोपि-पुण० पु० पा०। (५) दन्योपदेशो-पुण० पु० पा०।

(६) निबन्धनासामर्थ्य-पुण० पु० पा०।

कल्पलता।

न, यदि वा देशनानात्वेऽपि सर्वो देशो बीजाधार एव स्यात् तदा स्यात्, आद्ये देशाद्वैतम्, अन्त्ये कारणस्याप्येकस्यैव बीजस्य तावद्देशवृत्तितया भेदः(१) स्यादित्यर्थः। ननु क्षेत्रकुशूलाद्यात्मापि देशो ज्ञानस्वरूपमेव, बाह्यस्यास्माभिरनङ्गीकारात्, ज्ञानं चैकदेशमेवेति(२) देशभेदेन(३) सामर्थ्यासामर्थ्यापादनं मां प्रति निरवकाशमित्याह। आपद्यतामिति। ज्ञानमात्रं क्षणस्थायि, न बाह्यं किञ्चिदस्तीति योगाचारनयः, तदेव नगरमित्यर्थः। भेदेन ग्राह्यग्राहकभावो नास्ति, किं तु स्वप्रकाशज्ञानमेव(४) जगदिति योगाचारमताश्रयणे कार्यकारणभावोऽपि त्वया नैष्टव्यः(५), इदमस्य कारणमिदमस्य कार्यमिति भेदेन ग्राह्यग्राहकभावे सत्येव सिद्ध्येत, तथा च मां प्रति सामर्थ्यासामर्थ्यलक्षणविरुद्धधर्माध्यासेन(६) यत् सत् तत् क्षणिकमिति यत्(७) त्वया साधयितुमुपक्रान्तं, तत् सर्वं भग्नमेवेत्याह। हेतुफलेति(८)। ननु हेतु(९)फलभावो(पि) मास्तु, को दोष इत्यत आह(१०)। तदपवाद इति। तर्ह्यर्थक्रियाकारित्वलक्षणेन सत्त्वेन हेतुना यत् क्षणिकत्वं त्वया साधयितुमुपक्रान्तं, तच्चेद्धि-

---

(१) वृत्तितयाऽभेदः-कालि० मु० पु० पा०।

(२) चैकदेश एवेति-पुण० पु० पा०। (३) ज्ञानंस्यैव देशभेदेन-पाठः।

(४) स्वप्रकाशात्मकं-पाठः। स्वप्रकाशज्ञानात्मकं-पुण० पु० पा०।

(५) नेष्टव्यः-कालि० मु० पु० पा०। (६) धर्माध्यासे-कलि० मु० पु० पा।

(७) धर्माध्यासेन यत् क्षणिकत्वं-पा० २ पु०। (८) फलभावेति-पुण० पु० पा०।

(९) ननु दृष्ट-पुण० पु० पा०। (१०) इत्याह-पा० २ पु०।

कल्पलता ।

हाय दूरं(१) पलायितेन त्वया संन्यस्तमेव, तदा सि-द्धं नः समीहितम्, यतः पराजितोऽस्येव, तथा च के-न भयेन योगाचारनय(२)नगरप्रवेशस्तवेत्यर्थः ॥

ननु यावत्योऽर्थक्रिया भिन्नदेशा(३)स्तावद्भेदं कारणमस्तु, को विरोध इति चेन्न । तेषामपि प्रत्येकं तत्प्रसङ्गस्य तदवस्थत्वात् । एवमेकस्य जगति वस्तुत-

दीधितिः ।

भिन्नदेशकार्यद्वयजनकस्य एककार्यदेशे कार्यान्तरसामर्थ्ये तत्रापि तत्कार्यजननमसामर्थ्ये च कारणभेद आपद्येतेत्याशयं(४) मन्यमानो भ्रान्त आशङ्कते । नन्विति । आशयं प्रकाशयति । तेषामिति ॥

दीधितिटिप्पणी ।

हेतुफलेत्यादिना कारणभेदो वेत्यस्य दूषितत्वात् पुनरुत्थानं न घटत इत्यत आशयाबोधनिबन्धनोत्था(५)नमाह । भिन्नदेशेति । येन कारणेन देशद्वये कार्यद्वयं जनितं तत्रैककार्याधिकरणेऽपरकार्याज-नकत्वरूपविरुद्धधर्मेण तयोर्भेद एवापाद्यत इत्येव बुद्ध्वा, तत्र च बाह्या-र्थशून्यत्वं कथं स्यात् । कार्यानधिकरणदेशादिकमादाय (हि) भेदा-पादनं तद्भेदापत्त्या शून्यत्वमित्याशयेन फाक्केत्यर्थः । आशयमिति । तथा(६) बोध एव भ्रान्तत्वम् । (आशयम्) वास्तवाशयम प्रकाश-यति । तेषामपीति मूलम्, तेषाम् भिन्नानाम ॥

(१) तच्चेदियद्दूरं-पुण० पु० पा० । (२) योगाचार-कलि० मु० पु० पा० ।

(३) देशस्था—पुण० पु० पा० ।

(४) स्वदेशे स्वोपादेयकार्यं प्रति शक्तो भावस्तत्रैव सहकार्यं ज्ञानसुखाद्यपि प्रति समर्थश्चेत् तत्रापि जनयेत्, तथा चोपादेयसहकार्ययोर्देशाद्वैतमभिन्नदेशता स्यात्, यद्यत्र जननसमर्थं तत् तत्र जनयतीति प्रसङ्गस्यादुष्टत्वात्, विपर्ययस्यादुष्टत्वे कारणभेदः क्षणिकस्यापि कारणस्य तदतद्देशसा-मर्थ्यासामर्थ्यरूपविरुद्धधर्मसंसर्गाद्भेदो नानात्वं स्यादित्याशयमित्यर्थः ।

(५) त्थाप —इत्यादर्शपुस्तके पाठः । (६) आशयस्येतरथा–इत्यादर्शपुस्तके पाठः ।

त्त्वस्याऽलाभे साध्वी क्षणभङ्गसाधनपरिशुद्धिः(१)।

कल्पलता।

द्वितीयं(२) पक्षमाशङ्क्य निराकरोति। नन्विति। यावत्त्य इति। यत्र यत्र देशे त्वया कारण(३)मापाद्यते तत्र सर्वत्र तद्बीजमस्ति समर्थं च करोति चेति क विरोध इत्यर्थः। तेषामपीति(४)। कारणानां देशभेदेन (भेदे) यत् क्षेत्रपतितं तत्कुशूले करोति न वा, यत् कुशूलस्थं तच्च दूरे(५) करोति न वेति तत्तदेवाधिकृत्य प्रसङ्गतद्विपर्ययौ वक्तव्याविति किमप्येकं(६) जगति न स्यादिति किंधर्मिकं क्षणिकत्वं साधनीयमित्यर्थः॥

(१) न चैकस्य जगति वस्तुतत्त्वस्यालाभेपि अविवक्षितैकत्वानेकत्वकबीजसामान्यपक्षकप्रसङ्गविपर्यययोर्न कश्चिद्दोष इति वाच्यम्। पूर्वक्षणवर्ती भावस्तदव्यवहितोत्तरक्षणवर्तिभावभिन्नो विरुद्धधर्माध्यस्तत्वादित्यनुमाने यतः कुतश्चित् भेदमादाय सिद्धसाधनम्, मिथःप्रतियोगिकभेदासिद्धेरर्थान्तरं च, न च मिथःप्रतियोगिकभेदाश्रयत्वं साध्यम्, यतः कुतश्चिद्भेदस्यापि मिथोभेदत्वेन पुनस्तद्दोषतादवस्थ्यात्। अतः सामर्थ्याश्रयो धर्म्यसामर्थ्याश्रयाद्भिन्नः इति साध्यम्, अलीकमादाय परमते प्रतियोगिप्रसिद्धिः, बीजान्तरमादायैव वा, तस्यापि तदङ्कुरं प्रत्यसमर्थत्वादिति वस्तुस्थितिः, तत्र चैकस्य जगति वस्तुतत्त्वस्यालाभ इत्यादिना पक्षाप्रसिद्धिः स्वरूपासिद्धिर्वोद्भाव्यते, सामर्थ्यस्य पक्षतावच्छेदकत्वे आद्यापि, उपलक्षणीभूय तद्व्यक्तित्वादिस्वरूपपक्षतावच्छेदकान्तरपरिचायकत्वे तु द्वितीयैव, सर्वस्यैव जगतो देशान्तरे कार्याजनकत्वेनासामर्थ्यस्योपगन्तव्यत्वात्, एवञ्चावृत्तित्वव्यासामर्थ्यादिकमेव दोषः। यद्यपि स्वमते परमते चाऽवृत्तित्वं सामर्थ्यस्य नास्तीति दोषाप्रसिद्धितादवस्थ्यम्, तथापि ग्रन्थस्य दोषप्रसञ्जन एव तात्पर्यात् तदप्रसिद्धावपि काचित् क्षतिः, आपाद्यव्यतिरेकस्य तर्काननुकूल्यात्, एवञ्च तद्देशकार्यकारित्वं यदि देशान्तरकालान्तरीयकार्यकारित्वाभावविरुद्धं स्यात् अवृत्ति स्यादित्यत्र प्रघट्टकतात्पर्यम्, अवृत्तावापाद्यापादकयोः प्रसिद्धिः।

(२) द्वितीय—पुण० पु० पा०। (३) त्वया कारण—कलि० मु० पु० पा०।
(४) तेषामिति-पुण० पु० पा०। (५) तच्चत्वरे-पुण० पु० पा०।
(६) किमप्येवं-कलि० मु० पु० पा०।

अस्तु तर्हि कश्चिद्दोष एवा(१)नयोरिति चेत्, स पुनः कस्मिन् साध्ये । किं सामर्थ्यासामर्थ्ययोः(२), किं

दीधितिः ।

अनयोः देशगर्भप्रसङ्गविपर्ययोः । सः दोषः । साध्ये(३) विषये । सामर्थ्येति । साध्ययोरिति विपरिणतेनान्वयः । केचित्तु विरुद्धधर्मसंसर्गा(४)द्भेदापत्तिभयेन यदि कश्चित् कारिणोऽपि सामर्थ्यं नोपेयात् तदा तं प्रति तदपि साध्यम्, यद्वक्ष्यति, सर्वत्राशक्ताविति । अशक्तौ असामर्थ्ये । भेदोपि (च) परम्परया प्रसङ्गादिसाध्यः, विरोधस्तु भेदसिद्ध्यनुगुणः प्रमाणान्तर-

दीधितिटिप्पणी ।

सामर्थ्यस्य(५) प्रसङ्गहेतुत्वमेव, न तु साध्यत्वमत आह । साध्य इति । साध्यपदस्य यथाश्रुतार्थरक्षकस्य मतमाह । केचित्त्विति । तदा, तत् सामर्थ्यमपि, तथा चेतरानुमानसाध्यत्वमादाय साध्यपदार्थो विवक्षितः । यद्वक्ष्यतीति । तथा चैतन्मतेनैव तत्साधनमित्यर्थः । ननु तत्र शक्तिसाधनमेवोक्तमतस्तमपि व्याचष्टे । अशक्ताविति । द्वितीये सङ्क्रमयति । भेदोपि चेति । तृतीयवितर्के सङ्क्रमयति । विरोधस्त्विति । किमर्थं साधनीयोऽत आह । भेदसिद्ध्यनुगुण इति । तथा च प्रकृतोपयुक्ततया तस्य साध्यत्वमवश्यमिति भावः । करणाकरणरूपशक्त्यशक्त्योर्विरोधनिश्चया कथं प्रसङ्गविपर्यययोरिष्टत्वम्, तदविरोधेपि तयोरक्षतेः, सामर्थ्यासामर्थ्ययोर्विरोधस्य तदुपजीव्य-

(१) तर्हि दोष एव कश्चिद्— पुण० पु० पा० ।

(२) तथा च बीजदेशादन्यो देशो यदि भवेत् तदा तत्राजननिबन्धनमसामर्थ्यमापद्येत, अस्माकं तु सर्वत्र देशे समर्थमेव बीजमिति न विरुद्धधर्माध्यासः, अथ वा बीजदेश एव यदि कश्चिद्भवेत् तदा तत्र जनननिबन्धनं सामर्थ्यमादाय विरुद्धधर्माध्यासो भवेत्, अस्माकं तु सर्वत्र देशेऽसमर्थमेव बीजमिति न विरुद्धधर्माध्यास इत्याशयः ।

(३) सामर्थ्यस्य भेदस्य विरोधस्य च प्रसङ्गविपर्ययासाध्यत्वादाह । साध्य इति ।

(४) विरुद्धधर्मसंसर्गात्, तद्देशसामर्थ्यदेशान्तरासामर्थ्यरूपात्, कारिणोपि, एकदेशकार्यकारिणोपि कार्यं प्रति सामर्थ्यं नोपेयात्, नाभ्युपगच्छेत् तदा, तम्, वादिनं, प्रति, तदपि, सामर्थ्यमपि, तत्र स्वरसमाह । यदिति ।

(५) साम्यमूलभिन्नासामर्थ्यस्य- इत्यादर्शपुस्तके पाठः ।

वा तद्विरुद्धधर्माध्यासेन भेदे(१), आहोस्वित् शक्त्यशक्त्योर्विरोधे ।

दीधितिः ।

साध्यत्वेन विवक्षित(२) इत्याहुः(३) । शक्त्यशक्त्योः सामर्थ्यासामर्थ्ययोः । अग्रे च कारित्वाकारित्वे करणाकरणे च सामर्थ्यासामर्थ्यपरे । एवं भिन्नकालशक्त्यशक्त्योरित्यपीति(४) । यद्वा प्राक् प्रसङ्गविपर्यययो(५)रिति भेदसाधकयोर्देशभेदेन करणाकरणयोरप्युपलक्षकम्, तत्र च एकत्र कारिणो देशान्तरेऽपि कारित्वाभ्युपगमे सर्वदेशानां सर्वकार्यवत्त्वरूपमद्वैतम्, एकत्राकारिणः(६) सर्वत्राकारित्वाभ्युपगमे च सर्वकार्यशून्यत्वरूपमद्वैतम्, क्वचित्कारित्वस्य क्वचिच्चाकारित्वस्य चाभ्युपगमे का·

दीधितिटिप्पणी ।

त्वाद्यन्त आह । शक्त्यशक्त्योरिति । अग्रे तृतीयविकल्पदूषणमध्ये । कारित्वाकारित्वादिकं विभिन्नस्थितमनेनोक्तम(७) । यथाश्रुतपदार्थरक्षार्थं स्वातन्त्र्येण कारित्वाकारित्वयोरप्युट्टङ्कनं दर्शयति । यद्वेति । प्रागिति । अपि चेत्यनेनोक्तयोरित्यर्थः, तथा च प्रसङ्गविपर्यययोः करणाकरणयोश्च न दोष इत्यर्थः । एवं च पूर्वं यस्योत्कीर्तनं, इदानीं स इत्यनेन तत्रैव दोषदानमुचितमिति भावः । एवं व्याख्याने तर्हीत्यादिना कारित्वपक्षे दूषणस्यानुक्तत्वान्न्यूनता स्यादतस्तत्रापि तद्व्याख्यामाह । तत्र चेति ॥

---

(१) तथा च क्वचिदपि भेदाप्रसिद्धौ विपर्ययानुमाने साध्याप्रसिद्धिः, तत्प्रसिद्धौ च कुत्रापि तद्व्याप्यत्वानुपगमे हेतोरनैकान्तिकत्वं च दोष इति भावः । अन्यत्र हेतौ तद्व्याप्यत्वाभ्युपगमेपि प्रकृतहेतावनभ्युपगमपक्षमभिप्रेत्याह । शक्त्यशक्त्योरिति ।

(२) विकल्पित--पुण० पु० पा० ।

(३) अत्रारुचिबीजं तु आपादकीकृतस्य साधनस्य तन्मतासिद्धस्यास्माभिः साधयितुमनर्हत्वमित्यादि बोध्यम् ।

(४) भिन्नेत्यादिवक्ष्यमाणग्रन्थेपि शक्त्यशक्तिपदे सामर्थ्यासामर्थ्यपरे इत्यर्थः ।

(५) प्रसङ्गतद्विपर्यययोरित्यस्यार्थतोऽनुवादोऽयम् ।

(६) कारिणश्च—पुण० पु० पा० ।

(७) स्थितमानेनो-इत्यादर्शपुस्तके पाठः । स्थितिमतेनो-पा० २ पु० ।

दीधितिः ।

रणभेद आपद्येतेति नेयम् । अनयोरिति । प्रसङ्गविपर्यययोः करणाकरणयोश्चेत्यर्थः । शक्त्यशक्त्योरिति । करणाकरणयोरित्यर्थः, तथा च यथाश्रुत एवाग्रिमग्रन्थः साधीयान् ॥

कल्पलता ।

अनयोरिति । देशगर्भप्रसङ्गतद्विपर्यययोरित्यर्थः । सामर्थ्यासामर्थ्ययोरिति (साध्ययोरिति वि)परिणामः । सामर्थ्यासामर्थ्ययोः सतोर्भेदे साध्य इत्यग्रेतनेन सम्बन्धः(१) । तत्र यद्यपि सामर्थ्यासामर्थ्यरूपे एवाहत्य न साध्ये, किं तु तदुभयविरुद्धधर्माध्यासाधीनो धर्मिणि भेदः साध्यः, तथापि प्रसङ्गतद्विपर्ययाभ्यां साक्षात् ते एव साध्ये इत्यदोषः(२), एतदेवाह । किं वेति । शक्त्यशक्त्योरिति । करणाकरणयोरित्यर्थः । विरोध इत्यत्र साध्य इत्यनुषञ्जनीयम् । कश्चिद(३)नयोर्दोष इति सर्वत्रानुषङ्गः ॥

नाद्यः, सर्वत्र सामर्थ्ये (हि) प्रसह्य करणात्, सर्वत्राशक्तौ क्वचिदप्यकरणात । सर्वदेशसमानस्वभावत्वेप्यस्य(४) स्वोपादानदेश एव तत्तत् कार्यं(५) करोतीत्यत्र-

दीधितिः ।

स्वोपादानेति । स्वम् कार्यम् । प्रतिनियतदेशोपलक्षकं चेदम्,

दीधितिटिप्पणी ।

इदम् स्वोपादानपदम् । प्रतिनियतेति । येन यत्राधिकरणे कार्यं

(१) इत्यग्रेतनेनान्वयः-पुग० पु० पा० । (२) इत्यर्थः—पुण० पु० पा० ।
(३) काश्चिद—पुण० पु० पा० । (४) स्वभावत्वेपि—पाठः ।
(५) तत्कार्यं-क०लि० मु० पु० पा० ।

मस्य(१) स्वभावः स्वकारणादायातो न नियोगपर्यनुयोगावर्हतीति चेत्, तर्हि सर्वकालसमानस्वभावत्वेऽपि तत्तत्सहकारिकाल एव(२) करोतीत्ययमस्य स्वभावः स्वकारणादायात इति(३) किं न रोचयेः।

दीधितिः।

क्षणिकत्वेन कारणस्य कार्याधिकरणत्वायोगात् ॥

दीधितिटिप्पणी।

जन्यते तद्देश इत्यर्थः ॥

कल्पलता।

सामर्थ्यासामर्थ्ययोः साध्यत्वे यदि प्रसङ्गतद्विपर्ययौ दुष्टौ स्याताम्, तदा सर्वत्र सामर्थ्यमेव स्यात्, असामर्थ्यमेव(४) वा, आद्ये आह(५)। प्रसङ्गेति। अन्त्ये आह(६)। सर्वत्रेति। देशभेदेन सामर्थ्यासामर्थ्ये नैकस्य विरुद्धे इति यदि, तदा कालावच्छेदभेदेनापि(७) न विरोध इति कुतः क्षणिकत्वमिति शङ्कोत्तराभ्यामाह। सर्वदेशेति ॥

न द्वितीयः, विरुद्धधर्माध्यासेनाप्यभेदे भेदव्यवहारस्य(८) निर्निमित्त(क)त्वप्रसङ्गात्। अनैकान्तिकश्च

दीधितिः।

निर्निमित्तकत्वस्य निर्विषयत्वस्य(९), प्रसङ्गात्, क्वचिदपि

(१) करोतीत्यस्य—पाठः। (२) तत्तत्सहकारिलाभ एव—पाठः।
(३) स्वकारणदोषादिति—पुण० पु० पा०। (४) स्यात्, किमसामर्थ्यमेव—पुण० पु० पा०।
(५) आद्ये त्वाह—पुण० पु० पा०। (६) अन्त्ये त्वाह—पुण० पु० पा०।
(७) कालभेदेनापि—पाठः। (८) व्यवहारस्यापि—पाठः।
(९) व्यवजिहीर्षादेर्निमित्तान्तरस्य सम्भवादाह। निर्विषयत्वस्येति।

हेतुः कालतोऽपि न भेदं साधयेत्।

दीधितिः।

भेदस्यासिद्धत्वात्(१)। अनैकान्तिक इति भेदप्रसिद्धिमभ्युपेत्य। तदप्रसिद्धौ तु व्याप्यत्वासिद्धिर्द्रष्टव्या॥

दीधितिटिप्पणी।

प्रसङ्गादिति(२) हेतुः, क्वचिदिति। भेदस्य, कुत्रापि स्थले, प्रसिद्धिमभ्युपेत्य, उक्तम्॥

कल्पलता।

ननु सामर्थ्यासामर्थ्ये विरुद्धे अप्येकत्र विद्यमाने अपि न धर्मिणं भिन्त(३) इत्याह। न द्वितीय इति। अनैकान्तिकश्चेति। देशभेदेन ताभ्यां विरुद्धाभ्यामपि भेदासाधनादित्यर्थः॥

न तृतीयः, विरोध(४)लक्षणयोगे बाधकसहस्रेणापि विरोधस्यापनेतुमशक्यत्वात्, अयोगे वा तदेव

दीधितिः।

अयोगे वा विरोधलक्षणस्य(५), तदेव विरोधलक्षणमेव,

दीधितिटिप्पणी।

विरोधलक्षणपदस्य निर्विभक्त्यन्तत्वादत्रान्वयो न भवतीत्यत आह। अयोगे वेति। भिन्न उपात्तः स्पष्टबोधार्थम्(६)। उक्तविरोधो

(१) न च व्यतिरेकिणि साध्यप्रसिद्धेरनङ्गत्वादिदमयुक्तमिति वाच्यम्। भेदत्वज्ञानमन्तरेण भेदविशेष्यिकाया अप्यनुमितेरसम्भवात्, तज्ज्ञानस्य च क्वचिदपि भेदप्रसिद्ध्यभावे दुरुपपादत्वमित्यत्रैव ग्रन्थतात्पर्यात्। केचित्तु अप्रसिद्धसाध्यकव्यतिरेकिणमनभ्युपगम्यैवेदमुक्तमित्याहुः।

(२) इति, इत्यत्र, तथा च पूर्वग्रन्थोक्तप्रसङ्गसाधनायोत्तरग्रन्थ इत्यर्थः।

(३) भिन्ते—कलि० मु० पु० पा०। (४) विरोधि—पाठः।

(५) विरोधलक्षणपदस्य समासनिविष्टत्वादनुषङ्गासम्भवादाह। विरोधेति।—गुणानन्दः।

(६) विरोधलक्षणस्य इति न मूलप्रतीकधारणम्, अलीकत्वात्, किन्त्वध्याहृत्य स्पष्टावबोधार्थमुपात्तमिति भावः।

चिन्त्यम् । यद्विधाने यस्य निषेधो यन्निषेधे वा यस्य विधानं(१) तयोरेकत्र धर्मिणि परस्परपरीहारस्थितत-

दीधितिः ।

चिन्त्यम् । यद्विधान इति भावाभावविरोधविवेचनम् । यद्विधाने क्रियमाणे यस्य निषेधः सिद्ध्यति, यन्निषेधे च क्रियमाणे यद्विधानं सिद्ध्यति(२) । यद्विधानं(३) यन्निषेधो यन्निषेधो यद्विधानमिति तु फलितार्थः । केचित्तु विधाननिषेधौ ज्ञानाज्ञाने, तथा च यज्ज्ञाने यदज्ञानं(४) यदज्ञान एव यज्ज्ञानमित्यर्थात्(५) गोत्वाश्वत्वादि(६)साधारण्यमित्याहुः(७)।तयोः(८) परस्परपरीहा-

दीधितिटिप्पणी ।

गोत्वाश्वत्वयोरव्यापकः, गोत्वविधानेऽश्वत्वनिषेधस्याविधाने जातेः समव्याप्त्यभावात् ? । अत इदं भावाभावमात्रे विरोधलक्षणमाह । यद्विधाने इत्यादि । यथाश्रुतस्य भावाभावमात्रविरोधलक्षणं भावत्वाभावत्वादिकेऽतिव्याप्तमत आह । यद्विधाने इत्यादि । तथा च यद्विधाने क्रियमाणे यन्निषिध्यत इत्यर्थः । एतच्च न भावत्वाभावत्वयोः, भावत्वविधाने क्रियमाणेऽभावत्वनिषेधस्य सिद्ध्यभावात्, अभावत्वनिषेधे क्रियमाणे भावत्वविधानस्य सिद्ध्यभावात्, भावत्वाभावत्वयोर्भेदात् । लाघवादाह । यद्विधानमिति । अत्र यद्यप्येकदलमेव प्रकृतसम्पादकम्, तथाप्युक्तस्थले उभयस्योक्तत्वात्तथा लिखनम । भावयोर्विरोधस्यापि एतल्लक्षणसङ्ग्राह्यत्वमाह । केचित्त्विति । एकधर्मि-

(१) यन्निषेधे च यद्विधानं—पुण० पु० पा० ।

(२) यद्विधाने क्रियमाणे, यस्मिन् यत्र ज्ञायमाने, सिध्यति, ज्ञायते । यज्ज्ञानं यन्निषेधज्ञानमिति यावत् । एवमग्रेऽपि ।—गुणानन्दः ।

(३) उभयत्र ज्ञानमपास्य लाघवादाह । यद्विधानमिति ।—गुणानन्दः ।

(४) यदज्ञाने यज्ज्ञानं—कलि० मु० पु० पा० । (५) मित्यर्थे—पुण० पु० पा० ।

(६) गोत्वाश्वत्वादीति । एतच्च तदभावव्याप्यत्वादिज्ञानदशायाम् ।—गुणानन्दः ।

(७) एवं सति भ्रमात्मकावच्छेदकधर्मदर्शनविषये पाषाणमयत्वादावपि वन्ह्यादिविरोधिता-प्रसङ्गोऽस्वारुचिबीजम् ।

(८) तयोरेकत्र परस्परपरीहारस्थिततया विरोध इति मूले एकत्र परस्परपरिहारेणावस्थितत्वादृशावस्थित्या विरोधस्य च कथनस्यायुक्तत्वायोजनया लभ्यमर्थं प्रकाशयितुं क्रियापदादिपूरणेन योजनामाह, तयोरित्यादिना । एकधर्मिणीति एकत्रेत्यस्य विवरणम् ।

या विरोधः(१), स चेह नास्ति, तद्देशकार्यकारित्वं (हि) तद्देशकार्याकारित्वेन विरुद्धम्, तद्विधौ तस्यैव(२) नियमेन निषेधात्, न पुनर्देशान्तरे तत्कार्याकारित्वेन, तस्यानिषेधात, न ह्यन्यत्र तदकरणमतत्करणं वा तत्र तत्करणस्याभावोऽपि तु तत्र तदकरणमिति चेत्(३)। इ-

दीधितिः।

रस्थिततया एकधर्मिणि विरोधः सहानवस्थानं(४) सिद्ध्यती- ति। तद्विधौ तद्देशकार्य(५)कारित्वविधौ। तस्यैव तद्देशकार्या- कारित्वस्यैव। तद्विधौ(६), तस्यानिषेधात्, तस्य देशान्तरे तत्का- र्या(७)कारित्वस्यानिषेधात्। अतत्करणम् कार्यान्तरकरणम्, दृष्टान्तार्थं(८) चेदम्। अभाव इति। अभाव इति(९) व्य-

दीधितिटिप्पणी।

णीत्यस्य स्थितेत्यनेनान्वयेऽसङ्गतं स्यादतोऽस्वरसात्, तयोरिति। सिद्ध्यतीत्यन्तेन वाक्यसमापनं च बोध्यम्। अन्यथा विरोध इत्यन्त- स्य नास्तिक्रियान्वयेऽन्विष्ट विरोधपरामर्शकतत्पदवैयर्थ्यप्रसङ्गात्। पूरयित्वा शङ्कि दर्शयति। तद्विधावित्यादि। इदानीमेतदन्तर्गतस्या- निषेधादित्यस्य व्याख्यामाह। तस्येति। अतत्करणमित्यस्य तत्करणा- भावार्थकत्वे पूर्वोक्ताभेदः स्यादत आह। कार्यान्तरेति। प्रकृतानुप- योगमा(शङ्क्य)ह। दृष्टान्तार्थमिति। ननु तयोः स्थितौ कथं विरुद्ध-

(१) परिहारास्थितिकतया विरोधः--पुरा० पु० पा०। परीहारावस्थितयोर्विरोधः—पाठः।

(२) तस्य--कालि० मु० पु० पा०। (३) विरोधलक्षणयोगसमर्थकत्वेनाभावत्वमुपात्तम्।

(४) तदभावव्याप्यत्वरूपविरोधस्याकाशाद्यव्यापकत्वादाह। सहानवस्थानमिति।

(५) तद्देशकार्येत्यत्र कार्यपदं तत्तत्कार्यलाभाय, अत एव तेषामपि प्रत्येकमिति प्रागुक्तम्। —गुणानन्दः। (६) इदं पूर्वमूलादनुवर्तितम्। (७) देशान्तरकार्या—कालि० मु० पु० पा०।

(८) कार्यान्तरकरणस्य तदभावरूपत्वापसक्तेराह। दृष्टान्तार्थमिति।—गुणानन्दः।

(९) दृष्टान्तार्थं चेदम्। अभाव इति।—कलि० मु० पु० पा०।

न्त । एवम्भूतविरोधलक्षणव्यावृत्तिर्भिन्नकालशक्त्यशक्त्योरपीत्युक्तप्रायम्, तत्प्रतिसन्दधीथाः । तस्मात् प्रसङ्गतद्विपर्यय(१)स्थितावपि असिद्धो विरुद्धधर्माध्यासः(२) ।

दीधितिः ।

वह्नियत इत्यर्थः । अतो नोत्तरोद्देश्य(३)विधेयावैशिष्ट्यम्(४) । उपसंहरति । तस्मादिति । देशभेदेनेव कालभेदेनापि साम-

दीधितिटिप्पणी ।

धर्माध्यासोऽसिद्धः, तयोरेव तत्साधकत्वादत आह । देशभेदेनेति ।

---

(१) प्रसङ्गविपर्यय—पाठः ।

(२) अत्र रत्नकीर्तिः, 'न वयं परिभाषामात्रादेकत्र कार्ये देशभेदादविरुद्धे शक्त्यशक्ती ब्रूमः; किन्तु विरोधाभावात्, तद्देशकार्यकारित्वं हि तद्देशकार्याकारित्वेन विरुद्धम्, न पुनर्देशान्तरे कार्याकारित्वेनान्यकार्यकारित्वेन वा । यद्येवं, तत्कालकार्यकारित्वं तत्कालकार्याकारित्वेन विरुद्धम्, न पुनः कालान्तरे तत्कार्याकारित्वेन कार्यान्तरकारित्वेन वा, तत् कथं कालभेदेपि विरोध इति चेत्, उच्यते । द्वयोर्हि धर्मिणोरेकत्रानवस्थितिनियमः परस्परपरिहारस्थितिलक्षणो विरोधः, स च साक्षात्परस्परप्रत्यनीकतया भावाभाववद्वा भवेत्, एकस्य वा नियमेन प्रमाणान्तरेण बाधनान्नित्यत्वसत्त्ववद्वा भवेदिति न कश्चिदर्थभेदः, तदत्रैकधर्मिणि तत्कालकार्यकारित्वाधारे कालान्तरे तत्कार्याकारित्वस्यान्यकार्यकारित्वस्य वा नियमेन प्रमाणान्तरेण बाधनाद्विरोधः । तथाहि, यत्रैव धर्मिणि तत्कालकार्यकारित्वमुपलब्धं तत्रैव कालान्तरे तत्कार्याकारित्वमन्यकार्यकारित्वं वा न क्षणमप्युपसंहर्तुं शक्यते येनानयोरविरोधः स्यात्, क्षणान्तरे कथितप्रसङ्गविपर्ययहेतुभ्यामवश्यम्भाविना धर्मिभेदप्रसाधनात् । न च प्रत्यभिज्ञानादेकत्वसिद्धिः, तत्पौरुषस्य लूनपुनर्जातकेशनखादावप्युपलम्भतो निर्दलनात्, लक्षणभेदस्य च दर्शयितुमशक्यत्वात् । न चैवं समानकालकार्याणां देशभेदेपि धर्मिभेदो युक्तः, भेदसाधकप्रमाणाभावात्, इन्द्रियप्रत्यक्षेण निरस्तविभ्रमाशङ्केनाभेदप्रसाधनाच्च, इति न कालभेदेपि शक्त्यशक्त्योर्विरोधः स्वसमयमात्रादपहस्तयितुं शक्यः, समयप्रमाणयोरप्रवृत्तेः—'इति स्वसिद्धान्तरक्षागृहीतदीक्षः पक्षमुत्प्रैक्षत । तच्च बाधकाभावे प्रत्यभिज्ञाया अप्यभेदसाधकत्वस्य पूर्वमुक्तत्वात्, निरासिष्यमाणत्वाच्च प्रत्यभिज्ञाप्रामाण्यबाधकानां, तदतद्देशकार्यकारित्वाकारित्वयोः तदतत्कालकार्यकारित्वाकारित्वयोश्च वैलक्षण्यानुपपत्तौ सिद्धायां न निरवद्यतया विद्योतते, सान्दिग्धाभ्यां प्रसङ्गतद्विपर्ययाभ्यां च तस्यैव भेदव्यवस्थापनवैयात्यं पुनरधिकं मूर्धानमधिरोहतीति विपश्चितो विचिन्वन्तु ।

(३) नोत्तरस्य उद्देश—कालि० मु० पु० पा० ।

(४) उत्तरत्र, तत्र तदकरणमित्यत्र ग्रहे । उद्देश्यविधेययोः, उद्देश्यतावच्छेदकविधेयतावच्छेदकयोः। अवैशिष्ट्यम्, अभेदः ।--गुणानन्दः ।

दीधितिः ।

ध्यासामर्थ्ययोः करणाकरणयोश्चाभ्युपगमे(१) विरुद्धधर्मसंसर्गोऽसिद्ध इत्यर्थः ॥

नन्वेकदेशे समर्थस्य देशान्तरे किमिदमसामर्थ्यं यद्विरुध्यते(२), किं सामर्थ्याभावविशिष्टस्य देशान्तरे (तत्कार्याकारित्वस्यानिषेधात्) सत्त्वम्, देशान्तरावच्छेदेन तस्य सामर्थ्याभाववैशिष्ट्यम्(३), किं वा सामर्थ्यविशिष्टस्य(४) (तस्य) तन्निष्ठसामर्थ्यस्य वा देशान्तरेऽभावः । नाद्यं(५) द्वयम्, अनभ्युपगमात्(६)। नेतरत्(७), अविरोधात् । एतेनाकरणं व्याख्यातम् । न चैकदेशकालसतो देशान्तरे कालान्तरे वा(८) कथमसत्त्वमिति वाच्यम् । तत्रासत्त्वं हि तद्वृत्तित्वाभावः(९), तन्निष्ठाभावप्रतियोगित्वं वा, न चेदमन्यत्र सत्त्वेन विरुध्यते, अतद्विरहत्वात्, अतदाक्षेपकत्वाच्चेति(१०) । मैवम् । एवमपि नैमित्तिकसुखादिसम-

दीधितिटिप्पणी ।

अभ्युपगम इति । तथा चानयोरभ्युपगमे कथं विरुद्धधर्माध्यास इति भावः ॥

अनभ्युपगमात् देशान्तरस्थबीजादेर्देशान्तरेऽनभ्युपगमात् । एतेनाकरणमिति । एकदेशकारकस्य किमिदं देशान्तरेऽकरणमित्यादिरूपमित्यर्थः । इदानीं सत्त्वासत्त्व(११)रूपविरुद्धधर्माध्यासमाशङ्क्य निषेधति । न चेति । एकेति कालेऽप्यन्वयि । अतदाक्षेपकत्वा(त् तदाक्षेपकत्वा)भावात् । मैवमिति । आत्म(१२)निष्ठसुखादिजनकघटादि-

(१) अभ्युपगम इत्यन्तं प्रसङ्गविपर्ययस्थितावपीत्यस्यार्थकथनम् । एकत्रेत्यादिः ।—गुणानन्दः ।

(२) यद्विरुध्येत—पुण० पु० पा० ।
(३) वैशिष्ट्यं वा—पुण० पु० पा० ।

(४) विशेषितस्य—पुण० पु० पा० ।
(५) नाद्यः—कलि० मु० पु० पा० ।

(६) क्षणिकपरमाण्वात्मकस्य तस्य देशान्तरवृत्तित्वस्यासम्भवात् तदसम्बद्धदेशस्य तन्निष्ठाभावाधिकरणतावच्छेदकत्वासम्भवाच्चेति भावः ।—गुणानन्दः ।

(७) न चेतरः—कलि० मु० पु० पा० ।
(८) कालान्तरे च—पुण० पु० पा० ।

(९) तद्वृत्त्यभावः—कलि० मु० पु० पा० । (१०) तद्विरहाक्षेपकान्यत्वाच्चेत्यर्थः ।—गुणानन्दः ।

(११) इदानीं साध्यसत्त्व-पा० २ पु० । इदानीं साध्यासत्त्वयु-इत्यादर्शपुस्तके पाठः ।

(१२) मैवमिति । निष्ठ-पा० २ पु० ।

दीधितिः ।

र्थस्य रूपादेरुपादेयकार्यदेशे(१) सुखादिकारित्वं स्यात्, सामर्थ्याविशेषात्(२), असामर्थ्ये च विरुद्धधर्माध्यासाद्भेदापत्तिः । यदि च सामर्थ्याविशेषेऽपि स्वभावादेव प्रतिनियतदेशकार्यकारित्वम्(३), तदा तथैव प्रतिनियतकालकार्यकारित्वमस्त्वित्युक्तत्वात्(४) । अभिहितं च(५) देशभेदावच्छेदेनैकस्य कालस्येव कालभेदावच्छेदेनैकस्यापि देशस्य करणाकरणादिक(६)मविरुद्धमिति ॥

दीधितिटिप्पणी ।

रूपादेः स्वजन्यक्षणिकापररूपादिदेशे तत्रैव घटादौ सुखादिजनकता स्यादिति भावः । न तु स्वदेश इत्येवास्त्विति वाच्यम् । नैमित्तिकदेशस्य स्वदेशत्वात्, एवं च स्वाधिकरणदेशयोर्भेददर्शनार्थमेव (उपादेय)नैमित्तिकपदयोरुपादानमिति बोध्यम् । फक्किका तु पूर्वं स्वाधिकरणस्वानधिकरणदेशानादरे कृता(७)? । विरुद्धधर्मेति । सामर्थ्याभावविशिष्टस्य देशान्तरे सत्त्वरूपमित्यर्थः ॥

कल्पलता ।

ननु सामर्थ्यासामर्थ्ये विरुद्धे एव न भवत इत्यत आह(८) । न तृतीय इति । विरोधेति । परस्परविरहात्मनोः परस्परविरहव्याप्ययोर्वा विरोध(९)श्रौव्यमित्यर्थः । नन्वेकदेशावच्छेदेन कारित्वाकारित्वे

(१) उपादेयं कार्यं रूपादि रूपान्तरम्, तादृशि देश इत्यर्थः ।—गुणानन्दः ।

(२) तादृशसुखादिसामर्थ्यस्य तद्देश इव स्वोपादेयकार्यदेशेऽप्याविशेषात् ।—गुणानन्दः ।

(३) प्रतिनियतदेशः सुखादेरात्मा, स चातिरिक्तो न वेत्यन्यदेतत् ।—गुणानन्दः ।

(४) तथैव, स्वभावादेव । प्रतिनियतकालः, सहकारिसमवधानोत्तरकालः ।—गुणानन्दः ।

(५) ननु मास्तु तद्देशावच्छेदेन सामर्थ्याभाव इव तत्कालावच्छेदेन सामर्थ्याभावः, तत्कालावच्छेदेन कारित्वाभावेनैव समं विरोधोऽस्त्वित्याशङ्क्याह । अभिहितमिति ।—गुणानन्दः ।

(६) करणाकरणादीति । आदिपदात् सामर्थ्यासामर्थ्यपरिग्रहः ।—गुणानन्दः ।

(७) कृतम्-इत्यादर्शपुस्तके पाठः ।

(८) इत्याह—कलि० मु० पु० पा० । (९) व्याप्ययोर्विरोधे—पुण० पु० पा० ।

कल्पलता।

विरोध(१)लक्षणाक्रान्ते, न तु देशभेदेनापीत्याह(२)। अयोगे वेति। तदेव साम्यापादनाय परद्वारा चिन्तयति। यद्विधान इति(३)। तद्देश(कार्य)कारित्वमिति। यदि तद्देशे(४) करोति तत्रैव न कुर्यात्, तदा विरोधः स्यादित्यर्थः। देशान्तरे तत्कार्याकारित्वेनेत्यत्र(५) तद्देशकारित्वं विरुद्धमित्यनुषञ्जनीयम्। तस्येति। देशान्तरे तदकरण(६)स्यानिषेधादित्यर्थः। न हीति। अन्यत्र यत् तदकरणं(७) तद्विरुद्धकार्यकरणं वा, न तदेव (तत्र) तत्करणस्याभावो येन विरोधः स्यात्, अपि तु तत्रैव देशे तदानीमेव तदकरणम्, तत्करणस्याभाव इत्यर्थः। साम्यमापादयति। इहैवमिति। (तदा तदकरणं) तदा(८) तत्करणस्य विरोधि, न त्वन्यदा(पि) तदकरणं, येन विरोधः स्यादित्युक्तमित्यर्थः। पूर्वं प्रसङ्गतद्विपर्ययोरेवासिद्धिरुक्ता, सम्प्रति तत्सिद्धावपि विरुद्धधर्माध्यासाभावमुपसंहरति। तस्मादिति॥

दीधितिः।

प्रसङ्ग(९)विपर्ययस्थितावपीत्यपिना सूचितं प्रसङ्गवि-

दीधितिटिप्पणी।

ननु तस्मादित्यादिना उक्तप्रसङ्गविपर्ययोरेवापिना लाभः(१०) स्थाप्यते, कथमन्यथाविस्यत आह। सूचितमित्यादि। तथा च सामान्या-

---

(१) विरुद्ध—पाठः।

(२) भेदेनापीति—पुरा० पु० पा०। (३) चिन्तयति—कलि० मु० पु० पा०।

(४) यद्देशे-कलि० मु० पु० पा०। (५) देशान्तरे कार्यकारित्वेनेत्यत्र-कलि० मु० पु० पा०।

(६) तदकरणास्य-कलि० मु० पु० पा०। (७) तत्करणं-कलि० मु० पु० पा०।

(८) तदकरणं-कलि० मु० पु० पा०।

(९) पूर्वोक्तप्रसङ्गविपर्यययोरपिनाऽनुपपादनादन्यथाऽवतारयति। प्रसङ्गेति।—मुद्राबन्धः।

(१०) रेवापेक्षा कृत-इत्यादर्शपुस्तके पाठः। रेवापेक्षालाभः-पा० २ पु०।

ननु यदेकदा यत् करोति तद्यावत्सत्त्वं तत् करोत्येव, यथा कश्चिच्छब्दः(१) शब्दान्तरमिति प्रसङ्गो-

दीधितिः ।

पर्ययसामान्यासम्भवमसहमानोऽन्तरा प्रसङ्गविपर्ययान्तरमाशङ्कते । नन्विति । कश्चित् अनन्त्यः । स्वमतेनेदम् । अन्त्यशब्दक्षणिकतामते तु यथान्त्यः (शब्दः) स्वनाशमिति(२) द्रष्टव्यम् । यावत्सत्त्वमित्यत्र कार्यप्रागभावावच्छिन्नत्वेन सत्त्वं विशेषणीयमित्यपि कश्चित्(३) । यत्तु कश्चिदित्यनेनाविनश्यदवस्थोऽपि

दीधितिटिप्पणी ।

सम्भवस्योक्तत्वात् तद्भङ्गाय यत्किञ्चित्सामान्यप्रदर्शनं कृतमिति भावः । अपिना चैतदर्थोऽवगम्यते, यदि च तत्स्थातिरङ्गीक्रियते तदापीत्यर्थः, अतः सूचितमित्युक्तम् । अनन्त्य इति । अन्त्यशब्देन शब्दान्तराकरणात् तस्य दृष्टान्तत्वासम्भव इतीदमुक्तम् । नन्वनन्त्यशब्दादि कथं यावत्सत्त्वं शब्दान्तरं करोति, विनश्यदवस्थकालेऽपराजननात्, (अ)जनने वाऽत्र कः शब्दस्तत्रापि यावत्सत्त्वं जनयतीति साध्यवैकल्यम्, अत आह । स्वमतेनेदमिति । स्वः(४) बौद्धः । इदम्, दृष्टान्तः(५) । तन्मते सर्वस्य क्षणिकत्वाद्यावत्सत्त्वं शब्दस्य शब्दजनकत्वमिति । नन्वेवमुभयसिद्धदृष्टान्तालाभ इत्यत स्वयं तदा(ह । अ)न्त्यशब्देति । तुः पुनरर्थे, तथा चान्त्यशब्दक्षणिकतावादिनैयायिकैकदेशिनमादायान्त्यशब्दे उभयवादिसिद्धसाध्यकत्वमिति भावः । अनन्त्यशब्दे नैयायिकमतेपि साध्यमस्तीति वादिनो मतमाह । यावदिति । अविनश्यदवस्थोपीति । अपिनाऽनन्त्योपीति सूचितम् । अन्त्यशब्दस्य द्विक्षणस्थायि(ता)वा-

(१) अविनश्यदवस्थः—इत्यधिकं शङ्करमिश्रकृतटीकानुसारेणेति क०लि०मु०पु० टिप्पण्याम्

(२) स्वनाशमिति । शब्दान्तरमित्यस्य कयाचिद्व्युत्पत्त्या ध्वंसपरत्वमिति भावः ।—गुणानन्दः ।

(३) कश्चिदित्यनेनोक्तविवक्षायामपि द्वितीयक्षणावच्छिन्नध्वंसजनकावारणमस्वरसः ।

(४) स्वम्-इत्यादर्शपुस्तके पाठः ।

(५) दृष्टान्तम्-इत्यादर्शपुस्तके २ पुस्तके च पाठः ।

ऽस्तु, विपर्ययस्तु यदेकदा यन्न करोति तत् सर्वदैव तन्न करोति, यथा शिला(शकलमङ्कुरम्), न

दीधितिः।

बोध्य इति कश्चित्, तन्न, स्वतोऽसिद्धेः(१), यत्किञ्चिद्रूपविशिष्टस्य यावत्सत्त्वकरणेनैव साध्यसत्त्वे च सहकारिविशिष्टस्य तथात्वादिष्टापादनाच्च। इति अनेन प्रकारेण, प्रसङ्गो(२)ऽस्तु, तेन कुशूलस्थबीजस्य पराभ्युपगतमेकदाङ्कुरकारित्वरूपहेतुमत्त्वं(३) लभ्यते(४)। एकदा कदाचित्(५)। भवतश्च(६) कदा-

दीधितिटिप्पणी।

विमते आद्येनापि वारयितुमशक्यत्वादिदम्। स्वतः बौद्धमते, तन्मते सर्वस्य विनश्यदवस्थत्वात्। उभयमते दोषमाह। यत्किञ्चिदिति। कार्याभावेत्यादियादृशतादृशविशेषणेन भवता यदि साध्यरक्षणं क्रियते, तदा मयाप्यत्रैवानुमाने सहकारीत्यादियत्किञ्चिद्विशेषणदानेन साध्यरक्षणं करिष्यत इति व्यावृत्तिः स्यादित्यर्थः। एकदा कारित्वमभ्युपयत कुशूलस्थबीजे परैरित्यदर्शनादेतन्मात्रस्य प्रसङ्गपदा(७)वाच्यत्वमत आह। इतीति। इदमेवाह। अनेनेति। केचित्तु प्रसङ्गस्यापवादतर्करूपस्य वाचकं स्यादित्यादिपदमेव, स चात्र नास्तीत्यत आह। इतीति। तथा चानेन व्याप्तेः प्रदर्शनेनेत्यर्थः। तेनेत्यादि एकदेशकीर्तनपरमिति वदन्ति। एकदेशरूपप्रसङ्गहेतोर्लिखनात् एकदा न करोतीत्येकदाशब्देन विपर्ययहेतुकथनं सङ्गतम्। प्र-

(१) तन्मात्रस्य क्षणिकत्वेन अविनश्यदवस्थकारणत्वासिद्धेरिति भावः।—गुणानन्दः।

(२) प्रयोगो—कालि० मु० पु० पा०।

(३) हेतुमत्त्वम्, आपादकस्याभ्युपगतत्वम्।—गुणानन्दः।

(४) उपनयोऽप्युक्त इति लभ्यत इति भावः।

(५) एकपदस्याभेदार्थकत्वे तत्प्रतियोगिनोऽलाभान्न निराकाङ्क्षा प्रतिपत्तिरत आह। कदाचिदिति। देशावच्छेदेन कारित्वाभावव्यावृत्तये चैतत्कालावच्छेदेन तल्लाभाय चैतत्।—गुणानन्दः।

(६) प्रसङ्गे येन यत्साध्यते तस्याभावस्तदभावेन यदि साध्यते तदा विपर्ययव्यवहारः, आपादकं च एकदा तत्कारित्वं तत्कारित्वमात्रं वा, आपाद्यं च यावत्सत्त्वं तत्कारित्वम्, तथा चापादकाभावापाद्याभावयोः साध्यसाधनरूपत्वं वाच्यम्, तत्कथमित्याशङ्क्याह। भवतश्चेति।—गुणानन्दः। भवतः—कालि० मु० पु० पा०। (७) पद-इत्यादर्शपुस्तके २ पुस्तके च पाठः।

करोति चैकदा कुशूलस्थं बीजमङ्कुरमिति चेत्, तदे-
तज्जात्यभिप्रायेण वा स्यात्, व्यक्त्यभिप्रायेण वा (स्यात्)।

दीधितिः ।

चिदकरणसार्वदिकाकरणे(१) यावत्सत्त्वकरणकदाचित्करणव्यतिरेकाविति न विपर्ययासङ्गतिः(२) ॥

दीधितिटिप्पणी ।

सङ्गीयहेतोरितरस्य च सन्दिग्धासिद्धत्वादत आह । कदाचिदिति । केचित्तु नैयायिकमते कुशूलस्थबीजादेरेकदा करणाभाव एवासिद्धः, तदधिकरणस्थूलकालस्यैकत्वादत आह । कदाचिदिति । एतत्पदस्य(३) तत्क्षणस्यापि वाचकत्वावधारणादिति । प्रसङ्गसाध्यस्यैव विपर्ययहेतुकरणमुचितमत आह । भवतश्चेति । इदं च क्रियापदम् ॥

कल्पलता ।

सत्त्वक्षणिकत्वयोर्व्याप्तिसाधनाय प्रसङ्गविपर्ययान्तरमवतारयति । नन्विति । (यथा) कश्चिच्छब्द (इति ।)(४) अविनश्यदवस्थोऽनन्त्य(५) इत्यर्थः । अन्यथा द्वितीयक्षणेऽकरणाद्यावत्सत्त्वं(६) करणानुपपत्तेः । स्वमतेनैव वा दृष्टान्तः । विपर्यय इति(७)। यद्यावत्सत्त्वं यन्न करोति तदेकदापि तन्न(८) करोति, यथा शिलाशकलम्, न करोति च(९) कुशूलस्थं(१०) बीजं यावत्सत्त्वमङ्कुरम्, अत एकदापि न तत्(११)

(१) कदाचिदकरणसर्वदाऽकरणे—पुण० पु० पा० ।

(२) न व्यतिरेकासङ्गतिः—पुण० पु० पा० ।

(३) एतत्पद ए-पा० २ पु० । (४) नन्विति । शब्द इति । कश्चिदिति ।-पा० २ पु० ।

(५) नन्त-कलि० मु० पु० पा० । (६) क्षणेऽकरणे यावत्सत्त्वं-कलि० मु० पु० पा० ।

(७) दृष्टान्ताविपर्यय इति-पुण० पु० पा० । (८) तदेकदापि न-कलि० मु० पु० पा० ।

(९) न करोति-कलि० मु० पु० पा० । (१०) कुशूलस्थं-कलि० मु० पु० पा० ।

(११) मङ्कुरम्, स च कदापि तन्न-कलि० मु० पु० पा० । मङ्कुरम्, स च एकदापि तन्न—पा० २ पु० ।

कल्पलता ।

कुर्यादिति विपर्यये दर्शनीये एकदाऽकरणस्यापि यावत्सत्त्वाकरणरूपतया व्यत्यासेनैव (विपर्ययो) दर्शित इत्यदोषः। तदंतादिति। प्रसङ्गतद्विपर्ययोपदर्शनमित्यर्थः। जातीति। यज्जातीयमेकदा न करोति तज्जातीयं यावत्सत्त्वं न करोतीति वा, या व्यक्तिरेकदा न करोति सा यावत्सत्त्वं न करोतीति वा विवक्षितमित्यर्थः॥

दीधितिः ।

यज्जातीयमेकदा(१) यत् करोति तज्जातीयं किञ्चि(२)द्यावत्सत्त्वं तत् करोति, यज्जातीयं किञ्चिदपि यावत्सत्त्वं यन्न करोति तज्जातीयं किमपि कदाचिदपि तन्न करोतीति यदि विवक्षितम्, तदा आद्ये कस्यचिद्बीजस्य यावत्सत्त्वमङ्कुरकारित्वापत्तावपीतरेषामेकदाङ्कुरकारिणां कालान्तरे तदकरणमविरुद्धम्(३)। द्वितीये च स्वतो(४) हेत्वसिद्धिः, समर्थबीजक्षणस्य यावत्सत्त्वमङ्कुरकारित्वोपगमात्(५), बाधश्च(६), बीजजातीयस्यैव सहकारिसम्पन्नस्याङ्कुरकारित्वात्। अथ यज्जातीयमेकदा यत्करोति तज्जातीयं सर्वं यावत्सत्त्वं तत् करोति, यज्जातीयं किञ्चिद्यावत्सत्त्वं यन्न करोति तज्जातीयं किमपि

दीधितिटिप्पणी ।

जात्यभिप्रायेण द्विविधप्रसङ्गविपर्ययौ सम्भवतः, तत्र मूलोक्तदोष एकविषय एव सङ्गच्छते, अतोऽपरत्र को दोषः स्यात्, अतस्तदप्युट्टङ्क्य दूषयति। यज्जातीयमिति। किञ्चिदिति। न च विपर्यये

(१) एकदेति सम्पातायातं यावत्सत्त्वकारित्वस्य व्याप्यताभ्रमनिराकरणाय।—गुणानन्दः।

(२) किञ्चिदिति तज्जातीयमात्रस्य यावत्सत्त्वकारित्वभ्रमनिराकरणाय।—गुणानन्दः।

(३) तथा च न सत्त्वेन क्षणिकत्वं, तत्रैव व्यभिचारादिति भावः।—गुणानन्दः।

(४) च ततो—कलि० मु० पु० पा०।

(५) कुर्वद्रूपबीजव्यक्तेस्त्वया यावत्सत्त्वमङ्कुरकारित्वोपगमादित्यर्थः।—गुणानन्दः।

(६) बाधकाभावे—पाठः।

प्रथमे द्वयमप्यनैकान्तिकम्, अनियमदर्शनात् । द्वितीये द्वयमप्यन्यथासिद्धम्, एकान्तासामर्थ्यप्रयुक्तत्वादत्यन्ताकरणस्य, सामर्थ्ये सति सहकारिसन्निधिप्रयुक्तत्वात् करणनियमस्य ।

दीधितिः ।

कदापि तन्न करोतीति, तत्राह । द्वयमपीति । द्वयम् प्रसङ्गस्य विपर्ययस्य च साधनम् । अनियमेति । अङ्कुरकारिणामङ्कुराकारिणां च बीजजातीयानां भवताप्यङ्गीकारादिति भावः । अन्यथासिद्धम् व्याप्यत्वासिद्धम् । एकान्तेति । सामर्थ्यम्(१) स्वरूपयोग्यता सहकारियोग्यता च, अत्यन्ताकरणम् यावत्सत्त्वमकरणम्, तथा च शिलादेः सहकारिसहितस्याप्यकरणं स्वरूपायोग्यत्वात्, स्वरूपयोग्यस्य च बीजादेरकरणं सहकारिवैकल्यात्, तस्य चात्यन्तिकत्वकादाचित्कत्वाभ्यामकरणस्याप्यात्यन्तिकत्वकादाचित्कत्वे इत्यर्थः ॥

दीधितिटिप्पणी ।

प्रसङ्गसाध्याभावस्यैव हेतुतया उभयत्रैव यज्जातीयं सर्वमित्यादिसर्वात्मनैव(२) कर्तुमुचितमिति वाच्यम् । सर्वपदं विनापि प्रसङ्गीयसाध्याभावप्राप्तौ तत्पदाप्रवेशात् यत्किञ्चित्करणाभावमेव सर्वकरणाभावं ब्रूमः । असामर्थ्यपदस्य करणस्वरूपयोग्यत्वाभावपरत्वे जातविनष्टादेरत्यन्ताकरणस्य तत्प्रयुक्तत्वाभावाद्व्यभिचारः स्यादतस्तत्रापि तत्प्रयुक्तत्वं रक्षयति । सामर्थ्यमिति । स्वरूपयोग्यतेत्यादि । तथा च उभयाभावो विवक्षितः । उभयाभावं दर्शयति । शिलादेरिति । एक......माह ? । तस्य चेति ॥

---

(१) एकान्तासामर्थ्येत्यत्र सामर्थ्यपदं स्वरूपयोग्यतापरं सहकारियोग्यतापरं च, सामर्थ्ये सतीत्यत्र तु स्वरूपयोग्यतापरमिति भावः ।—गुणानन्दः ।

(२) सर्वेष्विव- इत्यादर्शपुस्तके पाठः । सर्वबाह्यमेव—पा० २ पु० ।

कल्पलता।

अनियमेति। बीजजातीय एव करणाकरणयोर्द्‍शनान्नेयं व्याप्तिरित्यर्थः। इयमपीति। प्रसङ्गस्तद्विपर्ययश्चेत्यर्थः। अन्यथासिद्धिमाह। एकान्तेति। शिलाशकलादावेकदाऽकारित्वे सत्यन्यदाप्यकारित्वं(१) स्वरूपा(२)योग्यत्वप्रयुक्तम्(३), स्वरूपयोग्यस्य त्वेकदाऽकरणं(४) सहकारिवैकल्यप्रयुक्तं यावत्सत्त्वं च करणं सहकारिलाभप्रयुक्तमित्यर्थः॥

एतेन यद्यत्करोति तत्तदुत्पन्नमात्रम्, यथा कर्म विभागम्, यदुत्पन्नमात्रं यन्न करोति तन्न कदाचिदपि, यथा शिलाशकलमङ्कुरमिति निरस्तम्। अत्रापि पूर्ववदनेकान्तान्यथासिद्धी दोषा(५)विति।

दीधितिः।

एतेनेत्यादि। उत्पन्नमात्रम्, करोति(६)। तन्न कदाचिदपि, तत् करोति। उदाहरणाभ्यां(७) तदनुरूपावुपनयावपि सूचितौ। पूर्ववदिति। जात्यभिप्रायेऽनेकान्तः, व्यक्त्यभिप्राये चान्यथासिद्धिर्दोष इत्यर्थः(८)॥

दीधितिटिप्पणी।

एकान्तपदस्य च यावत्सत्त्वमलघुत्वादाह। उदाहरणाभ्यामिति। कर्मशिलादिभ्यामित्यर्थः ?॥

(१) शिलादावकारित्वे सत्यन्यदाप्यकारित्वं-पा० २ पु०। शिलाशकलादावेकदाऽकारित्वेन्यदाप्यकारित्वं-पुण० पु० पा०। शिलाशकलादावेकदाकारित्वे सत्यन्यदाप्यकारित्वं-कालि० मु० पु० पा०। (२) स्वरूप-पुण० पु० पा०। (३) योग्यमुक्तम्-पुण० पु० पा०।

(४) स्वरूपयोग्यत्वे एकदाकरणं—कालि० मु० पु० पा०।

(५) न्यथासिद्धिदोषा -पुण० पु० पा०। न्यथासिद्धदोषा-पाठः।

(६) उत्पन्नमात्रमित्यत्र करोतीत्यनुषज्य योजयति। उत्पन्नमात्रमिति।—गुणानन्दः।

(७) न्यूनत्वमाशङ्क्याह। उदाहरणाभ्यामिति। अनुरूपावित्यनेन हेतुतावच्छेदकावच्छिन्नस्य पक्षधर्मतामात्रप्रतिपादकौ तन्मतसिद्धावित्युक्तं भवति।--गुणानन्दः।(८) दोषः—पुण० पु० पा०।

कल्पलता ।

सत्त्वक्षणिकत्वव्याप्तिग्रहानुकूलमेव प्रसङ्गविपर्ययान्तरमाशङ्क्य निराकरोति । एतेनेति । पूर्ववदिति । जात्यभिप्रायेणानैकान्तिकत्वम्, न हि बीजजातीयमुत्पन्नमात्रमेव करोति । या च व्यक्तिरुत्पत्त्यनन्तरमेव करोति तत्र तत्तत्सह(१)कारिलाभस्तन्त्रमित्यभिप्रायेणान्यथासिद्धिरित्यर्थः(२) ॥

नापि तृतीयः, कृतकत्वानित्यत्वादेरपि(३) परस्पराभाववत्तामात्रेण(४) विरोधप्रसङ्गादिति ।

दीधितिः ।

तद्वत्तेति(५) पक्षं दूषयति । नापीति ॥

कल्पलता ।

तद्वत्ता वा दण्डित्वकुण्डलित्ववदिति (यत्) पूर्वं (वि)कल्पितम्, तद्दूषयति (। नापीति । विरोधप्रसङ्गादिति । तथा च तदुभयाध्यासाधिकधर्मिभेदप्रसङ्गादित्यर्थः) ॥

अस्तु तर्हि तस्यैव(६) तेनैव सहकारिणा सह(७) सम्बन्धोऽसम्बन्धश्चेति विरोधः । न । विकल्पानुपपत्तेः ।

दीधितिः ।

वारि(८)बीजादीनां हि(९) सम्बन्धः संयोगोऽभ्युपेयते,

(१) तत्र तदा तेन सह--पुण० पु० पा० ।(२) स्तन्त्रमित्यर्थः-कलि० मु० पु० पा० ।

(३) कृतकत्वानित्यत्वयोरपि—पाठः । (४) मात्रेणैव- कलि० मु० पु० पा० ।

(५) तद्वत्ता वेति—पुण० पु० पा० । (६) तत्रैव-पुण० पु० पा० । तर्हि-पाठः ।

(७) सहकारिणा सह तस्यैव-पाठः । सहकारिणा-कलि० मु० पु० पा० ।

(८) संयोगाव्याप्यवृत्तित्वस्याग्रे व्यवस्थाप्यत्वात्तदनुसारेणाह । वारीति । तन्मतमाह । स चेत्यादि । संयुक्तेति । तेनैव रूपेण तस्य व्याप्यवृत्तित्वोपगमे दोषोऽत आह । अभावोऽपि चेति ।- गुणानन्दः । (९) वारिबीजादीना—कलि० मु० पु० पा० ।

तथाहि, सम्बन्धिनः सम्बन्ध्यन्तरे स्वाभावस्वाभाव्यं वा विरुद्ध्येत(१), अभाव(२)प्रतियोगित्वं वा, तदैवेतिस-

दीधितिः।

स च सम्बन्धिस्वरूपः, निरन्तरोत्पन्न(३)क्षणिकाभ्यां ताभ्यामेव मिथः संयुक्तप्रत्ययादिसम्भवेऽतिरिक्ते मानाभावात्, अभावोऽपि चाधिकरणस्वरूप एव(४), एकत्र च सम्बन्धतदभावोपगमे सम्बन्धात्मकस्य (तस्य) सम्बन्धाभावात्मकत्वं स्यात्, न च स्वं स्वस्याभावो भवितुमर्हतीत्याह । सम्बन्धिन इति । सम्बन्ध्यन्तरे, कदाचिद्सत्त्वे तस्य । अभावेति । नाभावो विद्यते सत इति न्यायादिति भावः । अभावप्रतियोगित्वमिति परत्र

दीधितिटिप्पणी।

स च संयोगः। स्वरूप(त्वे)हेतुमाह । निरन्तरेति । ताभ्याम् सम्बन्धिभ्याम् । अतिरिक्ते संयोगे । एकत्र चेति । तथा चेत्यादिः । एकदण्डे कदाचित् चक्रसम्बन्धः कदाचित्तदभावः स्वीक्रियते, तथा च चक्रसम्बन्धस्वरूपे(५)दण्डे यश्चक्रसम्बन्धाभावः सोपि दण्डस्वरूप एव, तथा च एकस्यैव दण्डस्य चक्रसम्बन्धाभावरूपपरतया…?एतदेवाह मूले, सम्बन्धिन इत्यादि। विरुध्यत इत्यनेन यथाश्रुतमूले(न) सम्बन्ध्यन्तरनिष्ठस्य सम्बन्धिनः स्वाभावस्वाभाव्यमित्यर्थो लभ्यते, तच्चासङ्गतम् , चक्रस्य दण्डनिष्ठस्वा(भाव)स्वाभाव्यस्य ? तन्मतेप्यविरुद्धत्वात्, तेनाप्यधिकरणस्यैवाभावात्मकत्वाङ्गीकारात्, न तु प्रतियोगिन इत्यतः पूरणेन सङ्गमयति। सम्बन्ध्यन्तर इति । स्वपदस्य सम्बन्ध्यन्तरवाचकत्वार्थं तस्येति पूरणम्, तथा च सम्बन्धिनः सम्बन्ध्यन्तरे कदाचित् सम्बन्धात्तस्य सम्बन्ध्यन्तरस्य यः स्वाभावस्तत्स्वाभाव्यं विरुद्ध्यत इत्यर्थः। सम्बन्धिनोऽभावप्रतियोगित्वविरुद्धहेतुत्वेनाभावो विरुद्ध इति ?॥

(१) विरुद्ध्येत्-पुण० पु० पा०। (२) अभावो ध्वंसः प्रागभावश्च।

(३) सम्बन्धिस्वरूपं निरन्तरोत्पन्नम्—पुण० पु० पा०।

(४) स्वरूप मेव—पुण० पु० पा०। (५) स्वरूपयोग्य—इत्यादर्शपुस्तके पाठः।

हितं वा, तत्रैवेतिसहितं वा, उभयसहितं वा, तथैवेति-सहितं वेति ।

दीधितिः ।

सर्वत्रानुषज्यते । तदा स्वकाले(१)। तत्र स्वदेशे । उभयेति । स्वकाल एव स्वदेश एवेति(२) । तथैव स्वकाले स्वदेशे स्वावच्छेदकावच्छेदेनेति(३) ॥

कल्पलता ।

सहकारिसमवधानासमवधानाधीने(४) करणाकरणे इति यत् समाहितं तत्रा(पि विरोध इत्या)ह । अस्तु तर्हीति । सम्बन्धिन इति(५) । सहकारिसमवधानं तावन्न सम्भवति, यत एकस्य(६) सहकारिणः सहकार्यन्तरमभाव(स्व)रूपमेव, न च भावाभावयोः(७) समवधानसम्भावनेत्यर्थः । असमवधाने विरोधमाह । अभावेति । विरुद्धयत इति सम्बध्यते । सहकारिणो यद्यभावः स्यात् तदा तदसमवधानं स्यात्, तदेव तु नास्ति, न हि भावस्याप्यभावप्रतियोगित्वं सम्भाव्यते, विरोधादिति द्वितीयविकल्पार्थः। (भवतु वा भावस्याप्यभावप्रतियोगित्वम्(८), तथापि स्वावच्छिन्न

---

(१) स्वकाले, प्रतियोगिमत्त्वेनाभिमतकाले ।—गुणानन्दः ।

(२) स्वकाल एव स्वदेश इति—२ पु० । स्वाकाल एव स्वदेश इति–कलि० मु० पु० पा० ।

(३) अत्रावच्छेदकत्वद्वयं सप्तमीनिर्देश्य विलक्षणं बोध्यम् ।

(४) सहकारिसमवधानात् समवधानाधीने– कलि० मु० पु० पा० । सहकारिसमवधानासमवधानाभ्यां यत्—पुण० पु० पा० ।

(५) तर्हीति । सहकारिणा सहोत्पादानियमादसम्बन्ध एव नेति भावः । विरोधमूलं विकल्प्य दूषयति । नेति । ससम्बन्धिन इति । सम्बन्धिभूत —पुण० पु० पा० ।

(६) यत्रैकस्य—पुण० पु० पा० । यत एवास्य—पा० २ पु० ।

(७) न चाभावाभावयोः—पुण० पु० पा० । (८) प्यभावः—पुण० पु० पा० ।

कल्पलता।

एव काले स्वाभावः कथं भवेत्, येन विद्यमानेनापि चैत्रेण बीजस्य समवधानं न भवेदिति तृतीयविकल्पार्थः। ननु भवतु विद्यमानस्यापि तत्, कोऽप्यभावोऽस्तु, तथापि यत्रैव प्रतियोगी तत्रैव तदभावो विरुद्ध इति चतुर्थविकल्पार्थः। यत्र काले यत्र देशे यः प्रतियोगी तस्य तत्र तदानीमभावो विरुद्ध इति पञ्चमविकल्पार्थः। यदवच्छेदेन यदा यत्र प्रतियोगी तदवच्छेदेनैव तदैव तस्यैवाभावो विरुद्ध इति षष्ठविकल्पार्थः। सम्बन्धिन इति। सहकारिसमवधानं तावन्न सम्भवति, यत एकस्य सहकारिणः सहकार्यन्तरमभावस्वरूपमेव, न च भावाभावयोः समवधानसम्भावनेत्यर्थः। समवधाने विरोधमाह। अभावेति। विरुद्ध्यत इति सम्बद्ध्यते। सहकारिणो यद्यभावः स्यात् तदा तदसमवधानं स्यात्, तदेव तु नास्ति, न हि भावस्याप्यभावः, विरोधादित्यर्थः।) (१) भवतु वा भावस्याप्यभावस्तथापि यदैव भावस्तदैव तद(२)भावो विरुद्ध इत्याह। तदैवेति। अ(त्रा)भावप्रतियोगित्वं विरुद्ध्यत इत्यनुषङ्गः। एवं परत्रापि। भवतु वा भावसमानकालीनोऽप्यभावः, तथापि यत्रैव भावस्तत्रैव तदभावः कथं स्यात, विरोधादित्याह। तत्रैवेति। कालभेदेनैकदेशत्वसम्भवेऽपि यदा यत्र यत्सत्त्वं(३) तदैव तस्य तत्रासत्त्वं विरुद्धमित्याह। उभय-

(१) कुण्डलीस्थं पाठान्तरं तृतीयादर्शपुस्तकेऽधिकं दृश्यत इति कलि० मु० पुस्तके टिप्पण्या सूचितम्।

(२) भावस्याप्य—कलि० मु० पु० पा०। (३) यदा तत्र तत्सत्त्वं—पुण० पु० पा०।

कल्पलता ।

सहितमिति । येनावच्छेदेन प्रतियोगी(१) तेनैवावच्छेदेन तदैव तत्रैव(२) तदभावो न सम्भवतीत्याह । तथैवेति ॥

न प्रथमः, अनभ्युपगमात् ।

दीधितिः ।

अनभ्युपगमादिति । निरन्तरोत्पाद(३)क्षणिकत्व(४)योरसिद्ध्या संयोगस्य, धर्मिवृत्तित्वानुगत(५)प्रतीत्या चाभावस्यातिरिक्तस्य सिद्धेरिति भावः ॥

दीधितिटिप्पणी ।

मूले, अनभ्युपगमात् । स्वाभावस्वाभाव्यस्येति शेषः । एतदेवोपपादयति । निरन्तरेति । यदि निरन्तरोत्पादः क्षणिकत्वं (च) सिद्धं स्यात् तदा तत्कालीनेनैव संयोगकार्य(६)निर्वाहेऽतिरिक्तसंयोगो न सिद्ध्येत्, न चैवम् । असिद्ध्येति संयोगस्यातिरिक्तत्वे हेतुः । प्रतीत्येत्यभावस्यातिरिक्तत्वे हेतुः ॥

कल्पलता ।

अनभ्युपगमादिति । सम्बन्ध्यन्तरमेव सम्बन्ध्यन्तरस्याभाव इति नाभ्युपगम्यते, अधिकरणस्वभाव(७)भावो न भवतीति(८) निषेध्यत एवेति भावः ॥

(१) प्रतियोगं– कालि० मु० पु० पा० । (२) तत्रैव—कालि० मु० पु० पा० ।
(३) अनन्तरोत्पाद—कालि० मु० पु० पा० । (४) क्षणिकत्वञ्च—पुण० पु० पा० ।
(५) स्वरूपात्मकप्रतियोगित्वादेरिव तेन रूपेण तद्वृत्तित्वादिकमपि स्यादत आह । अनुगतेति । इदमुभयात्मकत्वनिराकरणोपयोगि । अतिरिक्तस्येति । स्वस्य स्वाभावात्मकत्वाविरोधे स्वस्मिन् स्वं नास्तीति प्रत्ययस्यापि दुर्घटत्वमवसेयम् ।—गुणानन्दः ।
(६) संयोगव्यवहार—पा० २ पु० । (७) स्वरूपं चा-पुण० पु० पा० । (८) भावो-पाठः ।

न द्वितीयः, सत्कार्यप्रतिषेधात(१)।

दीधितिः।

प्रागसत एव कार्यस्योत्पत्तेः प्रामाणिकतया त्वयापि सत्कार्यत्वनिषेधादित्याह। सत्कार्येति॥

दीधितिटिप्पणी।

त्वया क्षणिकत्ववादिना॥

कल्पलता।

सत्कार्येति। अभावप्रतियोगित्वं भावस्य नास्तीत्यभ्युपगमे तव साङ्ख्यमतप्रवेशो(ऽप)पसिद्धान्तः क्षणिकत्वसाधनाविरोधोनुभवविरोधश्चेत्यर्थः॥

न तृतीयः, प्राक्प्रध्वंसाभावयोर्भावसमानकालत्वानभ्युपगमात।

दीधितिः।

प्रागित्यादि। संयोगिनि संयोगस्य प्रागभावध्वंसयोः कालभेदेनैव वृत्त्युपगमात्, अत्यन्ताभावस्य चा(२)वच्छेदभेदेन वृत्तौ विरोधाभावादिति भावः॥

दीधितिटिप्पणी।

संयोगिनीति। चक्रसंयोगिनि दण्डे तदैव(३) चक्रसंयोगाभावो विरुध्यते इतीदृशाभावः कः, प्राग्ध्वंसादिः, (स) संयोगादिकाले यद्यङ्गीक्रियते तदा विरोधो दातव्यः, न चैवम्। नाप्यत्यन्ताभावः, तस्याव्याप्यवृत्तितया विरोधाभावादित्यर्थः॥

कल्पलता।

प्रागिति। प्रागभाव(प्र)ध्वंसयोः प्रतियोगिसमानकालत्वानुपपत्तावप्यत्यन्ताभावमादाय सहकार्य-

(१) प्रतिक्षेपात्-पाठः। (२) न्यूनत्वमुद्धरति। अत्यन्ताभावस्य चेति।—गुणानन्दः।
(३) तदैव दण्डे—पा० २ पु०।

कल्पलता ।

समवधानसम्भवात् सहकारिप्रागभाव(प्र)ध्वंसावपि प्रतियोगिभिन्नकालावादाय तथा सम्भवाद्(१)इत्यर्थः ॥

न चतुर्थः, स हि न तावत् स्थितियौगपद्यनियमेन सम्बन्धिनोः, तदसिद्धेः। इत एव(२) तत्सिद्धावितरेतराश्रयत्वम्, नियमसिद्धौ हि विरोधासिद्धि(३)स्तत्सिद्धौ च भेदे सति नियमसिद्धिरिति(४)। न चान्यतस्तत्सि-

दीधितिः ।

स हीति। सः विरोधः(५), सम्बन्धिनोरेकतर(सम्बन्धि)-सत्त्वकाले नैरन्तर्येणापरस्य सम्बन्धिनो(६)ऽवश्यं सत्त्वमित्येवंरूपेण नियमेन तावन्न सिद्ध्यति(७), यतः तदसिद्धेः उक्तरूपनियमासिद्धेः। इत एव विरोधादेव, नियमसिद्धौ उक्तरूपनियमसिद्धौ, (तत्सिद्धिः विरोधसिद्धिः,) तत्सिद्धौ विरोधसिद्धौ, भेदे सति सम्बन्धासम्बन्धलक्षणविरुद्धधर्माध्यासाद्धर्मिभेदे सिद्धे सतीत्यर्थः। (एतावता) चक्रके(ऽपि) परस्पराश्रय-

दीधितिटिप्पणी ।

न चतुर्थ इत्यत्र हेतुः, स हीति, तच्चासङ्गतम्, अतो न सिद्ध्यतीत्यस्य पूरणेनाह। स इत्यादि। यत इति हिशब्दार्थकथनम्। अत्रैव हेतुः, तदसिद्धेरिति। विरोधसिद्धिः कथं(८) नियमसिद्धिकारिणीत्यतो भेदे सतीत्युक्तम्, तथा च विरोधाच्चक्रे(९) भिन्नः सम्बन्धो दण्डे च भिन्न एवेति नियमसिद्धिरिति?। चक्रकेऽपीति। परस्परा-

(१) सम्भवादि-कालि० मु० पु० पा०। सम्भवान्नि-पाठः।

(२) तदसिद्धेः। अत एव-पुण० पु० पा०।

(३) हि तत्सिद्धि-पाठः। (४) सिद्धिः-पुण० पु० पा०।

(५) स चतुर्थ इति भ्रमं निराकरोति। स विरोध इति।—गुणानन्दः।

(६) नैरन्तर्येणापरस्या—पुण० पु० पा०।

(७) तृतीयार्थस्य धर्मिण्यनन्वयात् पूरयति। सिद्ध्यतीति। हेतोरर्थमाह। यत इति। नियमरूपस्यानुक्तत्वादाह। उक्तरूपेति।—गुणानन्दः।

(८) कथनं—इति सर्वत्र पाठः। (९) चक्रे दण्डे—पा० २ पु०।

द्धिः, तदभावात, अनियतोपसर्पणापसर्पणकारणप्रयुक्तत्वाच्च सम्बन्धासम्बन्धयोः । नापि विनाशस्याहेतुकत्वादयं विरोधोऽर्थात् सिद्धयति, तस्याप्यसिद्धेः । ध्रुवभावित्वे तु वक्ष्यामः ।

दीधितिः ।

त्वमक्षतम् । मानान्तरा(१)न्नियमसिद्धिं(२)निराकरोति । न चेति । ननु प्रथमं सम्बद्धस्यासम्बद्धस्य वा पश्चात् कथमसम्बद्धत्वं सम्बद्धत्वं चेत्यत(३) आह । अनियतेति । अहेतुकत्वात् प्रतियोग्युत्तर(४)भावित्वहेत्वनपेक्ष(५)त्वात् । अर्थात् उत्पत्त्यनन्तरमेव भावानां नाशादेकस्य कालभेदेनापि सम्बन्धासम्बन्धा(६)योगात् । तस्य अहेतुकत्वस्य(७) । ननु यद्यस्य ध्रुवभावि(८) तत्तदुत्पत्त्यनन्तरमेव जायते, यथास्माकं समर्थस्य कार्यम्, भवतां च(९) द्रव्यादेः परिमाणादि, ध्रुवभावी च भावस्य विनाश इत्यतोऽर्थाद्विरोधः सेत्स्यतीत्यत आह । ध्रुवेति ॥

दीधितिटिप्पणी ।

अयत्वस्य चक्रकत्वादिव्यापकत्वादित्यर्थः । नन्विति । प्रथमं सम्बद्धस्य पश्चादसम्बद्धत्वं प्रथममसम्बद्धस्य वा कथं पश्चात्सम्बद्धत्वमिति सम्बन्धः । अर्थादित्यादि(१०) । भावस्य क्षणिकतया विभिन्नकालेऽवृत्तौ कालभेदेन सम्बन्धासम्बन्धयोरेकत्रासम्भवात् सहानवस्थानरूपविरोधः सिद्ध इत्यर्थः । इत्यतोऽर्थादिति(११) । इदानीमुक्तन्यायेन एकत्र सम्बन्धासम्बन्धयोर्विरोधः सेत्स्यतीत्यर्थः(१२) ॥

(१) अव्यवहितोपक्रान्तत्वात्तत्पदं नियमपरमित्यवतारिकाव्याजेनाह । मानान्तरादिति ।—गुणानन्दः । (२) सिद्धिं-कलि० मु० पु० पा० । (३) द्धत्वं वेत्यत—पुण० पु० पा० ।

(४) अहेतुकत्वे सदातनत्वमसत्त्वं वा स्यादित्यत आह । प्रतियोगीति । प्रतियोग्यधिकरणकालध्वंसाधिकरणक्षणोत्पत्तिकेत्यर्थः ।–गुणानन्दः । (५) नपेक्षित-कलि० मु० पु० पा० ।

(६) सम्बन्धासम्बन्धवत्त्वा—पुण० पु० पा० ।

(७) विरोधपरत्वभ्रमनिरासायाह । अहेतुकत्वस्येति ।—गुणानन्दः । अहेतुत्वस्य-कलि० मु० पु० पा० । (८) ध्रुवेति प्रामाणिकत्वसूचनाय, भावीत्यनेनैव सामञ्जस्यात् ।—गुणानन्दः ।

(९) भवतां वा—पुण० पु० पा० । (१०) अर्थादित्यादिमूलम्—पा० २ पु० ।

(११) इत्याहार्थादिति-इत्यादर्शपुस्तके पाठः । (१२) विरोधः । यस्येत्यर्थः–इति सर्वत्र पाठः ।

कल्पलता ।

स हीति । सः विरोधः(१) । यदि सहकारिणोः(२) स्थितियौगपद्यनियमो भवेत् तदैक(३)सहकारिदेशे सहकार्यन्तराभावो न भवेत्, स च नास्तीत्यर्थः । ननु प्रतियोगितदभावयोः समानदेशत्वविरोधादेव स्थितियौगपद्यनियमः स्यादित्यत आह । इत एवेति(४) । तदेव स्फुटयति(५) । नियमेति । तत्सिद्धौ विरोधसिद्धौ, भेदे सति क्षणभङ्गे सति, नियमसिद्धिरित्यर्थः । क्षणभङ्गे सति सहकारिणां तथोत्पादनियमाद्यौगपद्यं सिद्ध्येत्, स एवाद्यापि न सिद्ध इति भावः(६) । ननु विरोधात्(७) स्थितियौगपद्यं मा सैत्सीत्(८), अन्यत एव कुतश्चित्प्रमाणात् सिध्यतु तदित्यत आह । न चेति । तदभावादिति । प्रमाणान्तराभावादित्यर्थः । ननु(९) सहकारिणां यौगपद्यमेव कथं न भवतीत्यत आह । अनियतेति(१०) । ननु ध्वंसस्य प्रतियोगिभिन्नं कारणं नास्ति, तथा च स्वोत्पत्त्यव्यवहितोत्तरक्षणवर्तिध्वंसप्रतियोगित्वे क्षणिकत्वे सिद्धे पुञ्जात् पुञ्जोत्पत्तिसिद्धावर्थादेव सहकारिणां स्थितियौगपद्यनियमः सेत्स्यतीत्यत आह(११) । नापीति । तस्यापीति । विनाशा(१२)हे-

---

(१) स हीति । विरोधे-कलि० मु० पु० पा० । (२) सहकारिणा कलि० मु० पु० पा० ।
(३) तत्रैव-पा० २ पु० । (४) आह । अत एवेति-पुण० पु० पा० ।
(५) तदेव स्पष्टयति—पाठः । एतदेव स्पष्टयति-पुण० पु० पा० ।
(६) इत्यर्थः—कलि० मु० पु० पा० । (७) विरोधादेव-कलि० मु० पु० पा० ।
(८) पद्यमसेत्सीत्-पुण० पु० पा० । (९) नन्व-पुण० पु० पा० ।
(१०) अनियन्तेति-पुण० पु० पा० । नियतेति-पा० २ पु० ।
(११) इतीत्याह-कलि० मु० पु० पा० । (१२) विनाशस्या-कलि० मु० पु० पा० ।

कल्पलता।

तुकत्वस्येत्यर्थः। ननु विनाशो भावानां ध्रुवभावी, तथा च कुतो हेत्वन्तरापेक्षेत्यत आह। ध्रुवभावित्व इति॥

नापि पञ्चमः, न हि तदैव(१) तत्रैव स एव सहकार्यस्ति नास्ति चेत्यभ्युपगच्छामः।

दीधितिः।

न हीत्यादिकं व्याप्यवृत्त्यभिप्रायेण(२)॥

दीधितिटिप्पणी।

उत्तरग्रन्थे स च तेभ्योऽतिरिक्तोऽव्याप्यवृत्तिश्चेत्यपीति लिखितम्, अत्र च सहकार्यस्तीति लिखनात् तत्रातिरिक्तापादनं सङ्गमि, अव्याप्यवृत्तित्वापादनमपि तदैव सङ्गतं यद्यत्र(३) व्याप्यवृत्तित्वाभिप्रायः स्यात, अत आह। व्याप्यवृत्त्यभिप्रायेणेति॥

कल्पलता।

उभयसहितं वेति दूषयति। नापीति॥

ननु समवधानं नाम सहकारिणां धर्मः संयोगो भवद्भिरिष्यते, स च तेभ्यो(व्य)तिरिक्तोऽव्याप्यवृत्तिश्चेत्यपि, तथा च स एव तदैव तत्रैवास्ति नास्ति चे-

दीधितिः।

षष्ठमपि प्रतिबन्दिमुखेनानभ्युपगमादेव निरसितुमाशङ्कते। नन्विति(४)। इत्यपि(५), भवद्भिरिष्यते। नास्ति चेतीत्यस्या-

दीधितिटिप्पणी।

प्रतिबन्दिमुखेनेति(६)। अयं भावः। प्रतिबन्द्यावादिनाप्रथमप-

(१) तदेव—कालि० मु० पु० पा०।

(२) एकस्यैव कालभेदेन रूपतदभाववत्त्वोपगमादाह। व्याप्यवृत्तीति।—गुणानन्दः।

(३) सङ्गतं इत्यत्र—इति सर्वत्र पाठः। (४) नन्वित्यादि-पुस्त० पु० पा०।

(५) इत्यपीत्यस्यार्थो-कालि० मु० पु० पा०। अविकारदर्शनाद्दनुषज्याह। इत्यपीति।—गुणानन्दः।

(६) प्रतिपक्षं सामर्थ्येनेति—इति सर्वत्र पाठः।

THE KUPPUSWAMY SASTF
RESEARCH INSTITUTE.

ति। अनतिरेके स्थिरवादिनो व्यस्तान्यपि बीजवारिध-रणिधामानि तान्येवेति तेभ्योऽपि कार्योत्पत्तिप्रसङ्गः। व्याप्यवृत्तित्वे च सर्वत्र रक्तादिविभ्रमः शब्दादिकार्यो-त्पत्तिप्रसङ्गश्च(१)। तस्मादसंयुक्तेभ्योऽन्य एव संयुक्त-स्वभावाः परमाणवो जाता इत्येव न्यायः। नैतदेवम्। क्षणिकपरमाणावप्यस्य(२) विरोधस्य दुर्वारत्वात्। तथा-हि। पूर्वदिगवस्थितः परमाणुर्यथा परदिगवस्थितेन पर-माणुना पर(३)दिगवच्छेदेनावृतरूप उत्पन्नः, तथैव किं पूर्वदिगवच्छेदेनापि, न वा, उभयथा वा। आद्ये उभ-

---

दीधितिः।

ये(४) विरोध इति शेषः। सर्वत्रेति। तत्त(५)त्कार्योत्पत्तिनिया-मकानां महारजनभेर्यादिसंयोगानां सकलावयव(६)दिग्देशाद्य-वच्छेदेन वृत्तौ तत्तत्कार्याणामपि तथैवोत्पत्तिप्रसङ्गादित्यर्थः। परमाणवः क्षणिक(७)परमाणुपुञ्जरूपा वारिबीजादयः कार्यवि-शेषसमर्था जाता इति। न वेति(८)। परदिग(९)वच्छेदेनाप्य-

(१) प्रसङ्गः- पुण० पु० पा०। (२) परमाणोरप्यस्य—पुण० पु० पा०।

(३) परमाणुनाऽपर-कलि० मु० पु० पा०।

(४) त्यस्य-पुण० पु० पा०। एतावता किमायातमित्यत आह। विरोध इतीति।-गुणानन्दः।

(५) सर्वत्रेत्यस्य समवायेन देशभ्रमं निराकुर्वन् विभ्रमादिपदं कार्यान्तरस्याप्युपलक्षकत-या व्याचष्टे। तत्तदिति।-गुणानन्दः।

(६) अवयवेति महारजनसंयोगाभिप्रायेण। दिग्देशेति शब्दजनकसंयोगमधिकृत्य।-गुणानन्दः।

(७) असंयुक्तेभ्योऽन्ये स्थिरा एव परमाणवः सन्तु, नैतावता प्रकृतसिद्धिरत आह। क्ष-णिकेति।-गुणानन्दः। (८) न चेति-कलि० मु० पु० पा०।

(९) न वेत्यस्य प्रतियोगिसाकाङ्क्षतयाऽग्रिमदोषानुसारेण निष्कृष्य तमाह। परदिगिति।

यतोऽप्यनुपलब्धि(१)प्रसङ्गः। द्वितीये तु उभयतोऽप्युपलम्भापत्तिः(२)। तृतीये पुनः स एव(३) दुरात्मा विरोधः, स एव तेनैव तदैव(४)ावृतोऽनावृतश्चेति। प्रकारभेदमुपादायाविरोध इति चेत्, कः पुनरसौ। दिगन्तरावच्छेदः, यदि हि यद्दिगवच्छेदेनैव(५) संयुक्तस्तद्दिगवच्छेदेनैवा(६)संयुक्तोऽपि, ततो विरोधः स्यात्, इह तु नैवमिति चेत्, हन्त संयोगसंयोगिनोर्भेदपक्षेऽपि यद्ययं सिद्धान्तवृत्तान्तः स्यात्, कीदृशो दोष इति(७)।

दीधितिः।

(८)नावृत(रूप) इत्यर्थः। उभयथा वेति। पर(९)दिगवच्छेदेनावृतरूपः पूर्वदिगवच्छेदेन चानावृतरूप इत्यर्थः। पृच्छति(१०)। कः पुनरिति। उत्तरयति। दिगन्तरेति॥

दीधितिटिप्पणी।

*अविरोधादेरदर्शनकृतेनभेदोऽस्त्यातन्मतेपीदृशविरोधप्रसङ्गात्मध्यपक्षरूपोत्पादकमादायैवविरोधित्वक्षतेः तच्चसहानवस्थानमित्यादिनाअभ्युपगमवादेचविरोधेनयौगपद्यापादनक्षणिकतयैवपर्यवसन्नात्(११)॥

---

*अत्र यद्यपि द्वितीय इत्यादिना वक्ष्यमाणदोषे उभयत इति व्यर्थम्, परदिगवच्छेदेनापीत्यस्यैव प्रकृतत्वात्, तथापि दृष्टान्तार्थं पूर्वदिगवच्छेदोपग्रह इति ध्येयम्।-गुणानन्दः।

(१) नुपलम्भ-पाठः। (२) पत्तेः-पुण० पु० पा०।

(३) तृतीये तु—पाठः। (४) तत्र—पुण० पु० पा०।

(५) वच्छेदन—पुण० पु० पा०। (६) वच्छेदेना—पुण० पु० पा०।

(७) दोषः—पुण० पु० पा०। (८) च्छेदेनापि-पुण० पु० पा०।

(९) उभयथा वेत्यस्योभयदिगवच्छेदेनावृतपरत्वे पूर्वस्मादभेदः, अनावृतपरत्वे तु द्वितीयाद्, न वाऽग्रिमदोषसङ्गतिरत आह। परेत्यादि।-गुणानन्दः।

(१०) फक्किकाव्यवच्छेदमवतारिकाव्याजेन स्फुटयति। पृच्छतीत्यादि।-गुणानन्दः।

(११) इयं पङ्क्तिर्व्याकुलाक्षरा पुस्तकद्वयेपि।

कल्पलता ।

एतावता प्रघट्टकेन सहकारिसमवधानासमवधानाधीने करणाकरणे इति यदुक्तं तत्समाहितम्, तथैवेतिसहितं वेति षष्ठं(१) पक्षं परप्रतिबन्दिमुखेन समाधित्सुः प्रतिबन्दि(न)मुत्थापयितुं पीठं(२) रचयति। नन्विति। न हि तत्रैव तदैव(३) स एवास्ति नास्ति चेत्यभ्युपगच्छाम इति यदुक्तम्, तत्संयोगशब्द(४)ज्ञानादावभ्युपगमेन तवापसिद्धान्त इति पूर्वपक्षिणोभिसन्धिः। तेभ्य इति। सहकारिभ्य इत्यर्थः। इत्यपीत्यतो(५) भवद्भिरिष्यते इत्यनुषङ्गः। नास्ति चेति। अतो विरोध इति शेषः। तवापसिद्धान्त इति वा शेषः(६)। व्यस्तान्यपीति। विशकलितान्यपी(७)त्यर्थः। रक्तादीति। अरक्तेऽपि भागे महारजनसंयोगस्य व्याप्यवृत्तितया(८) रक्तधी(९)प्रसङ्ग इत्यर्थः। भेर्याकाशसंयोगस्य च सकलाकाशवृत्तितया सर्वत्र शब्दोत्पत्तिप्रसङ्गः, विभुकार्याणामसमवायिदेशानुरोधित्वात्। आदिपदेन सुखदुःखादिसङ्ग्रहः(१०)। स्वसिद्धान्तानुसारेणोपसंहरति। तस्मादिति। यद्वा, तस्मादिति। अतिरिक्तसंयोगपक्षे विरोधादुक्ता(११)दित्यर्थः। संयुक्तस्वभावा इति। अविरलदेशोत्पन्नाः(१२) क्षणिकपरमाणव एव तथोत्पादाद् घटप-

---

(१) वेति पूर्वं—पाठः। (२) पीठमा—पा० १ पु०।
(३) तदेव तत्रैव-कालि० मु० पु० पा०। (४) तत्संयोगे शब्दे-कालि० मु० पु० पा०।
(५) इत्यतोपीस्यतो—पा० २ पु०। (६) इत्यनुषङ्गः।—कालि० मु० पु० पा०।
(७) विशकलितानी—पुण० पु० पा०। (८) संयोगस्य सर्ववृत्तितया—पाठः।
(९) रक्तत्व—पाठः। (१०) सुखदुःखादिपरिग्रहः—पुण० पु० पा०।
(११) पक्षे उक्ताद्विरोधा-पुण० पु० पा०। (१२) त्पन्ना-कालि० मु० पु० पा०।

कल्पलता ।

दादिभावमापन्ना इत्यर्थः। अस्य विरोधस्येति। आवृतानावृतरक्तारक्तादिविरोधस्येत्यर्थः। आद्य इति। उभयदिगवच्छेदेना(ना)वृतत्व(१) इत्यर्थः। द्वितीय इति। उभयदिगवच्छेदेनानावृतत्व इत्यर्थः। तृतीय इति(२)। क्वचिदावृतः क्वचिदनावृत उत्पन्न इत्यन्वेत्यर्थः। विरोधमाह। स एवेति(३)। कः(४) पुनरसाविति प्रश्नः। दिगन्तरावच्छेदेन(५) इत्युत्तरम्। अविरोधमेवोपपादयति। यदि हीति(६)। अयं सिद्धान्तवृत्तान्त इति। अञ्चलावच्छेदेन महारजनसंयोगेऽपि दशावच्छेदेन तदभावान्न सर्वत्र रक्त(वि)भ्रम इत्यर्थः। एतावता तथैवेतिसहितं वेति(७) षष्ठः पक्षोऽभ्युपगमेन(८) निरस्त इति सिद्धं सहकारिसमवधानासमवधानप्रयुक्ते करणाकरणे एकस्यामेव व्यक्ताविति ॥

एतेन व्यतिरेकपक्षोऽपि निरस्तः।

दीधितिः ।

एतेन व्याप्तिविरहेण। व्यतिरेकपक्षः यत् क्रमयौगपद्यर-

दीधितिटिप्पणी ।

एतेनेत्यादिना क्षणिकत्वसत्त्वयोर्व्यतिरेकव्याप्तिदूषणे क्रमादि-

(१) च्छेदेन तत्त्व-पा० २ पु०। (२) द्वितीय इति-कलि० मु० पु० पा०।

(३) उत्पन्न इत्यर्थः-कलि० मु० पु० पा०।

(४) कश्च—कलि० मु० पु० पा०। प्रकारभेदेत्यादि इह तु नैवामित्यन्तेनैकः पूर्वपक्षग्रन्थः। कः—पुण० पु० पा०।

(५) दिगन्तराद्यवच्छेद इति तु मूलप्रतीकपर्यालोचने युक्तमिव प्रतिभाति।

(६) इत्युत्तरम्।—कलि० मु० पु० पा०। (७) सहितत्वेति— पुण० पु० पा०।

(८) भ्युपगमनियमेन—पा० २ पु०। अनभ्युपगमेनेति तु युक्तम्।

दीधितिः ।

हितं तदसत्, यथा शशविषाणम्, क्रमयौगपद्यरहितश्च स्थिरो भाव इति स्थिराणां सत्त्वव्यतिरेकसाधनम् ॥

दीधितिटिप्पणी ।

विपर्ययहेतोरग्रहणेऽसङ्गतिः स्यात्, क्षणिकत्वाभावस्यैव हेतुतया तदुपन्यासस्यैवोचितत्वात्, एतदुपन्यासस्याप्रस्तुतत्वात्, अतः क्रमादिविरहमेव हेतूकृत्य सङ्गमयति । व्यतिरेकेति । न चैतदप्रस्तुतम्, एवं पूर्वापरा(न)ङ्कं, कुतः, सत्त्वाश्रये हि क्षणिकत्वं साधितम्, इदानीं स्थिरतया पूर्वाङ्कितेषु सत्त्वाभावसाधनस्योचितत्वात् । क्रमयौगपद्यरहितमिति । क्रमेण कारित्वस्य तत्र युगपत् सह कार्यकारित्वस्य च अन्यतरहेत्वभावोऽत्र हेतुः प्रत्येकस्य सामर्थ्येऽपि उभयस्य मूलोक्तत्वादुक्तः, मूले तद्ग्रस्वानुरोधादुक्तम् ? ॥

कल्पलता ।

एतेनेति । सत्त्वक्षणिकत्वयोरन्वयव्याप्तिभङ्गेनेत्यर्थः । यन्न क्षणिकं तन्न सत्, यथा शशविषाणमिति व्यतिरेकव्याप्तिस्त्वया वाच्या, केवलान्वयिनोऽनभ्युपगमात्, व्यतिरेकव्याप्तिश्चान्वयव्याप्तिव्याप्ता, सा चेन्नास्ति, तदा व्यतिरेकव्याप्तिरपि नास्तीति भावः ॥

अधिकश्च तत्राश्रयहेतुदृष्टान्तासिद्धौ प्रमाणाभावः,

दीधितिः ।

आश्रयः(१) पक्षः स्थिरो भावः, तस्यासिद्धिः, तत्स्वरूपस्य परेण(२) प्रामाणिकत्वानभ्युपगमात्, य(तु त)द्व(३)क्ष्यति,

---

(१) आश्रयेण हेतोः सामानाधिकरण्यभ्रमं निराकरोति । पक्ष इति ।—गुणानन्दः ।

(२) स्वनये तस्य प्रामाणिकत्वादाह । परेणेति ।—गुणानन्दः ।

(३) पक्षपदस्य स्थिरभावपरत्वे बोधकमाह । यद्वक्ष्यतीति । अत्र स्थिर इति भाक्ष्यति प्रकृतोपष्टम्भकम् ।—गुणानन्दः ।

अवस्तुनि प्रमाणाप्रवृत्तेः, प्रमाणप्रवृत्तावलीकत्वानुप-

दीधितिः ।

न हि विरोधसहस्रेणापीत्यादि, तद्विशेषणस्या(१)सत्त्वलक्षणस्य साध्यस्याप्रसिद्ध्या च । हेत्वसिद्धिः हेतोः क्रमादिविरहस्याप्रसिद्धिः, सति त्वया तदनभ्युपगमात्, असतः(२) प्रमाणागोचरत्वात्, पक्षस्य(३) हेतोश्चाप्रसिद्ध्या पक्षधर्मत्वासिद्धिश्च । दृष्टान्तासिद्धिः दृष्टान्तस्य अलीकस्याप्रसिद्धिः, तस्य साध्य(४)साधनयोश्चाप्रसिद्ध्या (च) तत्र तदुभयवत्त्वाप्रतीतिः(५) । अलीकत्वा(६)न्नास्त्येवासति पक्षादौ प्रमाणम्, अनुमानं पुनरसत्ख्यात्यैव व्यवहारवत् प्रवर्तते(७), अथ व्यवहारोपि

दीधितिटिप्पणी ।

नैयायिकमते सिद्धत्वादाह । परेणेति । बौद्धेनेत्यर्थः । यद्वक्ष्यति, परमतेनेति शेषः, अन्यथा नैयायिकमतेन न हीत्युक्तावसङ्गतं स्यात्, स्थिरे नैयायिकैः प्रत्यक्षाङ्गीकारात्, एवं च मूले दर्शयितुमित्यनन्तरं त्वयेति शेषः । पक्षासिद्धिरित्यत्र हेत्वन्तरमप्याह । तद्विशेषणस्येति । तथा च सन्दिग्धसाध्यधर्मिणः पक्षस्यात्रोभयथाऽसिद्धिः, विशेष्याभावात्, साध्यरूपविशेषणाभावाच्च, एवं चाद्ये हेतुः प्रामाणिकत्वानभ्युपगमादिति, द्वितीये हेतुस्तद्विशेषणस्येति । तस्य दृष्टान्तस्य । व्यवहारवदिति । यथाऽलीके व्यवहारः प्रवर्त्तते तद्वदनुमा-

(१) साध्याप्रसिद्धेरनुक्तत्वान्न्यूनतामाशङ्क्य परिहरति । तद्विशेषणस्येति । अप्रसिद्ध्या चेत्यत्राश्रयासिद्धिरिति प्रागुक्तमनुषज्यते ।—गुणानन्दः ।

(२) असतश्च—पुण० पु० पा० ।

(३) ननु साध्यस्याप्रसिद्धावपि यथाऽप्रसिद्धसाध्यको व्यतिरेकी, तथा हेत्वप्रसिद्धावपि स्यादत आह । पक्षस्येत्यादि ।—गुणानन्दः ।

(४) तस्य साध्य—कालि० मु० पु० पा० ।

(५) प्रतीतिश्च—पुण० पु० पा० । तत्र, दृष्टान्तत्वेनाभिमते शशविषाणादौ ।

(६) प्रतिबन्दिमात्रस्य प्रकृतानुपपादकत्वादाह । अलीकत्वादिति ।—गुणानन्दः ।

(७) त्ख्यात्यैव प्रवर्तते व्यवहारवत्—पुण० पु० पा० । असति प्रमाणाभाव इतिवचनवादित्यर्थः ।

पत्तेः । एवं तर्ह्य(१)व्यवहारे स्ववचनविरोधः स्यादिति चेत्, तत् किं(२) स्ववचनविरोधेन तेषु प्रमाणमुपदर्शितं भवेत्(३), व्यवहारनिषेधव्यवहारोपि(४) वा खण्डितः (स्यात्)(५), अप्रामाणिकोऽयं(६) व्यवहारोऽवश्याभ्युपगन्तव्य इति वा भवेत् ।

दीधितिः ।

प्रमाणाधीन एव,तत्राह । एवं तर्हीति । स्ववचनम् असता(७) श्रयादौ प्रमाणाभाव इति वचनम् । व्यवहारेति । तेष्वित्य(८) नुषज्यते ॥

दीधितिटिप्पणी ।

नमपि भविष्यतीति भावः । प्रमाणाधीन एव, त्वया उच्यत इति शेषः ॥

कल्पलता ।

अधिक इति । अन्वयव्याप्त्यपेक्षयात्र बहूनि दूषणानीत्यर्थः । तान्येवाह । आश्रयेति । आश्रयपदं साध्याभावपरम्, तदाश्रित्य व्यतिरेकव्याप्तिप्रवृत्तेः,

---

(१) ननु साध्यज्ञानमात्रं तद्व्यतिरेकग्रहौपयिकं, न तु साध्यप्रमा, शशशृङ्गं नास्तीति व्यवहारात्, अन्यथा न तत्र व्यवहार इत्यपि वचनं व्याहतम्, अस्यैव व्यवहारस्य सत्त्वात्, तथा चाश्रयादौ प्रमाणाप्रवृत्तावपि नोक्तदोष इत्याह । एवं तर्हीति ।—भगीरथठक्कुरः ।

(२) तत किमिति । न हि तत्र व्यवहारः प्रामाणिकः सम्भवति, अलीकानामकारणतया प्रत्यक्षाविषयत्वात्, व्याप्तिग्राहकतादात्म्यतदुत्पत्त्योरभावेऽनुमानासम्भवादित्यर्थः ।—भगीरथठक्कुरः । (३) भवति—कालि० मु० पु० पा० ; (४) व्यवहारो-कालि० मु० पु० पा० ।

(५) व्यवहारनिषेधेति । अवस्तुविषयकस्य व्यवहारस्य यो निषेधरूपो व्यवहारः सोऽपि खण्डितः, तथा च व्यवहारनिषेधोपि तत्र न कर्तव्य इत्यर्थः ।—भगीरथठक्कुरः ।

(६) अप्रामाणिकोपि—पुण० पु० पा० । अप्रामाणिक इत्यस्य प्रमाणाविषयगोचर इत्यर्थः ।

(७) स्वपदस्य बौद्धपरत्वे इष्टापत्तेराह । असतीत्यादि ।—गुणानन्दः ।

(८) विषयाकाङ्क्षायामाह । तेष्विति । मौलव्यवहारनिषेधव्यवहारपदं चासत्याश्रयादौ प्रमाणाभाव इतिवचनपरमित्यवधेयम् । एवमग्रेपि यथायथमवसेयम् ।—गुणानन्दः ।

कल्पलता।

हेतुपदं साधनाभावपरम्, तद्विपर्ययस्य हेतुत्वोपगमात्, दृष्टान्तपदं स्फुटार्थमेव, तथा च न(१) शशविषाणादौ साध्याभावो न(२) साधनाभावो न वा शशविषाणादि प्रमाण(३)गम्यमित्यर्थः। यद्वा अक्षणिकमसत्, क्रमयौगपद्याभ्यामर्थक्रियारहितत्वात्, कूर्मरोमवदित्याश्रयासिद्धिः, सन्देहसिषाधयिषयोरभावात्। अत एव हेत्वसिद्धिः, व्याप्तिपक्षधर्मताविशिष्टस्यैव हेतुत्वात्(४)। एवं तर्हीति। प्रमाणसाध्य(५) एव व्यवहारस्तदेत्यर्थः, तथा च ज्ञानमात्रं व्यवहाराङ्गं, न तु प्रमैवेति भावः। अलीके कोऽपि व्यवहारो न सम्भवतीति वदतस्तव स्ववचनविरोधः, अस्यैव(६) व्यवहारस्याभ्युपगमादित्याह। स्ववचनेति। तत्किमिति। प्रमाणाधीन एव व्यवहारः, त्वया च व्यवहारनिषेधव्यवहारः(७) क्रियते, तन्नूनं(८) शशविषाणाद्यपि प्रामाणिकमित्यायातमित्यर्थः। व्यवहारनिषेधेति। प्रमाणमन्तरेण(९) व्यवहारनिषेधव्यवहारोऽप्ययमनुपपन्न इत्यर्थः। अप्रामाणिकोऽपीति। अप्रामाणिकोऽपि व्यवहारश्चेत् त्वया(१०) नेष्टव्य(११)स्तदा तव(१२) स्ववचनविरोधो भवेदित्यर्थः॥

(१) तथा च—कलि० मु० पु० पा०। (२) साध्याभावे—पुण० पु० पा०।

(३) प्रमाणगण—कलि० मु० पु० पा०। (४) अक्षणिकत्वरूपसाध्याप्रसिद्ध्या पक्षविशेषणसंशयासिषाधयिषाद्यभावादाश्रयासिद्धिः, अत एव हेत्वभावः, व्याप्तपक्षधर्मस्यैव हेतुत्वादिति भावः। उपलक्षणं चैतत्। दृष्टान्तासिद्धिरप्यत एव, साध्याप्रसिद्ध्या साध्याभावव्यापकाभावप्रतियोगित्वग्रहस्थलाभावादित्यप्यूह्यम्। (५) प्रमाणे साध्य—पुण० पु० पा०।

(६) विरोधः, तस्यैव—पुण० पु० पा०। (७) निषेधव्यवहारश्च-पुण० पु० पा०।

(८) तन्मूलं-पुण० पु० पा०। (९) प्रमाणान्तरेण-पा० २ पु०।

(१०) व्यवहारस्त्वया-पा० २ पु०। (११) नेष्टव्य-कलि० मु० पु० पा०। (१२) स्तदा-पा० २ पु०।

न तावत् प्रथमः, न हि विरोधसहस्रेणापि स्थिरे तस्य क्रमादिविरहे वा शशशृङ्गे वा प्रत्यक्षमनुमानं वा दर्शयितुं शक्यम, तथात्वे वा कृतं भीतकलहेन ।

दीधितिः ।

शशशृङ्गे वेति । तस्य क्रमादिविरहे, असत्त्वे च(१)त्यपि द्रष्टव्यम् । तथात्वे वेति । प्रमाणप्रवृत्तावसत्त्वानुपपत्तेरिति भावः ॥

दीधितिटिप्पणी ।

द्रष्टव्यमिति । परन्त्वसत्त्वरूपसाध्यं पक्षे न दर्शितम्, पक्षे साध्यप्रसिद्धेरनङ्गत्वादिति ॥

कल्पलता ।

अक्षणिकमसत्, क्रमयौगपद्यरहितत्वात्, कूर्मरोमवदित्यनुमाने पक्ष(२)साध्यहेतुदृष्टान्तेषु प्रमाणानुपपत्तिमाह । न हीति । इन्द्रियसन्निकर्षाभावात् प्रत्यक्षानुपपत्तिः, व्याप्त्यभावा(३)दनुमानानुपपत्तिरिति भावः । तथात्व इति(४) । प्रमाणोपदर्शने इत्यर्थः । भीतः बर्बरः, भूताविष्टो वा ॥

द्वितीयस्त्विष्यत(५) एव प्रामाणिकैः । अवचनमेव तर्हि तत्र(६) प्राप्तम्, किं कुर्मो यत्र वचनं सर्वथैवानुपपन्नं तत्रा-

दीधितिः ।

अवचनमेवेति । तथा चाप्रतिभेति भावः । उत्तरार्द्धं उत्त-

दीधितिटिप्पणी ।

मूले अलीके व्यवहारस्य निषेधव्यवहारोपि नास्तीति स्व-

(१) न्यूनतां परिहरति । असत्त्वे चेति । (२) दित्यनुमानपक्षे—पा० २ पु० ।
(३) व्याप्तिग्रहाभावात्–पुण० पु० पा० । (४) तथात्वे वेति—कलि० मु० पु० पा० ।
(५) द्वितीयं त्विष्यत—पाठः । (६) तर्हि–कलि० मु० पु० पा० ।

वचनमेव श्रेयः, त्वमपि परि(१)भावय तावत्, निष्प्रमाणके(२)ऽर्थे मूकवावदूकयोः कतरः श्रेयान्(३)।

दीधितिः।

राप्रतिपत्तिरप्रतिभा, न चेदमुत्तरार्हमित्याह। त्वमपीति॥

दीधितिटिप्पणी।

मते(४) उच्यते। तदुक्तम्, अत्र सचेतनानां मूकतैव शरणमिति भावः ?॥

कल्पलता।

द्वितीयस्त्विति। व्यवहाराभाव(५)व्यवहारखण्डनपक्ष इत्यर्थः। अप्रतिभानिग्रह(स्थान)मुद्भावयति। अवचनमेव तर्हीति। निरनुयोज्यानु(६)योगमाह सिद्धान्ती, किं कुर्म इति। उत्तरार्हे उत्तराप्रतिपत्तिरप्रतिभा, इदं तूत्तरार्हमेव न(७) भवतीति नाप्रतिभेति भावः(८)। (९)तदेवाह। त्वमपीति।(९) अवचनमेवात्र(१०) श्रेय इत्यर्थः। निष्प्रमाणक(११)इति। वचनस्यापि(१२) मूलभूतप्रमाणसापेक्षत्वादिति भावः(१३)॥

एवं(१४) विदुषापि भवता न मूकीभूय स्थितम्,

---

(१) श्रेयः, स्वयमपि वि—पाठः। (२) निष्प्रामाणिके—कालि० मु० पु० पा०।
(३) कतरः प्रामाणिक इति—पुण० पु० पा०। (४) नास्तीति त्वया-पा० २ पु०।
(५) व्यवहाराभावः।—कालि० मु० पु० पा०। व्यवहाराभावाभाव-पा० २ पु०।
(६) निरनु—कालि० मु० पु० पा०। (७) मेव—कालि० मु० पु० पा०।
(८) न वा त्वया साधनं किञ्चिदुक्तं यत्रानुत्तरादप्रतिभा स्यादित्यपि बोध्यम्।
(९) भावः।—पा० २ पु०।
(१०) मेव—पुण० पु० पा०। (११) निःप्रामाणिक—कालि० मु० पु० पा०।
(१२) इति। स्ववचनस्यापि—पुण० पु० पा०। इति। अवचनस्यापि-पा० २ पु०।
(१३) वचनहेतुविवक्षाकारणीभूतप्रमाणसापेक्षत्वादिति भावः।
(१४) ननु नावस्तुनि कस्यचिद्धर्मस्य विधिनिषेधव्यवहाराविति जानतापि तत्र व्यवहारो निषिध्यते, न तु मूकत्वमालम्ब्यत इत्याह। एवमिति। —भगीरथठक्कुरः।

अपि तु व्यवहारः प्रतिषिद्ध एवासती(१)ति चेत, सत्यम् । यथा(२) अप्रामाणिकः स्ववचनविरुद्धोऽर्थो मा प्रसाङ्क्षी-दिति मन्यमानेन त्वया च(३) अप्रामाणिक एवासति व्यवहारः स्वीकृतः, तथास्माभिरपि प्रमाणचिन्तायाम

दीधितिः ।

यथेति । अप्रामाणिकः प्रमाणाविषयः, स्व(४)वचनविरुद्धः असति पक्षदृष्टान्तादौ प्रमाणाभावेऽप्यसत्त्वयासैवानुमा प्रवर्तत इतिवचनविरुद्धः अर्थः असति(५) व्यवहारनिषेधरू अप्रामाणिकः प्रमाणामूलकः प्रमाणाविषयार्थको वा, व्यवहा असति शशशृङ्गादौ क्रमादिविरहासत्त्वादिव्यवहारः,प्रमाणचिन्त

दीधितिटिप्पणी ।

स्ववचनेति । असतीत्यादिना व्यवहारवदिति दृष्टान्तं कृ वचनमुक्तं तद्दृष्टान्तविरुद्धत्वाद्व्यवहारनिषेधस्तद्वि(६)रुद्ध इत्यर्थः व्यवहारस्य शब्दप्रयोगरूपतया तस्य श्रोत्रजन्यप्रमाविषयत्वमस्त वेत्यतोऽर्थमाह । प्रमाणामूलक इत्यादि । इदानीं न विद्यते प्रा णिको(७) यत्रेति व्युत्पत्त्या शब्दत एवार्थमाह । प्रमाणाविषयार्थ केति । क्रमादिविरहस्यासत्त्वस्य च व्यवहारः । तथाव्यवहारात

(१) असति प्रमाणं नास्तीत्युक्तम् ।

(२) यथेति । सामर्थ्यनिवृत्तिव्यवहारनिषेधः स्ववचनविरोधादेवाप्रामाणिकोऽर्थः, (असन्) शृङ्गादिस्तत्र निषेधव्यवहाराकरणे सोऽस्तीति भ्रान्तिरूपा प्रसक्तिः सा माभूदित्यभिमानाद्यथा नुमित्यर्थमप्रामाणिक एव व्यवहारः स्वीकृतस्तथा प्रमाभूतायामनुमितौ प्रमारूप एव लिङ्गपर करणमिति शिष्यशिक्षार्थे स्ववचनविरोधोऽङ्गीकृतः, न चैवं साध्यासिद्धिः स्यादाश्रयासिद्ध्यादेस्त स्थ्यादित्यर्थः ।-भगीरथठक्कुरः । (३) मन्यमानेन भवता-पुण० पु० पा० ।

(४) स्वस्य बौद्धस्य यद्वचनम् । तत् स्पष्टयति । असतीति ।—गुणानन्दः ।

(५) तद्विरुद्धो नैयायिकाभ्युपगतः, तमाह । असतीति । अत्र व्यवहारः करणव्युत अनुमानम्, न्यायात्मको वा शब्दः । तथा व्यवहारस्य स्वरूपतः प्रमाणविषयत्वादाह । प्र मूलक इति । शब्दमात्रगोचरप्रमाणस्यात्र मूलत्वात् सामान्यप्रतिषेधासम्भव इत्यनुशयादाह माणाविषयेति ।-गुणानन्दः ।(६) वचनमुक्तं तादृशानन्त्याविरुद्धत्वादेव्यवहारस्तु-पा० २ पु

(७) प्रामाणिकोऽर्थो-पा० २ पु० ।

प्रामाणिको व्यवहारो मा प्रसाङ्क्षीदिति मन्यमानैरप्रामाणिक

कल्पलता।

थाम् असदादौ(१) प्रमाणं किमिति चिन्तायाम् व्यवहारः असति क्रमादिविरहादिव्यवहारः। अप्रामाणिक इति। प्रकृते विरोधस्यासङ्घटितत्वादसति प्रमाणाभावाद्विरोधोऽप्यप्रामाणिक इत्यर्थः। केचित्तु(२) स्वोपदर्शितसत्त्वक्षणिकत्वव्याप्तिविरोधिनोऽक्षणिकसत्त्वस्य निराकरणाय क्षणिकत्वव्यावृत्त्या सत्त्वव्यावृत्तिरप्रामाणिकी यथा त्वया व्यवह्रियते, तथास्माभिरपि क्षणिकत्वे प्रमाणचिन्तायां(३) त्वदुपदर्शितस्य शशशृङ्गादौ व्यतिरेकव्यवहारस्य निराकरणाय शिष्यादय एवं बोध्यन्त इत्यर्थ इत्याहुः। परे तु(४) यत्र व्यवहारनिषेधे स्ववचनविरोधः

दीधितिटिप्पणी।

कारे व्यवहारविषय(त्व)निषेधरूपोऽर्थोऽप्रसक्तो भवितुं नार्हतीति मूलभावः। व्यवहार इत्यादि। तथा च इतरप्रसक्तिभयेन भवता यादृशव्यवहारः स्वीकृतः, मया तद्व्यवहारस्यैव प्रसक्तिभयेन स्ववचनविरोधः स्वीकृत इत्यर्थः। एतेन व्यतिरेकपक्ष इत्यादेः क्षणिकत्वसत्त्वयोर्व्यतिरेकव्याप्तेर्व्याख्यातॄणां मतमाह। केचित्त्विति। स्वोपदर्शितेत्यादि स्ववचनविरुद्ध इत्यस्यार्थकथनम्। व्यतिरेकव्यवहारस्य (व्यतिरेकग्रहव्यवहारस्य।) परे त्विति। अलीके स्ववचनविरुद्धेत्येतत्पदस्यार्थं बहुव्रीह्या सङ्गमयति। यत्रेति। अलीके व्यवहाराभावस्त्वयापि स्वीक्रियत इति कृत्वा तत्र त्वयापि व्यवहारनिषेधात्

(१) असदादाविति। व्यवहारविषयत्वस्य प्रमाविषयत्वव्याप्यत्वव्यवस्थापन इत्यर्थः। कीदृशो व्यवहारः, नमाह। असतीत्यादि। मा प्रसाङ्क्षीदित्यस्य च प्रमाणतयेत्यादिः, तथा चास्य व्यवहारस्य प्रमात्वव्यवहारो मा प्रसाङ्क्षीदिति फलति। प्रकृत इति। तथा चोक्तप्रयोजननिष्पत्त्येऽर्थशून्य एव शब्दो मया प्रयुज्यत इति पर्यवसितामिति भावः।—गुणानन्दः।

(२) केचिदित्यरुचिबीजं तु व्यवहारः स्वीक्रियत इत्यस्योदचरता, शिष्यादयो वा कथं बोध्यन्ते, असति प्रमाणाप्रवृत्तेरित्यादि।—गुणानन्दः।

(३) क्षणिकत्वेऽप्रमाणचिन्तायां--कलि० मु० पु० पा०। क्षणिकत्वे प्रामाणिकत्वाचिन्तायां—पुण० पु० पा०। (४) भगीरथठक्कुरस्येदं मतम्।

एव स्ववचनविरोधः स्वीक्रियते(१) । यदि तूभयत्रापि भवान् समान(२)दृष्टिः स्यादस्माभिरपि तदा(३) न किञ्चिदुच्यत इति ।

दीधितिः ।

स्यात् सोऽप्रामाणिकोऽर्थो मा प्रसाङ्क्षीत् अस्तीतिभ्रमविषयो मा भूत्, एतदर्थं यथा तत्रासत्त्वानुमित्यर्थमप्रामाणिको व्यवहारस्त्वया स्वीकृतस्तथा प्रमितादेव लिङ्गात् सत्यानुमितिर्भवतीति शिष्यबोधनायास्माभिरपि स्ववचनविरोधोऽङ्गीकृत इत्यर्थ इत्याहुः(४) । यदि त्विति । असति व्यवहारनिषेध इवासतो दृष्टान्तत्वादिकमपि न सम्भवति, प्रमाणविरहादिति प्रतिसन्धाय यदि भवानुक्तरूपमनुमानं न प्रयुङ्क्त इत्यर्थः ॥

दीधितिटिप्पणी ।

स्ववचनस्य व्यवहाररूपस्य विरोधोऽत्रेत्यर्थः । मा प्रसाङ्क्षीदित्यस्यार्थमाह । अस्तीति । अत्र हेतुगर्भं मूले विरुद्धान्तं विशेषणम् व्यवहारदृष्टान्तेनैवानुमितिसम्भूतेः सम्भवादाह । प्रमितादेवेति(५) तावता च सत्यानुमितिवत् प्रमितलिङ्गसम्भि(६)त्खण्डनमिति भावः । असतीति । मन्मत इत्यादिः ॥

(१) ननु परेणाप्रामाणिकार्थाभिधानेऽप्रामाणिकार्थप्रसक्तिपरिजिहीर्षयापि कृते स्वयमप्रामाणिकार्थप्रसक्तिपरिजिहीर्षयाप्यप्रामाणिकव्यवहारप्रवर्त्तनं कथमुचितम्, तत्र स्वयमभ्रान्तः परं भ्रामयितुमेव तथाविधशब्दप्रयोगे स्वानुभूतविपरीतार्थबोधेच्छया शब्दप्रयोक्तृत्वरूपप्रतारकत्वस्य, स्वयमपि भ्रान्तत्वे तु तन्मूलकनिग्रहस्य च स्वस्मिन् दुर्वारत्वादिति चेन्न । स्वयमभ्रान्तस्यापि यदि निर्वह्निः स्यात् तर्हि निर्धूमः स्यादित्यादितर्काभिलापकशब्दप्रयोगवत् प्रमाणबाधितापरकीयमत प्रसक्तिनिराचिकीर्षयाऽऽहार्यारोपमूलकस्यैव शशशृङ्गादौ व्यवहारनिषेधव्यवहारस्याप्रवर्तने कथकसम्प्रदायप्रसिद्धनियमातिक्रमस्यापादयितुमशक्यत्वात्, तर्काभिलापकशब्दस्थल इवापि पर्यवसितार्थस्य प्रामाणिकतयैव द्वारभूतभ्रमप्रयोजकशब्दप्रयोगेपि प्रयोक्तुः प्रतारकत्वादिदोषप्रसक्तेः, पर्यवसितार्थस्याप्रामाणिकत्व एव तत्प्रसक्तिसम्भवादित्यवधेयम् ।

(२) सम—पुण० पु० पा० । (३) स्यात्तदास्माभिरपि—पुण० पु० पा० ।

(४) तत्रासति व्यवहारनिषेधे एतस्यासत्त्वानुमानं तेनोपक्रान्तमित्यरुचिबीजम् ।—पूर्णानन्दः । (५) दाह । सत्यानुमितादेवति—पा० २ पु० । आदर्शपुस्तकेऽप्ययमेव पाठः ।

(६) प्रमितलिङ्गकोचि—पा० २ पु० । आदर्शपुस्तकेऽप्ययमेव पाठः ।